TRIVANDRUM SANSKRIT SERIES

NO. II.

# ABHINAVAKAUSTUBHAMÂLÂ

AND

# DAKSHINÁMÚRTISTAVA

OF

***KRISHNALÍLÁSUKAMUNI***



Edited with Notes

BY

T. GANAPATI ŚÂSTRÍ

*Principal, His Highness the Maharajah's Sanskrit College, Trivandrum*

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS

1905.

॥ श्रीः ॥

अनन्तशयनराजकीयसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः २.

# अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ

श्रीकृष्णलीलाशुकमुनिना

प्रणीतौ

अनन्तशयनस्थराजकीयसंस्कृतविद्यामन्दिराध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितौ

लघुटिप्पण्या च संयोजितौ ।



तौ च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितौ ।



काळम्बाब्दाः १०८१, क्रैस्ताब्दाः १९०५.

# निवेदना ।

अभिनवकौस्तुभमालाया दक्षिणामूर्त्तिस्तवस्य च प्रणेता कृष्णलीलाशुकमुनिर्यथा पुरुषकारकर्तुर्न भिद्यते, तथा पुरुषकारग्रन्थस्य निवेदनायां प्रत्यपादयम् । कृष्णकर्णामृतस्य कर्ता लीलाशुकः किमयमेव स्यादुतान्य इति न निश्चयः । तत्र अभिनवकौस्तुभमालाया रत्नसहोदरकौस्तुभमालेत्यपि प्रसिद्धिरस्ति ।

त. गणपतिशास्त्री.

# Prefatory Note.

As has been stated in the Introduction to *Purushakara*, its author Krishnalilasukamuni is also the author of *Abhinava-kaustubhamala* and *Dakshinamurtistavam* But it is not certain whether he is the same as Lilasuka, the author of *Krishnakarnamritam* *Abhinavakaustubhamala* is also known as *Ratnasahodarakaustubhamala*.

T G S.

॥ श्रीः ॥

श्रीकृष्णलीलाशुकमुनिप्रणीता

# अभिनवकौस्तुभमाला ।

लक्ष्मीश्च कौस्तुभश्चेति यद्रत्नद्वयमुद्धृतम् ।
तन्नः कामदुघं भूयात् तेजस्त्रैलोक्यमङ्गलम् ॥ १ ॥

यत्र साम्राज्यचिह्नानि यमिनां हृदयैः सह ।
श्रीश्च जाग्रति तज्जीयाच्छ्रीश! त्वच्चरणाम्बुजम् ॥ २ ॥

यच्चादिकवयो व्यासप्रमुखाः सपितामहाः ।
भागीरथीसरस्वत्योः प्रवाहप्रभवं विदुः ॥ ३ ॥

(युग्मकम्)

किं ब्रूमः प्रपदं देव! यस्य प्रतिनिधावपि[1] ।
पृष्ठे जरठकूर्मस्य जगती प्रतितिष्ठति ॥ ४ ॥

तेऽमी नखेन्दवो देव! यान् हि नाभिसरोजभूः ।
पुरा सिसृक्षितस्येन्दोः प्रतिमामन्वमन्यत ॥ ५ ॥

जयतां जगतां नाथ! गुल्फावुत्फुल्लविभ्रमौ ।
यावनुस्मरतां गाढमुन्नतिर्[2]न तथानयोः ॥ ६ ॥

तव देव! पदं धन्या मणिभूषणमण्डली ।
वेषान्तरेण वेदान्तवाणीव विनिषेवते ॥ ७ ॥

---

१. साक्षात् तस्मिन् जगती प्रतितिष्ठतीति किमु वक्तव्यमित्यपिशब्देन द्योत्यते.

२. उन्नतिरुत्कर्ष उत्सेधश्च

निर्वाणसंज्ञकं देव! तव तत् परमं पदम् ।
चिरात् प्रविशतां शङ्के जङ्घे मङ्गल्यतोरणे ॥ ८ ॥

एते ते जानुनी नाथ! यशोदाङ्गणरिङ्गिणी ।
लक्ष्मीः करीषगन्धान्ध्यच्छलाज्जिघ्रति[1] ये (स्मिता?)[2] ॥ ९ ॥

तावूरू जयतां यौ किं द्वौ करौ स्मरहास्तिनः ।
हस्तिपृष्ठाप्रतिष्ठश्चेन्नैव[3] देवः श्रियं जयेत् ॥ १० ॥

त्वत्कटीतटसौभाग्ये स्वामिन्नास्माद्गिरां गतिः ।
लक्ष्मीवसुन्धराधन्यमनीषास्तत्र जाग्रतु ॥ ११ ॥

कामरूपैव देव! श्रीर्येयं वक्षस्तटे स्थिता ।
कटीतटेऽपि कामान्धा भाति पीताम्बरात्मना ॥ १२ ॥

काञ्चीयं काञ्चनी नाथ! भाति रत्नप्रभोद्भटा ।
मुग्धयेव कृता लक्ष्म्या मदान्धस्मरशृङ्खला ॥ १३ ॥

सेयं नाभी यया देव! शङ्खः संघृष्य गर्जति ।
लक्ष्मीविरिञ्चयोः स्पर्धा वस्तुं यत्सरसीरुहे ॥ १४ ॥

वलित्रयमिदं देव! जगत्त्रयमनोहरम् ।
माधुर्यवारिधेर्धत्ते वीचीनां विभ्रमश्रियम् ॥ १५ ॥

---

१. करीषगन्धान्ध्य शुष्कगोमयगन्धव्याप्तत्वं तस्यच्छलात् तद्रूपाद्वा कल्पिताल्लिङ्गादित्यर्थः । जिघ्रति स्पृशति इति मन्ये इति शेषः । एवञ्च लक्ष्मीसंसर्गजमेवेदं जानुनोः करीषगन्धान्ध्य, न त्वङ्गणरिङ्गणवशजनितामिति तात्पर्यं फलितम् । लक्ष्मीश्च करीषिणी श्रीसूक्ते श्रूयते – –'गन्धद्वारान्दुराधर्षां नित्यपुष्टां करीषिणीं । ईश्वरीं सर्वभूताना त्वामिहोपह्वये श्रियम्' इति. २. 'सदा' इति वा 'मुदा' इति वा पाठो भवेत्. ३ इदमर्धं 'हतिप्रविष्टप्रतिश्चेन्नैव देवः श्रियं जयेत्?' इत्येवादर्शपुस्तके दृश्यते.

श्रीमानुदरबन्धोऽयं श्रियं देवस्य पुष्यति ।
कान्तिसिन्धौ दृशोः क्रीडाप्लवः क्लृप्त इव श्रियः ॥ १६ ॥

लोकैकनाथ! रम्येयं रोमराजी विराजते ।
क्लृप्तेव प्रथमं लक्ष्म्या वक्षोहर्म्याधिरोहणी ॥ १७ ॥

श्रीवत्सः श्रीनिधे! सोऽयं श्रियं कामपि पुष्यति ।
यः पद्मजापदाम्भोजक्रीडाचिह्नानि निह्नुते ॥ १८ ॥

चकास्ति कौस्तुभः सोऽयं तव देव! भुजान्तरे ।
पयोधिराजकन्याया हर्म्यदीप इवार्पितः ॥ १९ ॥

नानारत्नसहस्राणि नाथ! वक्षसि जाग्रति ।
रत्नाकरसुतोद्वाहयौतकानीव कानिचित् ॥ २० ॥

वैजयन्तीमिमां[1] देव! मन्ये साधारणीं[2] ध्रुवम् ।
ममत्वपात्रं भृङ्गाणां देवस्य[3] मदनस्य च ॥ २१ ॥

भान्ति ते जगतां नाथ! भुजा भुजगभूषणाः ।
जगद्भारोद्वहैश्चक्रे यैश्चक्रादिभिरश्रमः ॥ २२ ॥

पाणयश्चक्रपाणे! ते भान्ति भक्ताभयप्रदाः ।
येषां दक्षिणतैवासील्लक्ष्मीपाणिग्रहोत्सवे ॥ २३ ॥

लोकपालललाटेषु लक्ष्म्याश्च स्तनमण्डले ।
लेखारसज्ञैर्यैः पञ्चशाखैः पञ्चशरः स्मरः ॥ २४ ॥

(युग्मकम्)

तेऽमी कररुहा देव! येषां विभ्रमविक्रमाः ।
कमलाविपुलोत्तुङ्गस्तनयोर्हृदि च द्विषः ॥ २५ ॥

---

१ 'वैजयन्ती पताकाया जयन्त्या केशवस्रजि' इति यादव   २. साधारणीं सामान्यवनिताम्   ३ देवस्य प्रकरणात् तवेत्यर्थ

कम्बु ग्रीवामिमां नाथ! कथं नु कथयामहे ।
लक्ष्मीकङ्कणमुद्राभिर्या त्रिरेखास्थितिं जहौ ॥ २६ ॥
कर्णपाशाविमौ देव! स्फुरन्मकरकुण्डलौ ।
अवशाद्यत्प्रवेशान्धा मृगा मृगदृशां दृशः ॥ २७ ॥
तौ कपोलाविमौ देव! यावुद्वीक्ष्य रमाभुवौ ।
मन्ये नान्या[2]वमन्येतां मङ्गल्यमणिदर्पणौ ॥ २८ ॥
अधरं देव! बिम्बोष्ठममृतं भुवनोत्तरम् ।
आहुर्वि[3]पर्ययेणात्र प्रमाणं प्राणवल्लभे ॥ २९ ॥
तवाधरसुधा सेयं यां निपीय पयोधिजा ।
ततः प्रभृति वै देव! सुधान्तरमुपेक्षते ॥ ३० ॥
दन्तपङ्क्तिरियं देव! दशनच्छदरञ्जिता ।
मुखेन्दुकान्तेराधत्ते मुक्तावलिपरिष्क्रियाम् ॥ ३१ ॥
देव! त्वन्नासिकावज्रकुसुमं प्राप्य मन्मथः ।
कुसुमान्तरसम्पत्तिं मन्यते पङ्क्तिपूरणम् ॥ ३२ ॥
अनयोः पुण्डरीकाक्ष! नेत्रयोः पुण्डरीकयोः ।
मुखेन्दुः कान्तिसरसी मूलभूमिस्तु चिन्त्यताम्[4] ॥ ३३ ॥
देव! क्रीडाकटाक्षाय भूयो बद्धोऽयमञ्जलिः ।
कामं न केवलं लक्ष्म्या यो दुग्धे जगतामपि ॥ ३४ ॥
तदेतद् वदनं देव! माधुर्यमिव मूर्त्तिमत् ।
वीक्ष्य से[5]वाच्छलारूढनासाग्राङ्गुलि यज्जगत् ॥ ३५ ॥

---

१. कम्बुना त्रिरेखेण भाव्य, न तु त्रिरेखाहीनेन । 'त्रयी तु कम्बु शङ्खोऽस्त्री सुग्रीवो मधुरस्वनः । त्रिरेख षोडशावर्त' इति वैजयन्ती २. अन्यौ वास्तवौ. ३. भुवनोत्तरत्वादुत्तर इति हि बिम्बोष्ठो वक्तव्य , न त्वधर इति. ४. विरोधिन इन्दोरुत्पत्तिस्थानत्वमद्भुतामिति भाव.. ५. सेवाया. सेवाकालिकाञ्जलेश्छलाद्व्याजाद् वस्तुतो विस्मयादित्यर्थः आरूढनासाग्रा अङ्गुलयो यस्य तत.

यत्र स्वयंवरे स्पर्धा लक्ष्मीकान्त्योः किलाभवत् ।
वेदाश्च केलिजल्पाश्च सौभ्रात्रं यत्र बिभ्रते ॥ ३६ ॥

(युग्मकम्)

पद्मचन्द्रमधुज्योत्स्नाविवादान्ध्येष्वनादिषु ।
देव! त्वद्वक्त्रबिम्बस्य स्मितस्य च किं[1]मुच्यताम् ॥ ३७ ॥

कस्तूरीतिलकामोदे ललाटे भ्रमरैर्वृते ।
देव! त्वद्भ्रूलताभृङ्गचमूः पाति मुखाम्बुजम् ॥ ३८ ॥

अष्टमीन्दुनिभस्यास्य ललाटाष्टापदस्य ते ।
यौवराज्यपदं देव! मुखेन्दुरनुमन्यताम् ॥ ३९ ॥

नाथ! धम्मिल्लभारेऽस्मिन् नानासौरभनिर्भरे ।
भृङ्गैर्लक्ष्मीकटाक्षाणां जृम्भतेऽतिमूर्धं मुधा ॥ ४० ॥

नाथ! त्वामेव मन्येऽहमचलं भुवनोन्नतम् ।
अनुल्लङ्घ्येव यन्मौलिं [2]छलादर्कोऽपि सेवते ॥ ४१ ॥

देव! त्वद्भक्तिरथवा त्वत्तोऽपि द्विगुणोन्नता ।
जितस्त्वमसि यद्राजा प्रह्लादेन रणेऽपि हि ॥ ४२ ॥

नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ४३ ॥

तदिदं त्वद्वपुर्देव! नीलं निर्वृतिमन्मयम् ।
कान्तिभूषाशताभोगकर्बुरं भातु मे मुहुः ॥ ४४ ॥

---

१ पद्मचन्द्रयोर्मधुज्योत्स्नयोश्चोत्कर्षाप्रतिष्ठानान्न किमपि वक्तुमर्हमुपानतये-ति भाव । २ नेत्रस्थानावस्थानव्याजादित्यर्थ । सेवनं च मौल्यनुल्लङ्घनपूर्वमिहोत्प्रेक्ष्यम्.

तत्त्वं परं किमपि यत् स्वरसावभासि
सान्द्रप्रमोदलहरीभरिताखिलाशम् ।
कैवल्यविग्रहमिदं तदनुग्रहार्थ-
मस्मादृशां जयति तादृगुपात्तमूर्त्ति ॥ ४५ ॥

अनुभवतममुं भृशं दृशावभिनवकौस्तुभमालयानया ।
भुवनविभुमभूतपूर्वया पुलकपरम्परया च भूषितम् ॥ ४६ ॥

श्रीकृष्णकेलिशुकवाङ्मयवीचिमाला—
लीलारसज्ञ(मकर)श्रवणाञ्चलस्य ।
देवस्य दिव्यहृदये हृदयङ्गमेयं
कण्ठस्थले च सुकृतां सुचिराय जीयात् ॥ ४७ ॥

इति श्रीकृष्णलीलाशुकमुनिविरचिता
सप्तचत्वारिंशत्सङ्ख्या
अभिनवकौस्तुभमाला
समाप्ता ।

१. अभिनवेति स्तुत्यर्थे नूतनार्थे च.

॥ श्रीः ॥

श्रीकृष्णलीलाशुकमुनिप्रणीतो

# दक्षिणामूर्तिस्तवः ।

दुर्वारगर्वभरदूरविजृम्भमाण-
मोहान्धकारपरिपाटनबद्धदीक्षः ।
शश्वद् भृशप्रविसरत्सहजप्रकाश-
कोशः प्रभुर्जयति कोऽपि वटस्थलीशः ॥ १ ॥

अग्नीन्दुभानुभिरशेषजगत्प्रकाशै-
रासादितं नयनभावमवेक्ष्य वेदाः ।
यद् वेदयन्ति महसां तमसां च दूरं
तद् दैवतं वटतटीदयितं भजामः ॥ २ ॥

कल्पद्रुमैरलममीभिरनीश्वराणा-
माराधनीयपदवीमधिगम्य रम्यैः ।
तेऽमी वयं परिवृतं परमेश्वरेण
तं वा वटं तमपि वा विभुमाश्रयामः ॥ ३ ॥

षड्वर्गदुर्गपरिलङ्घनकोपितेन
चित्तेन यत्र सुचिरं चपला मुनीन्द्राः ।
तच्छाम्भवं मधुरिमैकरसोर्मि धाम
श्रीमद्वटाश्रयमुपाश्रयितुं यतध्वम् ॥ ४ ॥

नृत्यन्ति यच्छिरसि नाकनदीप्रवाहा-
स्तद्भ्रातरश्च रसने वचसां प्रपञ्चाः ।
चित्ते दया चरणरेणुषु वाञ्छितार्थाः
पायादयं वटतटीदयितो विभुर्वः ॥ ५ ॥

इन्द्रादयो यदरुणाङ्घ्रिरजःकणेन
राज्यश्रियं त्रिभुवनैर्भृशमुद्वहन्ति ।
व्याघ्रत्वचा परिहितस्य हि तस्य भिक्षो-
र्व्याख्याश्रियं वटतटावसथस्य वन्दे ॥ ६ ॥

आम्नायवीचिसहचारिवचःप्रसारै-
रासारसारसरणीमधिरोहमाणैः ।
आसिच्य मानसमनन्यधियां मुनीना-
माद्यं वटं च विहरन् गिरिशोऽवताद् वः ॥ ७ ॥

मन्दस्मितेन च मनोहरमुद्रया च
व्याख्यानवीथिविभवैश्च विजृम्भमाणैः ।
आख्यायमाननिजतत्त्वरसानुभूति-
र्विश्वेश्वरो वटतटप्रकटोऽवताद्वः ॥ ८ ॥

ऊर्ध्वं दिवो भवमधश्च भुवो भवन्तं
तिर्यक् च पर्यवसिते भववैभवं तम् ।
गाढं कयापि कृपया वटवृक्षमूले
मन्मानसे च विहरन्तमनन्तमीडे ॥ ९ ॥

रक्ताङ्गुलीयुगळनर्त्तितचारुमुद्र
संसारवृक्षपरितक्षपरश्वधाढ्यम् ।

क्रीडागृहीतमृगलाञ्छनलाञ्छिताग्रं
हस्तेन जानुनिहितेन जगन्मनोज्ञम् ॥ १० ॥

तत्तत्फणामणिविभूषणभासुरेण
भाग्याधिकेन फणिना कृतयोगपट्टम् ।
वामेतराङ्घ्रितलकान्तिकरम्बितेन
वामोरुणा गिरिसुताहृदयं हरन्तम् ॥ ११ ॥

इन्दोः कलां खलु जटापटले वहन्तं
सर्वाः कला वचनवीथिषु चारयन्तम् ।
देव्या वृतं गिरिजया मुनिभिः शुकाद्यै-
स्तं विश्वतो विशदमादिगुरुं प्रपद्ये ॥ १२ ॥
(विशेषकम्)

त्रिभुवनसुभगेयं दक्षिणामूर्त्तिमूर्त्तौ
भगवति कृतभावा कृष्णलीलाशुकीया ।
जयतु जयतु देवी भारती जीवलोक-
श्रवणहृदयजिह्वाजन्म साफल्यमेतु ॥ १३ ॥

इति श्रीकृष्णलीलाशुकमुनिविरचितो
दक्षिणामूर्त्तिस्तवः
समाप्तः ॥

TRIVANDRUM SANSKRIT SERIES

NO III.

# NALABHYUDAYA

OF

## VÂMANA BHATTA BÂNA.

Edited with Notes

BY

T GANAPATI ŚÂSTRÎ

*Principal His Highness the Maharajah's Sanskrit College, Trivandrum*

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

TRIVANDRUM


PRINTED AT THE TRAVANCORE GOVERNMENT PRESS

1907

॥ श्रीः ॥

अनन्तशयनसंस्कृतग्रन्थावलिः.

ग्रन्थाङ्कः ३.



# नलाभ्युदयः.

महाकविवामनभट्टबाणकृतः.

अनन्तशयनस्थराजकीयसंस्कृतविद्यामन्दिराध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधित

लघुटिप्पण्या च संयोजित. ।




स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रायित्वा प्रकाशितः ।



कोळम्बाब्दाः १०८२, क्रैस्ताब्दाः १९०७.

The author of this poem can be inferred to be Vamana Bhatta Bàna from the statements "[illegible] नलाभ्युदये" at the end of each sarga We can safely say that this Vàmana Bhatta Bána is not different from Vàmana Bhatta Bana, the author of श्रृङ्गारभूषण, [illegible] and ‡ others, because all these works are written in the same clear, easy and sweet style The author tried to imitate the famous prose writer Bhatta Bàna in his art of prose-writing and as the result of his emulation was able to bring forward his prose-work called Vema Bhúpálacharita which gained him the title of Abhinava Bhatta Bàna He himself says, at the commencement of this Vema Bhûpàlacharita, thus —

"वागक्वीन्द्रादन्ये काणा खलु [illegible] ।
इति जगति रूढमयशो वत्सकुलो [illegible] मास्त्रि)" ॥

"कविरभिनवबाण काव्यमत्यद्भुतार्थं भुवनमाहितभूमा नायको वेमभूप ।
त्रिभुवनमहनीयख्यातिमानेप योग प्रकटयति न केपा पण्डिताना प्रहर्षम्" ॥

The following passage at the end of the same work

"सर्वोत्कर्पेण वर्त्तमान [illegible] विश्वविश्वम्भरापाल-
मौलिमालामकरन्दसुरभितचरणारविन्दो जयति विश्वाधिकविभवो वेमभूपाल"

makes it clear that the hero Vema [illegible] was alive when the work was being completed and therefore the author must be his contemporary This Vema Bhupala (also known as Vira Narayana) — son of † Pedakomati and grandson of Macha Vema's brother was well-versed in all arts and has written शृङ्गारदीपिका (अमरुकशतकव्याख्या) and सङ्गीतचिन्तामणि. He was also ruler of Trilinga Country The time of Anna Vema, son of Vema (Machi's brother,) is known to be the first half of the fifteenth century from a * Tamrasasana of the year

---

‡ रघुनाथचरित, शब्दरत्नाकर and शब्दचन्द्रिका.

† See the beginning of शृङ्गारदीपिका

* See inscription No 143, प्राचीनेलखमाला, Kavya Mala Series, Bombay.

1148 A D. and it is probable that the cousins, Anna Vema and Vema Bhupala might have lived about the same time Hence the probable date ot Vema Bhupāla and consequently that of our author is about the first half of the fifteenth century A D

The single palmleaf manuscript Copy of नलाभ्युदय written in Malayalam characters was obtained from H H the Maharajah's Palace Library It appears to be 100 years old and contains however only 8 sargas and three slokas in the 9th sarga No other manuscript copy can be had from anywhere But the procured manuscript copy being a correct one, the eight sargas are now published for the benefit of the Sanskrit Reading Public The slokas in the 9th sarga are the following —

"गते बहुतिंथे काले पर्णादो नाम बाडव ।
उपेत्य कुण्डिन भैमीं रहस्येतदभाषत ॥ १ ॥

अथ ग्रामेषु देशेषु वनषूपवनेषु च ।
नळमन्वेषमाणास्ते नाधिजग्मुर्द्विजातय ॥ २ ॥

दमयन्त्युदिता वाच जगदुस्तत्र तत्र ते ।
न कश्चिदपि सर्वस्या पृथिव्यामुत्तर ददौ ॥ ३ ॥"

# निवेदना।

इदं काव्य "वामनभट्टबाणकृते नलाभ्युदये" इति सर्गसमाप्तौ लेखनाद् **वामनभट्टबाणेन** प्रणीतमित्यवगम्यते। अय च **वामनभट्टबाणः शृङ्गारभूषण-पार्वतीपरि**णय-वेमभूपचरितादिग्रन्थकर्तुर्वामनभट्टबाणान्न भिन्न इति शक्य वक्तु, यतोऽस्मिन् काव्ये शृङ्गारभूषणादौ च प्रसादसौकुमार्यमाधुर्यसम्पदेकच्छायोपलभ्यते। अय कविर्गद्यरचनाया गद्यकविसम्राजा **श्रीभट्टबाणेना**पि सह गुणगृध्नुरस्पर्धत, स्पर्धागुण **चाभिनवभट्टबाण**विरुदलक्षण **वेमभूपालचरिता**ख्याया आख्यायिकाया निर्माणादलभत। एव ह्याख्यायिकाया आदावाह —

"**बाण**कवीन्द्रादन्ये काणा खलु सरसगद्यसरणीषु।
इति जगति रूढमयशो वत्सकुलो (वामनोऽधुना मार्ष्टि) ॥
कविर**भिनवबाणः** काव्यमत्यद्भुतार्थं भुवनमहितभूमा नायको **वेमभूपः**।
त्रिभुवनमहनीयख्यातिमानेष योग. प्रकटयति न केषा पण्डिताना प्रहर्षम्" ॥

इति। समाप्तौ च

"सर्वोत्कर्षेण वर्तमान· साक्षाल्लक्ष्मीसमुच्चार्यमाणजयशब्दो विश्वाविश्वम्भरापाल-
मौलिमालामकरन्दसुरभिचरणारविन्दो जयति विश्वाधिकविभवो **वेमभूपालः**॥"

इति **वेमभूपालस्य** वर्तमानताविष्कारादस्य कवेस्तद्भक्तस्य तत्समकालत्वमवसीयते। **वेमभूपालस्तु वीरनारायणापरनामा वेमाग्रजमाचपौत्र पेदकोमटिसूनु·**

१ आदिपदग्राह्य **रघुनाथचरितं शब्दरत्नाकरः**, **शब्दचन्द्रिका** च। **साहित्यचिन्तामणिर**पि कदाचिद् वामनभट्टस्य कृतिर्भवेत्। किन्तु तत्र परिच्छेदसमाप्तिषु " इति श्रीवीरनारायणीये साहित्यचिन्तामणावलङ्कारशास्त्रे परिच्छेद " इत्येव दृश्यते न तु कर्तृनाम। **वीरनारायणस्तु** न कर्ता भवितुमर्हति, यस्मात् स एवोदाहरणप्रसङ्गाद् भूयिष्ठमुपश्लोक्यते। **अन्नवेमोऽ**पि द्वित्रस्थलेषु तत्र स्तूयते।

२ "राज्य **वेमः** सुचिरमकरोत् प्राज्यहेमाद्रिदानो भूमीदेवैर्भुवमुरुभुजो भुक्तशेषामभुङ्क्त।
श्रीशैलाग्रात् प्रभवति पथि प्राप्तपातालगङ्गासोपानानि प्रमथपदवीमारुरुक्षुश्चकार ॥
**माच**क्षोणिपतिर्महेन्द्रविभवो **वेम**क्षितीशाग्रजो
हेमाद्रे सदृशो बभूव स गुणैस्तस्य त्रयो नन्दना.।
कीर्त्यां जाग्रति **रेड्डिपोत**नृपति **श्रीकोमटीन्द्रस्**ततो
**नाग**क्ष्मापतिरित्युपात्तवपुषो धर्मार्थकामा इव ॥
**वेमाधिपो माच**विभुश्च नन्दनौ **श्रीकोमटीन्द्रस्य** गुणैकसश्रयौ।
भूलोकमेकोदरजन्मवाञ्छया भूयोऽवतीर्णाविव रामलक्ष्मणौ ॥
स **वेमभूपः** सकलासु विद्यास्वतिप्रगल्भो जगदोब्बगण्ड।"

शृङ्गारदीपिका (अमरुकशतकव्याख्या)

[illegible] धिप·
कैस्ता[illegible] पूर्वार्धे स्थित, [illegible] नुजस्य वेमस्य
सूनु अन्नवेम· [illegible] १३७०शक [illegible] तदीयात् ताम्रशासनपत्राद्
ज्ञायते, [illegible] न तुल्यकालौ [illegible]।

अस्य काव्यस्य [illegible] मेकमेव
प्रतिरूप राजकीयग्रन्थश [illegible]। तदपि नवमसर्गतृतीयश्लोकावधिकम्।
तथापि तच्छुद्र पिपाठिषूपकारक्षम चेति कृत्वा तदाधारेणाष्टमसर्गान्तो भाग सम्प्रति
मुद्रयित्वा प्रकाशित ।

नमसर्गश्लोकाश्चैते —

“गते बहुतिथे काले पर्णादो नाम बाडव ।
प्रत्येत्य कुण्डिन भैमी [illegible] ॥ १ ॥
अथ ग्रामेषु देशेषु नगरेषु वनेषु च ।
[illegible] नाविजग्मुर्द्विजातय ॥ २ ॥
दमयन्त्युदिता वाच जगदुस्तत्र तत्र ते ।
न काश्चिदपि सर्वस्या पृथिव्यामुत्तर ददौ ॥”

१९०७-३-३०.
अनन्तशयनम्.

त. गणपतिशास्त्री.

१ एतच्च काव्यमालान्तर्गताया [illegible] १४३ तम शासनपत्रम्। तत्रैव लिखित—
‘सोपानानि विधाय वेमनृपति [illegible]
स्तम्भत्व निजधर्मशासननिवे श्रीशैलमेवानयत्” ।
वीरश्रीपति[illegible]चोतनपतिर्वेमक्षितीशात्मज ” ।
‘तस्यानुजन्मा [illegible] कीर्तिप्रियो भूपतिरन्नवेम ” ॥
“शाकाब्दे गगना[illegible](१३७०)गणिते [illegible]संवत्सरे
माघे कृष्णचतुर्दशीशिवतिथौ वीरान्नवेमप्रभु ।
प्रादादिम्मडिलक्कसञ्ज्ञमतुल कृत्वाग्रहारोत्तम
ग्राम लोहितगोत्रजाय विदुषे श्रीइम्मडीन्द्राय स ” ॥

॥ श्रीः ॥

## महाकविवामनभ[illegible]कृतो

# नलाभ्युदयः ।

## प्रथमः सर्गः ।

श्रीमान् नलो नाम गुणैः प्रतीतो निधि कलाना निषधेषु राजा ।
अष्टादशद्वीपवतीमशेषामधत्त गाम[illegible] ॥ १ ॥

शृङ्गाणि मेरोरवगाहमाना सहस्रधा भूवलयेऽवतीर्णा ।
यत्कीर्त्तिरापूरितभोगिलोका गङ्गेव लोकानखिलान् पुनीते ॥ २ ॥

तपत्यपि स्वैरमरातिवर्गैः प्रतापवह्नौ सुतरामसह्ये ।
पयस्समुद्रानुकृति दधानैर्यशोभिराप्यायत यस्य भूमिः ॥ ३ ॥

बाहू तरू यस्य समाश्रयन्ती प्राणा[illegible] रिपूणाम् ।
अधत्त निर्मोकवती यशोभि क्रौर्यं भुजङ्गीव [illegible]पाणवल्ली ॥ ४ ॥

यत्खड्गवल्ली रणरङ्गभूमौ वितन्वती [illegible]ाम् ।
दृष्ट्वेव सङ्घर्षमुपेयिवद्भिः प्रत्यर्थिना ताण्डवित कबन्धै. ॥ ५ ॥

यात्रासु नासीरतुरङ्गनुन्न रजो विसर्पत् ककुभा मुखेषु ।
यस्यारिनारीनयनाद् भवन्त्याः कादम्बिनी कापि बभूव वृष्टेः ॥ ६ ॥

अनीयतानन्यचिकित्सनीयो भुजापदा[illegible]र्वेदीयः ।
प्रत्यर्थिशुद्धान्तविलोचनानामम्भस्सिरामोक्षत एव शान्तिम् ॥ ७ ॥

यस्यानिशं प्रज्वलत. स्फुरन्त्या प्रताप[illegible] शिखयावलीढ ।
द्विषां यशश्शाल्मलितूलराशिर्मलीनसा प्राप्य दशां व्यरसीत् ॥ ८ ॥

रणक्षितौ धन्विनि यत्र रोषाज्ज्यामायतां कर्षति कार्मुकस्य ।
पलायत ज्यामखिलां[1] विमुच्य पर्यस्तधैर्यः परिपन्थिलोक. ॥ ९ ॥

भीताः परे भूपतयो दिशन्ति महीलवं भूपतये परस्मै ।
क्रुद्धोऽपि यः स्म द्विषतां कुलाय स्वाराज्यम[illegible]ाहतमाशु दत्ते ॥ १० ॥

---

१. ज्या भूमि मौर्वी च.

स वीरसेनस्य महीतलेन्दोस्तप ... ।
कुलेन शीलेन गुणेन धाम्ना पुरा पुरो ... मानमागात् ॥ ११ ॥
एकेन तस्यातपवारणेनच्छायावतो ... ।
एतत्तु चित्रं यदमुष्य नित्यं प्रत्यर्थिना ... वर्गः ॥ १२ ॥
क्षेमङ्करे तस्य करे जगत्याः ससर्ज वृष्टिं समये विधाता ।
रराज सस्याभरणा धरित्री प्रजाश्च ... भूवन् ॥ १३ ॥
नचाश्विनौ नापि च पुष्पबाणं न चापि साक्षादरविन्दनाभम् ।
सुजातमूर्तेर्निषधाधिपस्य रूप... ॥ १४ ॥
सतीषु विद्यासु स शिक्षितासु ... हृदयेऽभिमेने ।
जगत्प्रबोधाभिरतस्य ... एव ॥ १५ ॥
विनीतबाल्यः श्रुतवृद्धयोगात् स पार्थिवश्री ... ।
करग्रहात् पार्थिवकन्यकानां प्रागेव जग्राह कर धरित्र्या ॥ १६ ॥
तदा प्रणेतुः क्रथकैशिकानां भीमस्य राज्ञो ... ।
संन्यस्तपद्मा कमलेव कन्या वयो जगन्मोहनमाससाद ॥ १७ ॥
दिने दिने लङ्घितमुग्धभावं ... ।
विभक्तसर्वावयवं वराङ्ग्या ... ॥ १८ ॥
दधौ शरत्पङ्कजिनीव काश्चिदङ्गेन सा कान्तिमगल्भकेशी ।
आमोदनिष्यन्दि मुखाब्जमस्या नेत्रद्विरेफैरभिपेयमासीत् ॥ १९ ॥
आयामिनोर्लोचनयोरमुष्या विलास... ।
अध्यापयामासुरवन्ध्यपातं मनोभुवः पञ्च शरान् प्रतीतान् ॥ २० ॥
विहारभूमिः कमनीयताया व्यानद्धमुक्ताभरणो बभार ।
कण्ठस्तदीयः सविधप्रसूतमुक्तामणेः कम्बुनिधेरभिख्याम् ॥ २१ ॥
स्वभावतः पाटलपाणिपद्मं बाह्वोर्युगं कोमलमायता... ।
अग्रप्रदेशाहितहल्लकाया श्रियं दधौ चम्पकमालिकायाः ॥ २२ ॥
अचोरि नूनं कलशैर्विमूढैः सन्नाहिनी तत्कुचकुम्भशोभा ।
अतः क्रियन्ते जनताभिरेषामद्यापि कण्ठे गुणबन्धनानि ॥ २३ ॥

---

१ करः पाणि राजभाग च  २ सन्न्यस्तपद्मा त्यक्तकमला.  ३ हल्लकं रक्तकल्हारम्.

तमोमषीरञ्जितयेव तस्या मध्ये मनस्तूलिकया मनोभूः ।
संमोहनी रोमलताच्छलेन लिलेख मन्त्राक्षरपङ्क्तिमेव ॥ २४ ॥
उवाह तस्याः परिणाह[illegible]हितो नितम्बः ।
नक्षत्रमालापरिवेषशोभिसमुन्नतैरावतकुम्भलक्ष्मीम् ॥ २५ ॥
न केवलं सोरुयुगस्य कान्त्या जिगाय रम्भामुपमानभूताम् ।
अदृष्टपूर्वेण ज[illegible]ऽपि रूपेण रम्भामपि [illegible]म् ॥ २६ ॥
अनङ्गवीरस्य निषङ्गशोभा विजिष्णु [illegible] तस्याः ।
सादृश्यमूरुद्वयका[illegible] शफरद्वयेन ॥ २७ ॥
रागाम्बुराशेर्नवविद्रु[illegible] पादाम्बुज [illegible] ।
विनापि लाक्षारसरञ्जने[illegible] ॥ २८ ॥
हंसीगतिप्रक्रमचातुरी[illegible] ।
विलासमन्दालसचङ्क्रमाणि [illegible]ानि गतानि तस्याः ॥ २९ ॥
सा तेन तन्वी सुभगा प्रकृत्या [illegible] भृश चकाशे ।
स्वभावतश्चूतलता[illegible]मा [illegible] किमुत प्रसूनैः ॥ ३० ॥
शुद्धान्तवर्तिन्यपि राजपुत्री [illegible] रूढा [illegible]ख्या ।
गुप्तापि कर्पूरमयी शलाका सम्यक् प्रतीयेत हि सौरभेण ॥ ३१ ॥
कथाप्रसङ्गेन सखीभिरुक्तान् प्र[illegible]मानान् बहुशो जनेन ।
अङ्गैरुदञ्चत्पुलकैरजस्र नल[illegible]य शुश्राव गुणान् नताङ्गी ॥ ३२ ॥
तद्रूपविद्भिर्लिखितोपनीतं [illegible] निहित विविक्ते ।
प्रहर्षविष्फारितलोचना सा [illegible] बाला ॥ ३३ ॥
पित्रोर्मिथश्चिन्तयतोरमुष्या वरं सरूप क लभेमहीति ।
लज्जावती सा पुलकैरगोप्यैरनक्षर कौतुकमाचचक्षे ॥ ३४ ॥
अनन्यसाधारणरूपलक्ष्मीमनङ्गकीर्तेरधिदेवतां ताम् ।
नलोऽपि लोकाद् गदतोऽनुवेल शुश्राव सर्गातिशय विधातु ॥ ३५ ॥
यदा विदर्भाधिपतेस्तनूजां शुश्राव सौन्दर्यनिधिं नरेन्द्र ।
तदैव चेतोमुकुरे नतभ्रूरनूदमुष्य प्रतिबिम्बितेव ॥ ३६ ॥

---

१ 'शृङ्गारो गजमण्डन । स्यासको नक्षत्रमाला' इति यादव २ वर्णयितु शक्यानि

अन्योन्यमेवं कुलशीलरूपगुणैस्तयोः कर्णपथं प्रयातैः ।
सन्दर्शनादप्यधिको बभूव चित्ते गरीयानभिलाषबन्धः ॥ ३७ ॥

स कुण्डिनाख्यं नगरं पुरेषु देशेषु तानेव विदर्भसंज्ञान्[1] ।
भीमं नृपालेषु विनैव हेतुं पुरो जनानां प्रशशंस भूयः ॥ ३८ ॥

न सल्लँलापाभिमतैर्वयस्यैः सङ्गीतगोष्ठीमपि नाबबन्ध ।
अमात्यनिक्षिप्तभरोऽनुतष्ठौ स केवलं मन्मथशासनानि ॥ ३९ ॥

रहस्तु तत्पूर्वमवाञ्छितेभ्यो नृपः सखिभ्योऽपि जुगोप भावम्[2] ।
अहेतुकं तद्वपुषि प्रसर्पन्नापाण्डिमा [illegible] ॥ ४० ॥

उत्कण्ठया तां प्रति राजकन्यां सन्तप्यमानं निषधाधिनाथम् ।
आकर्णमाकृष्य जघान मुक्तै [illegible] शरैर्मनोभूः ॥ ४१ ॥

मर्माविधां मन्मथसायकानां [illegible] स भीमपुत्र्याः ।
सङ्कल्पसिद्धेषु समागमेषु बभार [illegible]मयं तनुत्रम् ॥ ४२ ॥

सुगन्धिसौगन्धिकदामयुक्तं सिक्तं जलैः सेवितमन्दवातम् ।
आरुह्य सौधं निशि तापशान्त्यै न निर्ववौ चन्द्रमसो मयूखैः ॥ ४३ ॥

प्रत्यूषशेषासु विभावरीषु कथञ्चिदामुद्रितलोचनान्तः ।
रुतेन तारेण विबोध्यमानः स विव्यथे पञ्जरशारिकाणाम् ॥ ४४ ॥

अथारतिं तामपनेतुकामः स पञ्चषैरेव समं वयस्यैः ।
अतर्कयन् प्रत्युत तापहेतुमगाहतोद्यानभुवं नरेन्द्रः ॥ ४५ ॥

अनुप्रवालं ग्रथितप्रसूनानानर्तिताग्रान् मृदुनानिलेन ।
स षट्पदव्याकुलितोपशल्यान् [illegible]गुल्मानतरूनपश्यत् ॥ ४६ ॥

मज्जन् मधुस्रोतसि *माधवीनागुद्रुधिरानार्तितबालचूतः ।
वनश्रियो निश्वसितानुकारी नलस्य धैर्यं मरुदाचचाम ॥ ४७ ॥

निलीयमाना कुसुमेष्वलीनां पङ्क्तिर्विनीलाञ्जनबिन्दुनीला ।
उत्पादयामास नलस्य चित्ते कन्दर्पगन्धद्विपदानशङ्काम् ॥ ४८ ॥

---

१ तान् देशान् । बहुवचनमवयवबहुत्वारोपात् । २ तत्पूर्वमिति गोपनक्रियाविशेषणम् । इदम्प्रथममित्यर्थः । * मालतीनामिति पाठान्तरम् ।

वनक्षितावुत्किरतः परागं च्योतन्मधुस्यन्दमदोदकस्य ।
भृङ्गावली सा सुरभिद्विपस्य चस्खाल कालागमशृङ्गे ॥ ४९ ॥
ततो वसन्तागमसूचकेन किञ्चित्समुन्मीलितपञ्चमेन ।
सुप्तश्चिरं चेतसि तस्य कामः प्राबोधि पुंस्कोकिलकूजितेन ॥ ५० ॥
पुष्यत्प्रवालाः प्रथितप्रसूना वसन्तसम्पादितलब्धशोभा ।
उद्यानवृक्षा विरहार्तिभाजस्तस्य क्षतक्षारसमा बभूवुः ॥ ५१ ॥
तत्राप्यलब्ध्वा स्मरतापशान्ति सञ्जातशैत्य जलमारुतेन ।
किमप्यसौ केलिसरःप्रतीरे नृपो लतामण्डपमाससाद ॥ ५२ ॥
मनोभवोद्दीपनकेलिदक्षे सङ्केतभूमौ रमणीयतायाः ।
लतागृहे तत्र निषेदुषोऽस्य चिन्ता विदर्भैकमुखी बभूव ॥ ५३ ॥
कदा नु वित्रस्तकुरङ्गनेत्रा तन्वी विदर्भान्वयदीपलेखा ।
कृतार्थयेदस्य जनस्य नेत्रे केनापि पुण्येन पुराकृतेन ॥ ५४ ॥
आहोस्विदस्मिन् सुतरामसह्ये विधाय मा वस्तुनि बद्धभावम् ।
अपूर्ववैचित्र्यविधानशिल्पी स केवल क्रीडति किन्नु वेधा ॥ ५५ ॥
पृच्छेम वा दूतमुखेन भीम कन्या खलु स्व परकीयमेव ।
चित्ते तदीये कुलशीलरूपैः को नाम धन्योऽभिमतो वरोऽस्या ॥ ५६ ॥
अयं च निर्हेतुकमार्यवृत्तिरर्थं भविष्यन्तमिवाधिगन्ता ।
सप्रत्यय शंसति मे वराङ्ग्याः सम्बन्धमागामिनमन्तरात्मा ॥ ५७ ॥
यद्वा विकल्पः क्रियते किमस्मिन् यः स्वेच्छया विश्वमिदं विधत्ते ।
स एव कुर्याद्विधिरानुकूल्यं तस्याश्च मे सङ्घटना यदि स्यात् ॥ ५८ ॥

इति बहुविधचिन्तादूरकृष्टान्तरात्मा
नृपतिरतिगभीरां चित्तवृत्ति निगुह्य ।
अरमत स वयस्यैः कौतुकेनाभिपश्यन्
मधुसमयसमुत्था काननोपान्तलक्ष्मीम् ॥ ५९ ॥

इति वामनभट्टबाणकृतौ नळाभ्युदये
प्रथम सर्ग ।

## अथ द्वितीयः सर्गः ।

अथ तत्र यदृच्छयोपयातान् पुनना तेषु विहारकौतुकेन ।
अभिरामतनूनदृष्टपूर्वान् मदनार्तः स ददर्श [illegible] ॥ १ ॥
मदशालिविलासिनीसलील[illegible] विधातुम् ।
सहजेन विलासमन्थरेण क्रमणेनेव मुहु कृताभिलाषान् ॥ २ ॥
वपुषा शरदिन्दुबिम्बकान्तिं हसतो [illegible] ।
कळमञ्जुगिरा मनोज्ञचञ्चूचरणोदञ्चितचारुपाटलिम्नः ॥ ३ ॥
उपसृत्य सचाटुकारमाराद् [illegible] गरुद्भिः ।
ददतो निजचञ्चुभिः प्रियाभ्यः [illegible] ॥ ४ ॥
(कलापकम्)

चरतो गतसाध्वसं प्रियाभिः [illegible] ।
अवलोकयतोऽस्य तान् विहङ्गान् विवशश्चेतसि विस्मयेन चक्रे ॥ ५ ॥
चरतां सविधे विहङ्गमानां नृपतिः कञ्चन कौतुकेन नुन्नः ।
शनकैरुपगम्य निश्चलाङ्गः शरदम्भोज[illegible] करेण ॥ ६ ॥
ललिताङ्गुलिपत्रशोभमाने निषधाधीशकराम्बुजे निषीदन् ।
स जगाद मनुष्यवत् प्रगल्भ वचसा प्र[illegible] ॥ ७ ॥
अवनीतलवर्तिनां त्वमेकः [illegible] मना वरेण्य ।
निषधाधिपते! यथा तथास्मान् विहगान् विद्धि [illegible]तान् ॥
विकसत्कनकारविन्दजि[illegible] ।
वयमुत्पलिनीपलाश[illegible] ॥ ९ ॥
दिवि वा भुवि वा रसातले वा [illegible] विहर्तुमीशा ।
कमलासनवाहनोत्तम [illegible] हसम् ॥ १० ॥
महता कुतुकेन जातु सर्वे [illegible] विवानुकाना ।
व्यचराम सकाननां सशैला ससमुद्रा सपुरा [illegible] गाम् ॥ ११ ॥
अपि च क्रथकैशिकेषु कन्या दमयन्तीति नृपस्य भीमनाम्नः ।
कमलासनसर्गचातुरीणां प्रथमोदाहरण मया व्यलोकि ॥ १२ ॥

विपुलं जघने कृशं विलग्ने [illegible] ।
नवयौवनसंधि[illegible] [illegible]पुषेण [illegible] ॥ १३ ॥

कमलप्रमुख यदस्ति भूतावु[illegible] [illegible] ।
तदवैमि विदर्भराजपुत्रीतनु[illegible] [illegible] ॥ १४ ॥

भुवनत्रितयेऽपि दुर्लभेन [illegible] ।
उपमानविवर्जितेन बाला वपुषा [illegible]ष्विषु वर्तते वधूनाम् ॥ १५ ॥

बहुना किमतीव भूतलेऽस्मिन् द्वितय [illegible] ।
पुरुषेषु भवानुदारमूर्तिर्दमय[illegible] म[illegible] [illegible]रूपा ॥ १६ ॥

कुलशीलवयोवपुर्गुणैर्वा दधता साधु प[illegible] परेण साम्यम् ।
यदि सङ्घटना महीपते! स्यात् फलित [illegible] कौशलेन ॥ १७ ॥

अधुनैव विमुञ्च मा व्रजामो वयमद्यैव विहायसा विदर्भान् ।
भवते गदिता यथा मया सा निगदिष्यामि तथा भवन्तमस्यै ॥ १८ ॥

तव रूपगुणाश्च तत्र गत्वा [illegible] जगत्यदृष्टपूर्वान् ।
रचयिष्यति सा यथा मृगाक्षी मनसा त्वय्यनुरागबन्धमुच्चैः ॥ १९ ॥

इति वाचमुदीर्य राजहंसे विरते तं निजगाद राजहंसः ।
मधुराक्षरया गिरा नि[illegible] [illegible] कर्णरन्ध्रे ॥ २० ॥

शृणु हंस! भवन्[illegible] यदद् विस्मयनीयतागुणेन ।
विधिना पुनरानुकूल्य[illegible] तदिदं सम्प्रति सख्यहेतुरासीत् ॥ २१ ॥

वपुषा कथितः कुलस्य भूमा वपुषा सूचितमात्मनो विभुत्वम् ।
मदभीप्सितसाधनोद्यमेन प्रतिभिन्ना च परोपकारमुद्रा ॥ २२ ॥

प्रभुरेव भवान् प्रशंसया मे रुचिमुत्पादयितुं विदर्भजायाः ।
न तु वस्तुगुणः करोति किञ्चित् कुरुते वक्तृगुणो हि कार्यसिद्धिम् ॥ २३ ॥

विहगाधिप! जायते जगत्यामिह केषाञ्चिदुदारमानसानाम् ।
अनपेक्ष्य पुरातनोपकारानुपकारेषु समुद्यमः परेषाम् ॥ २४ ॥

अधुनैव सखे! प्रयाहि शीघ्रं मम वाञ्छापरिपूरणं विधातुम् ।
न विलम्बनमन्तरा विधेयं भवतेति क्षितिपो मुमोच हंसम् ॥ २५ ॥

अथ ते वियदध्वना प्रयातुं द्रुतमुच्चैरुदयुञ्जत द्विजेन्द्राः ।
गरुदञ्चलजातरूपभाभिर्हरिदन्तानपिलान् दिशङ्गयन्त ॥ २६ ॥
व्यतिलङ्घ्य बहून् क्रमेण देशान् नि [illegible] गुणाननुस्मरन्तः ।
क्रथकैशिकभूषणायमानं विहगास्तत् पुरमापुरुत्पताकम् ॥ २७ ॥
परिखापरिवेषशालि यस्मिन् वियदाभोगविलङ्घि सालचक्रम् ।
परिविष्टमुदन्वता परस्तादवनि [illegible] रमन्यमन्वयासीत् ॥ २८ ॥
रजनीष्वपि पद्मरागरत्नप्रभया यत्र दिनेषु निर्मितेषु ।
दिवसेषु विकल्पयाम्बभूवे रजनीनां ततिरिन्द्रनीलभासा ॥ २९ ॥
मणिमन्दिरभित्तिबिम्बिताङ्ग्यो रमणैर्यत्र हृतांशुका नवोढाः ।
वनिताः पुनरन्यभित्तिबिम्बत्रपया मीलितलोचना बभूवुः ॥ ३० ॥
निशि यत्र मुदा विहारिणीनां [illegible] सापराधः ।
पतति स्म पदेषु कामिनीनां मणिसौधप्रतिबिम्बितो मृगाङ्कः ॥ ३१ ॥
रतिखेदजुषः शिरोगृहेषु प्रमदा यत्र सखीव दिव्यगङ्गा ।
प्रतिबोधयितुं पयःकणार्द्रं विधुनोति स्म तरङ्गतालवृन्तम् ॥ ३२ ॥
मदनः परिमुच्य यत्र चाप मधुरं सौरभशालिनश्च बाणान् ।
प्रतिसंहितसायकं वितेने धनुरक्षि भ्रुवमेव कामिनीनाम् ॥ ३३ ॥
अधिरुह्य निशासु चन्द्रशालाः प्रमदा यत्र समीपभाजमिन्दुम् ।
विदधुर्नयनाञ्जनस्य शेषैर्वदनौपम्यरुपा कलङ्किताङ्गम् ॥ ३४ ॥
मृदुना पवनेन केतनानां तरला यत्र नभोलिहः पताकाः ।
प्रथिमानमुपेयुषीं सुराणामुदयच्छन्त पुराश्रियं प्रमार्ष्टुम् ॥ ३५ ॥
विविशुस्तदनु प्रमोदभाज पुरकान्त्या हृतलोचना विहङ्गाः ।
नगरोपवनं विदर्भनेतुर्नयनानन्दनिदानमाननांसाः ॥ ३६ ॥
अथ तत्र रुचा विडम्बयन्तीं परिवीतां श्रियमप्सरोगणेन ।
अनुरूपसखीजनैरुपेतां दमयन्तीं ददृशुर्विहङ्गमास्ते ॥ ३७ ॥
सहसा नभसोऽवतीर्य हंसाः पुरतस्ते च विचेरुरङ्गनानाम् ।
ग्रहणाय सकौतुकाः स्त्रियस्ताः प्रतिहंसं च सलीलमन्वधावन् ॥ ३८ ॥
अनुरागमनङ्कुरं विधातुं प्रतिपन्नः किल यो नलस्य दौत्यम् ।
स जगाद विदर्भराजपुत्रीमनुकूलामनुकूलवाग् विहङ्गः ॥ ३९ ॥

## द्वितीयः सर्गः ।

शृणु सुन्दरि! सोऽहमभ्युपागा भवतीं बोधयितुं नलोपकण्ठात् ।
अवतंसयितुं वचो मदीयं श्रवसोरसि यद्गुणानुरक्ता ॥ ४० ॥
भुवनत्रितयेऽपि सञ्चरन्तः परिदृष्टाखिलरम्यवस्तुजाताः ।
नलिनाक्षि! वयं नलेन तुल्यं पुरुषं कञ्चन नावलोकयाम ॥ ४१ ॥
न तथा सुभगे नवाम्बुवाहे न तथा पार्वणशर्वरीसहाये ।
अवलोकयतां दृशः प्रमोदादनुरज्यन्ति यथा नलस्य मूर्तौ ॥ ४२ ॥
ब्रुवते मदनं च तं च सम्यग्विदिताशेषपदार्थतारतम्याः ।
भुवनस्पृहणीयरूपसम्पद्व्यवहारादधमर्णमुत्तमर्णम् ॥ ४३ ॥
वपुषा वयसा नवेन कान्त्या विनयौदार्यमुखैर्गुणैश्च तैस्तैः ।
निषधाधिपतेस्त्वमेव तुल्या त्रिषु लोकेषु तवैष एव तुल्यः ॥ ४४ ॥
तडिदम्बुधरं यथा समेता सहकारं च वसन्तवासरश्रीः ।
भवती च नलं समानरूपश्रियमासाद्य तथैव दर्शनीया ॥ ४५ ॥
नलमेव पतिं स्वयं वृणीथा इति ते वक्तुमुपागमं त्वदङ्कम् ।
निरुपाधिकमेव साधुलोको यतते सङ्घटनाय साम्यभाजोः ॥ ४६ ॥
अथ तं निजगाद राजपुत्री पतगाधीश! परोपकारशालिन्! ।
निषधाधिपतेर्ममेव तस्य क्रियतां सूनृतया गिरोपदेशः ॥ ४७ ॥
प्रतिगृह्य वचस्तथेति तस्याः प्रतिजग्मुर्विहगाः खमुत्पतन्तः ।
नयनं हृदयं च राजपुत्र्याः सह सन्देशगिरा समानयन्तः ॥ ४८ ॥

ते देहकान्तिधवलीकृतदिग्विभागा
नैजागमोत्सुकनरेन्द्रविलोक्यमानाः ।
सौराज्यपक्ष्मलितसम्पदमुत्पताका-
मापुः क्षणेन निषधाधिपराजधानीम् ॥ ४९ ॥

उपवनतले दृष्टा भैमी मया ससखीजना
तदनु कथितत्वत्सौभाग्या जगाम परां मुदम् ।
कमलनयनस्त्वं सा लक्ष्मीर्विदर्भपतेः सुता
स्फुटमिति वदन् यूथैः सार्धं ययौ स यथागतम् ॥ ५० ॥

**इति वामनभट्टबाणकृते नळाभ्युदये**
द्वितीयः सर्गः ।

---

अथ ते वियदध्वना प्रयातुं द्रुतमुच्चैरुदयुञ्जत द्विजेन्द्राः ।
गरुदञ्चलजातरूपभाभिर्हरिदन्तानिलान् पिशङ्गयन्तः ॥ २६ ॥

व्यतिलङ्घ्य बहून् क्रमेण देशान् निषधाधीशगुणाननुस्मरन्तः ।
क्रथकैशिकभूषणायमानं विहगास्तत् पुरमापुरुत्पताकम् ॥ २७ ॥

परिखापरिवेषशालि यस्मिन् वियदाभोगविलङ्घि सालचक्रम् ।
परिविष्टमुदन्वता [illegible] व्यतीत् ॥ २८ ॥

रजनीष्वपि पद्मरागरत्नप्रभया यत्र दिनेषु निर्मितेषु ।
दिवसेषु विकल्पयाम्बभूवे रजनीना ततिरिन्द्रनीलभासा ॥ २९ ॥

मणिमन्दिरभित्तिबिम्बिताङ्ग्यो रमणैर्यत्र हृतांशुका नवोढाः ।
वनिताः पुनरन्यभित्तिबिम्बत्रपया मीलितलोचना बभूवुः ॥ ३० ॥

निशि यत्र मुदा विहारिणीना मुखसाम्यस्पृहयेव सापराधः ।
पतति स्म पदेषु कामिनीनां मणिसौधप्रतिबिम्बितो मृगाङ्कः ॥ ३१ ॥

रतिखेदजुषः शिरोगृहेषु प्रमदा यत्र सखीव दिव्यगङ्गा ।
प्रतिबोधयितु पयःकणार्द्रं विधुनोति स्म तरङ्गतालवृन्तम् ॥ ३२ ॥

मदनः परिमुच्य यत्र चापं [illegible]धुर सौरभशालिनश्च बाणान् ।
प्रतिसंहितसायकं विसेने [illegible]वेव कामिनीनाम् ॥ ३३ ॥

अधिरुह्य निशासु चन्द्र[illegible] प्रमदा यत्र समीपभाजमिन्दुम् ।
विदधुर्नयनाञ्जनस्य [illegible] कलङ्किताङ्गम् ॥ ३४ ॥

मृदुना पवनेन केतनानां तरला यत्र नभोलिहः पताकाः ।
प्रथिमानमुपेयुषीं सुरा[illegible] पुराश्रियं प्रमार्ष्टुम् ॥ ३५ ॥

विविशुस्तदनु प्रमोदभाजः पुरकान्त्या हृतलोचना विहङ्गाः ।
नगरोपवनं विदर्भनेतुर्नयना[illegible]नमानतांसाः ॥ ३६ ॥

अथ तत्र रुचा विडम्बयन्ती परिवीतां श्रियमप्सरोगणेन ।
अनुरूपसखीजनैर्वृतां दमयन्ती ददृशुर्विहङ्गमास्ते ॥ ३७ ॥

सहसा नभसोऽवतीर्य हंसाः पुरतस्ते च [illegible]रङ्गनानाम् ।
ग्रहणाय सकौतुकाः स्त्रियस्ताः प्रतिहंसं च सलीलमन्वधावन् ॥ ३८ ॥

अनुरागमनङ्कुरं विधातुं प्रतिपन्नः किल यो नलस्य दौत्यम् ।
स जगाद विदर्भराजपुत्रीमनुकूलामनुकूलवाग् विहङ्गः ॥ ३९ ॥

शृणु सुन्दरि! सोऽहमभ्युपागां भवतीं बोधयितु नलोपकण्ठात् ।
अवतंसयितुं वचो मदीयं श्रवसोरसि यद्गुणानुरक्ता ॥ ४० ॥
भुवनत्रितयेऽपि सञ्चरन्तः परिदृष्टाखिलरम्यवस्तुजाताः ।
नलिनाक्षि! वयं नलेन तुल्यं पुरुषं कञ्चन नावलोकयाम ॥ ४१ ॥
न तथा सुभगे नवाम्बुवाहे न तथा पार्वणशर्वरीसहाये ।
अवलोकयतां दृशः प्रमोदादनुरज्यन्ति यथा नलस्य मूर्तौ ॥ ४२ ॥
ब्रुवते मदनं च तं च सम्यग्विदिताशेषपदार्थतारतम्याः ।
भुवनस्पृहणीयरूपसम्पद्व्यवहाराद्धमर्णमुत्तमर्णम् ॥ ४३ ॥
वपुषा वयसा नवेन कान्त्या विनयौदार्यमुखैर्गुणैश्च तैस्तैः ।
निषधाधिपतेस्त्वमेव तुल्या त्रिषु लोकेषु तवैष एव तुल्यः ॥ ४४ ॥
तटिदम्बुधरं यथा समेता सहकारं च वसन्तवासरश्रीः ।
भवती च नलं समानरूपश्रियमासाद्य तथैव दर्शनीया ॥ ४५ ॥
नलमेव पतिं स्वयं वृणीथा इति ते वक्तुमुपागमं त्वदङ्कम् ।
निरुपाधिकमेव साधुलोको यतते सङ्घटनाय साम्यभाजोः ॥ ४६ ॥
अथ तं निजगाद राजपुत्री पतगाधीश! परोपकारशालिन्! ।
निषधाधिपतेर्ममेव तस्य क्रियतां सूनृतया गिरोपदेशः ॥ ४७ ॥
प्रतिगृह्य वचस्तथेति तस्याः प्रतिजग्मुर्विहगाः खमुत्पतन्तः ।
नयनं हृदयं च राजपुत्र्याः सह सन्देशगिरा समानयन्तः ॥ ४८ ॥

ते देहकान्तिधवलीकृतदिग्विभागा
नैजागमोत्सुकनरेन्द्रविलोक्यमानाः ।
सौराज्यपक्ष्मलितसम्पदमुत्पताका-
मापुः क्षणेन निषधाधिपराजधानीम् ॥ ४९ ॥

उपवनतले दृष्टा भैमी मया ससखीजना
तदनु कथितत्वत्सौभाग्या जगाम परां मुदम् ।
कमलनयनस्त्वं सा लक्ष्मीर्विदर्भपतेः सुता
स्फुटमिति वदन् यूथैः सार्धं ययौ स यथागतम् ॥ ५० ॥

**इति वामनभट्टबाणकृते नळाभ्युदये**

द्वितीयः सर्गः ।

## अथ तृतीयः सर्गः ।

राजहंसमुखतो निशम्य सा नैषधस्य गुणरूपसम्पदम् ।
शातमार्गणगणेन धन्विना मन्मथेन दमयन्त्यविध्यत ॥ १ ॥

सा निवेश्य करपल्लवोदरे साचि गण्डफलकं चलालकम् ।
साञ्जनाश्रुजलबिन्दुवर्षिणी पाणिना विलिखति स्म भूतलम् ॥ २ ॥

चन्दनाम्बुकणसेकशीतलं तालवृन्तपवनं तलोदरी ।
नान्वमन्यत सखीसमर्पितं मेति पाणिकमलेन रुन्धती ॥ ३ ॥

कामदोर्विजयकाहलोपमैः कर्णरञ्जनकलाविचक्षणैः ।
सा प्रहृष्टपरपुष्टपञ्चमैः शल्यवेधसदृशीं व्यथां दधे ॥ ४ ॥

कालकूटसहजन्मता त्वया चन्द्र! मय्यतितरां प्रदर्श्यते ।
इत्युपालभत तापमापुषी सा हिमांशुमपि लोकनन्दनम् ॥ ५ ॥

हारदाम करिकुम्भतुङ्गयोस्तारहारि कुचयोः समर्पितम् ।
अस्फुटद्दरतनोरनुक्षणं मन्मथज्वरविजृम्भिगोष्मणा ॥ ६ ॥

तापशान्तिमपदिश्य पद्मिनीपत्रक्लृप्तशयनीयमण्डलम् ।
शोषयन्त्यनुकलं विवर्तनैः सा सखीजनमखेदयन्मुहुः ॥ ७ ॥

मूर्च्छितेव मुषितेव तस्थुषी सा नलं प्रति गतेन चेतसा ।
भ्रूनिदेशचलनेन केवलं व्यादिदेश परिचारिकाजनम् ॥ ८ ॥

नैषधस्य गुणरूपवर्णनैः सा कथञ्चन दिनान्यवाहयत् ।
निद्रया विरहिता विभावरीं कल्पकोटिसदृशीममन्यत ॥ ९ ॥

स्थण्डिलं परिगृहीतमेतया हंसतूलशयनीयमुज्झितम् ।
आह्निकेषु न कृतस्तथादरो मज्जनाहृतिविलेपनादिषु ॥ १० ॥

तां विदर्भनृपतिस्तथागतां तत्सखीजनमुखेन शुश्रुवान् ।
आशु वाञ्छितवरोपलब्धये निश्चिकाय दुहितुः स्वयंवरम् ॥ ११ ॥

प्राहिणोच्च हरिदन्तवर्तिना भूभुजां प्रतिनिमन्त्रणाय सः ।
शातनाङ्कमरिपक्षशासनो दूतमण्डलमुदग्ररंहसम् ॥ १२ ॥

---

१. शातन इति पाठान्तरम्.

निर्ययुर्निशमितस्वयंवराः सैन्यधूलिचुलुकीकृताब्धयः ।
स्वस्वमन्त्रिषु वसुन्धराधुरां न्यस्य निर्भरकुतूहला नृपाः ॥ १३ ॥
तत्स्वयंवरणमङ्गलं दिवि स्वेन शंसितुमिवाम्बरौकसाम् ।
उच्चलन्नृपतिसैन्यमण्डलक्षोभनुन्नमुदियाय भूरजः ॥ १४ ॥
निर्गतेऽथ नरदेवमण्डले सैन्यभारपरिभुग्नकन्धरः ।
भूरिफूत्करणशालिभिर्मुखैः क्ष्मा कथञ्चिदहिपुङ्गवो दधे ॥ १५ ॥
निर्यतां सपदि मेदिनीभृतां सैन्यसन्नहनदुन्दुभिध्वनैः ।
व्याप्तदिग्वलयमापदञ्जसा शब्दतामिव चराचरं जगत् ॥ १६ ॥
रूपयौवनविशेषगर्विताः सर्वतोऽपि भुवमेकहेलया ।
कम्पयन्त इव सेनया द्विधा कुण्डिनं प्रति नृपाः प्रतस्थिरे ॥ १७ ॥
अन्तरेऽत्र परिदृष्टमेदिनीमण्डलौ महितवैभवौ मुनी ।
शक्रदर्शनमपेक्ष्य नारदः पर्वतश्च ययतुस्त्रिविष्टपम् ॥ १८ ॥
तौ विलोक्य सुचिरादुपागतावर्घ्यपाणिरभिगम्य वासवः ।
अन्वयुङ्क्त सविधे निवेशितौ कौतुकेन महता प्रचोदितः ॥ १९ ॥
तत्तदद्भुतविलोकनोत्सवप्रीयमाणमनसोर्महीतले ।
स्वागतं खलु चिरस्य दृष्टयोरद्य वाममरतापसोत्तमौ ॥ २० ॥
काः पुनर्जगति पुण्यभूमयः पादसञ्चरणपावनीकृताः ।
के च केवलविलोकनेन वां तीर्थतां जनपदाः प्रपेदिरे ॥ २१ ॥
स्वर्गलोकसुलभानि भूतलैरक्रियन्त सुकृतान्यनेकशः ।
यद् भवच्चरणपङ्कजद्वयस्पर्श एष चिरमन्वभावि तैः ॥ २२ ॥
नित्यमन्यनिरपेक्षमञ्जसा सञ्चरद्भिरखिलासु दिक्ष्वपि ।
यद् भवाद्भिरनुभूतमद्भुतं तन्ममाद्य निखिलं निवेद्यताम् ॥ २३ ॥
किञ्च नाकमुपयान्ति भूभुजो दर्शनेन मम ये समुत्सुकाः ।
कारणेन कतमेन ते पुनर्नैव पूर्वमिव मामुपासते ॥ २४ ॥
ऊचिवांसमिति वाचमूर्जितां वा[illegible] परिवृढोऽथ नारदः ।
प्रत्युवाच दशनांशुमण्डलैः क्षालयन्निव सभां शतक्रतुम् ॥ २५ ॥

अद्य भीमदुहितुः स्वयंवरो वर्तते भुवि दिवौकसां पते! ।
हेतुना पुनरनेन बाहुजाः स्वःप्रयाणकरणे पराङ्मुखाः ॥ २६ ॥
अग्रजेन दमनो महामुनिस्तेन तोषितमना महीभुजा ।
त्रीनुदारवपुषः सुतान् ददौ कन्यकां च कमनीयदर्शनाम् ॥ २७ ॥
सेयमद्य दमयन्त्यभिख्यया भीमभूपतनया प्रथावती ।
रूपयौवनविलाससम्पदामेकमायतनमित्युदीर्यते ॥ २८ ॥
मुष्टिमेयतनुमध्यमुल्लसद्रोमराजिगुणचारु तद्वपुः ।
अद्य विश्वविजयाय जाग्रतः कार्मुकं मनसिजस्य कल्पते ॥ २९ ॥
अद्भुताकृतिरपूर्वदर्शना सा तृतीयपुरुषार्थदेवता ।
बाहुमध्यमतिभाग्यशालिनः कस्य वा पुनरलङ्करिष्यति ॥ ३० ॥
विष्टपेषु सकलेषु वेधसः सृष्टिकौशलमिव वरानना ।
दर्पणोदरगतेन केवलं स्वेन नूनमुपमानमर्हति ॥ ३१ ॥
मन्दरेण मथितान्महोदधेरुत्थिताममरलोकसन्निधौ ।
इन्दिरामधिकरूपशालिनीं मन्यसे खलु मनोहरां हरेः ॥ ३२ ॥
उर्वशीममरलोकयोषितामुत्तमेति कथयन्ति कोविदाः ।
भीमभूपतनयावलोकने तद् विडम्बनमिवावभासते ॥ ३३ ॥
तां विदर्भनरदेवकन्यकामद्य लब्धुमुपजातकौतुकाः ।
नाकलोकगमनाय न त्वरां कुर्वते हि नरलोकनायकाः ॥ ३४ ॥
दूतहारितविदर्भजामनप्रेक्षणक्षणविनिद्रमन्मथाः ।
तामवाप्तुमभियान्ति कुण्डिनं भूभुजो भुजगराजबाहवः ॥ ३५ ॥
तत्र कुण्डिनपुराभिगामिनां भूभुजां सपदि सैनिकोद्धतैः ।
अम्बु सम्प्रति रजोभिरोघरैराविलं भवति सौरसैन्धवम् ॥ ३६ ॥
इत्थमेषु दिवसेषु कार्यतस्तान् प्रतीहि दिवमुज्झतो नृपान् ।
अन्यथा कथमिव त्यजन्त्यमी दुर्लभं भवदुपासनोत्सवम् ॥ ३७ ॥
निर्निमेषनयनावलिर्भवान् जातु पश्यतु विदर्भजामिमाम् ।
विष्टपत्रयविलासिनीजनप्रेक्षणोपनतदोषशान्तये ॥ ३८ ॥
वाचमस्य निशम्य्य वासवः कन्यकातिलकदर्शनोत्सुकः ।
अभ्यभाषत समीपवर्तिनः पावकं शमनमप्यपां पतिम् ॥ ३९ ॥

अद्भुतं मुनिमुखादुदीरितं भीमभूपदुहितुः स्वयंवरम् ।
द्रष्टुमुत्सहत एव मे मनो मां च यूयमनुगन्तुमर्हथ ॥ ४० ॥
ते तथेति परिगृह्य तद्वचस्तत्स्वयंवरदिदृक्षया हृता· ।
तेन सार्धममरावतीपुरान्निर्ययुस्त्रिदशलोकनायकाः ॥ ४१ ॥
निर्जरप्रभुवरैरधिष्ठिता निह्नुतार्करुचयो मनोजवाः ।
तत्र तत्र रभसादवातरन् व्योमसीमनि विमानपङ्क्तय· ॥ ४२ ॥
उज्झितै· सपदि दिव्यदन्तिना शीकरैर्नभसि जातदुर्दिने ।
अर्कमण्डलमगादनून्मल बिम्बमैन्दवमिवाक्षिलक्ष्यताम् ॥ ४३ ॥
चित्रकर्मविनिवेशिता इव स्तब्धकण्ठविकसत्प्रकीर्णका[1] ।
वायुवेगवशगास्तुरङ्गमाः पक्षिणां गतिमिव व्यडम्बयन् ॥ ४४ ॥
मण्डलं सपदि चण्डरोचिषो मण्डलाग्रमहसा प्रसर्पणै ।
आनयन् मलिनिमानमञ्जसा व्योम्नि दिव्यसुभटाश्चरिष्णव· ॥ ४५ ॥
अभ्रमुप्रियतनुत्विषा कृतामभ्रसिन्धुमभित· प्रसारिणीम् ।
कालवाहमहिषस्य कान्तिभि· कल्पिताजनि कलिन्दनन्दना ॥ ४६ ॥
फेनापिण्डसविशेषपाण्डरैरातपत्रनिवहैर्दिवौकसाम् ।
अम्बरस्य सरसो विकस्वरं पुण्डरीकनिकुरुम्बमादधे ॥ ४७ ॥
सा ततः परिवहस्य पद्धतिं प्रापदाशु मरुतां पताकिनी ।
य· प्रवर्त्तयति रश्मिसयतज्योतिषा वलयमम्बरोदरे ॥ ४८ ॥
तारकैः स्वरथनेमिघट्टितै सम्भ्रमादपसरद्भिरम्बरात् ।
आशुदत्तसरणिर्दिवौकसामाप दिव्यसरितं पताकिनी ॥४९ ॥
हससंसदवतंसितोर्मयो हेमपङ्कजपरागवाहिनः ।
शीतला· सुरसरित्समीरणा देवसैनिकगणान् सिषेविरे ॥ ५० ॥
केळिलोलकळहंसकामिनीकर्णमादिकलनादकैतवात् ।
स्वर्नदी निजसमीपमापुषां स्वागत सुमनसामिवाकरोत् ॥ ५१ ॥
क्षीरहारघनसारपाण्डरा सा सरिच्चटुलफेनशालिनी ।
आबभावधिकमम्बरश्रियो मल्लिकाविरचितेव मालिका ॥ ५२ ॥

---

१. प्रकीर्णक चामरम्

तामतीत्य दिविषत्पताकिनी तूर्यघोषमुखरीकृताम्बरा ।
भूतलाभिमुखतामुपेयुषी वारिवाहपदवीमगाहत ॥ ९३ ॥
अर्कतूललघवोऽभवन् घनाः सैन्यपीडनविशीर्णपाथसः ।
जीवनच्युतिजुषां हि देहिनां युक्त एव लघुतापरिग्रहः ॥ ९४ ॥
अम्बरादवतरन्त्यनुक्रमाद् दिद्युते सुरविमानमण्डली ।
लोलवीचिनिचये महाम्बुधौ बिम्बपङ्क्तिरिव भानुमालिनः ॥ ९५ ॥
लक्ष्मीमवापदधिकामवनीं प्रयान्ती सा वाहिनी सपदि विष्णुपदप्रवृत्ता ।
उद्दामचामरविवर्तनफेनपङ्क्तिरुद्यत्तुरङ्गमनिकायतरङ्गमाला ॥ ९६ ॥

**इति वामनभट्टबाणविरचिते नलाभ्युदये**

तृतीय सर्ग

---

## अथ चतुर्थः सर्गः ।

ततः सुरेशा ददृशुर्नभोगताः स्वयंवरायागतमर्धवर्त्मनि ।
निमेषशून्यस्वविलोचनावलीतपःफलीभूतविलोकन नलम् ॥ १ ॥
पुराद्विषल्लोचनपावकोष्मणा कथावशेषस्य पुनर्मनोभुवः ।
विधित्सया व्याकुलचेतसो विधेरभिन्नतन्निर्मितिमातृकां विधेः ॥ २ ॥
नरेषु ये सन्ति जगन्मनोरमा सुरेषु वा तानखिलान् कथञ्चन ।
गुणानुवादाय सरोजजन्मना विचित्रतां दर्शयितुं विनिर्मितम् ॥ ३ ॥
सदा सदानन्दविधानदक्षिणं दधानमङ्गे सकलाः कला अपि ।
कृतोदयं निर्मलपक्षयोगतो निशीथिनीनाथमिवागतं दिवः ॥ ४ ॥
जगत्सु पुंभावविशेषशालिनां मनस्सु पुसामभिमानधाम तु ।
अपत्रपाभारमतीव दुर्वह दिशन्तमत्यद्भुतरूपसम्पदा ॥ ५ ॥
(कुलकम् )

पुनर्गृहीताङ्गमिवेश्वरेच्छया मनोभवं दिक्पतयोऽभिवीक्ष्य तम् ।
विदर्भभूपालसुताविलोकनाभिलाषमन्त.करणेन तत्यजुः ॥ ६ ॥
ततो विमानादवतीर्य ते दिवि स्वरेण धीरेण नभोविसर्पिणा ।
प्रगल्भवाच· प्रथमे दिवौकसा सविस्मय नैषधमाबभाषिरे ॥ ७ ॥

महामते! मध्यमलोकनायक! प्रतीतसत्यव्रतभूषणो भवान् ।
करोतु साहायकमन्यदुष्करं यशस्कर सम्प्रति दौत्यमेत्य नः ॥ ८ ॥
महाब्धिमध्ये परिपीतपाथसां समन्ततः प्लावयतां वसुन्धराम् ।
पयोधराणा भुवनेषु केवलं परोपकारैकफला· प्रवृत्तय ॥ ९ ॥
इति ब्रुवाणान् निषधाधिपोऽथ तानुदारतेज परिवेषशालिन· ।
अभौमरूपानमरान् वितर्कयन् कृतप्रमाणाञ्जलिरित्यभाषत ॥ १० ॥
यथा समादिष्टमुदग्रवैभवास्तथाद्य दूतेन मया भविष्यते ।
स्वकीयतेजःपरिभूतपूषण· सुरेषु के यूयमुदारदर्शना· ॥ ११ ॥
प्रपद्यता कं प्रति दूतता मया स वा कथङ्कारमिवाधिगम्यताम् ।
विधीयतां तत्र किमित्यशेषत परिस्फुटं ब्रूत करोमि तत् तथा ॥ १२ ॥
वदन्तमेवं तमुवाच वासवः स एष वह्नि· शमनः स एष च ।
स एष यादोधिपतिः स एष च प्रतीतिमानस्मि महेन्द्रसञ्ज्ञया ॥ १३ ॥
इति प्रसिद्धान् नरलोकनन्दन! प्रतीहि नस्त्व चतुरो हरित्पतीन् ।
अनर्घसौन्दर्यविदर्भकन्यकास्वयंवरालोकनकौतुकागतान् ॥ १४ ॥
तदद्य यामो दमयन्त्यभीप्सया तदीयरूपश्रवणात् समन्मथाः ।
करोतु नः सम्प्रति साधु दूततां परोपकाराध्वरदीक्षितो भवान् ॥ १५ ॥
भवन्निदेशाचरणोचित कथं स्वयंवरायाहमुपेयिवानिति ।
न नः प्रतिब्रूहि यतो भवादृशा प्रतिश्रवाम्भोनिधिपारदृश्वनः ॥ १६ ॥
यथा यथा बालमृगेक्षणा वशादवश्यमस्मासु वृणीत कञ्चन ।
तथा तथा युक्तिपरिष्कृतं भवानुदारगम्भीरमुदाहरेद् वचः ॥ १७ ॥
न दूतभावो लघिमानमावहेत् करोति शश्वद् गरिमाणमेव ते ।
यतो भजन्ते गुणपक्षपातिनो नमन्त एवोन्नतिमुज्ज्वलां जनाः ॥ १८ ॥
त्वमित्थमेनामभिधातुमर्हसीत्युपाययोगस्तव नोपपद्यते ।
त्वमेव वेत्सि प्रथमो विवेकिनां गिरां क्रमज्ञ· समयोचितं वचः ॥ १९ ॥
दिवौकसां शासनमाचरन् भवाननन्यलभ्यां श्रियमश्नुते पराम् ।
परम्परामभ्युदयस्य शाश्वतीं फलन्ति कल्याणकृतां खलु क्रियाः ॥ २० ॥

विदर्भभूपालसुता विलोकितु विशन्तमन्तःपुरमस्य भूपते· ।
न कश्चन त्वामवलोकता जनास्तिरस्कृतो याहि सुराभ्यनुज्ञया ॥ २१ ॥

अथो तथेति प्रतिशुश्रुवान् नलो जगाम वैदर्भपुर प्रमोदवान् ।
स्वकीयलाभादपि सत्यसङ्गरा· परोपकारेषु हि कुर्वते रतिम् ॥ २२ ॥

निरस्य वान्छा दमयन्त्युपाहिता परोपकारप्रवणेन चेतसा ।
मनोरथं पूरयितु दिवौकसां जगाम वैदर्भपुरीमुदारधी· ॥ २३ ॥

दिवोऽवतीर्णानि निरस्य शोभया विमानजालानि दिवौकसामपि ।
विराजमानं नरदेवमन्दिर विलोकयन् विस्मयमाप नैषध· ॥ २४ ॥

तिरस्करिण्या त्रिदिवेशदत्तया कयाचिदन्तर्हितविग्रह नलम् ।
न च व्यलोकन्त विदर्भभूभृतो विशन्तमन्त·पुरमन्तरा जनाः ॥ २५ ॥

ततो निषण्णा मणिमण्डपान्तरे नृपः शचीमप्सरसां गणैरिव ।
उपास्यमानामभितः सखीजनैर्विलोकयामास विदर्भसम्भवाम् ॥ २६ ॥

विलोकनैरेव विलासगन्धिभिर्मनोभुव· किङ्करतामुपेयुष ।
इदं त्वया कार्यमिति प्रतिक्षणं निदेशदानानि वितन्वतीमिव ॥ २७ ॥

दरस्मितोद्यद्दशनांशुमञ्जरीकदम्बकैस्त्र्यम्बकदग्धवर्ष्मण ।
प्रसिद्धकार्श्यं मदनस्य तनू पुनर्यशश्शरीर परिपुष्णतीमिव ॥ २८ ॥
(विशेषकम् )

इमामियत्तामिव रूपसम्पदा वपुष्मतीं कीर्तिमिवाङ्गजन्मन· ।
यथाश्रुताकारगुणातिशायिनीममंस्त शृङ्गाररसाधिदेवताम् ॥ २९ ॥

अलोकसामान्यतनु तमागतं पुनर्वपुष्मन्तमिवेक्षुकार्मुकम् ।
विलोक्य वैदर्भसुता ससम्भ्रमं समुच्चचालाथ समं सखीजनै ॥ ३० ॥

स्रजेव पङ्केरुहपत्रनद्धया तमर्चयन्त्यो निजनेत्रमालया ।
सुरो नु रक्षो नु नरो नु किन्त्विति स्त्रियः परं विस्मयमाललम्बिरे ॥ ३१ ॥

अतर्कितोपागतमन्तिके नलं विदर्भजा कोऽयमितीव विस्मिता ।
विकासिना वीतनिमेषवृत्तिना विलोचनेन स्तिमितेन सा पपौ ॥ ३२ ॥

पुरैव सङ्कल्पमयो बभूव यो मनोरथप्रार्थितदर्शनः प्रियः ।
नलः स एवायमिति क्षणे क्षणे बलादश्वसीव तदीयचेतसा ॥ ३३ ॥

नलोऽपि तां चान्द्रमसीं कलामिव प्रतीक्ष्य चक्षुःप्रियकान्तिचन्द्रिकाम् ।
अभीक्ष्णमुद्वेलरसोर्मिराकुलो मुमोच धैर्यं निधिरम्भसामिव ॥ ३४ ॥

विचिन्त्य दौत्यं मरुतामथात्मनो मनोगतामाशु नियम्य विक्रियाम् ।
अवार्यवीर्यं हृदि धैर्यवत्तया विजृम्भमाणं मदनं तिरोदधे ॥ ३५ ॥

ततस्तदालोकनजातसम्भ्रमा विलोकनेनैव विधाय सत्क्रियाम् ।
अदृष्टपूर्वे प्रथमाभिभाषणं कथं विदध्यामिति जोषमास्त सा ॥ ३६ ॥

अपास्य लज्जामथ कन्यकोचितां प्रमत्तपुंस्कोकिलमञ्जुभाषिणी ।
स्मितामृतांशुप्रभया विवृण्वती मनोभिलाषं दमयन्त्यभाषत ॥ ३७ ॥

वदानवद्याङ्ग! मनोभवो भवान् किमेवमत्यन्तमनोहराकृतिः ।
न चाहमीक्षे मधुरं शरासनं करे सुगन्धीनपि नैव सायकान् ॥ ३८ ॥

अपि त्वमानन्दकरः शरीरिणां सुधाकरो वा भुवमागतः स्वयम् ।
न चैव पश्यामि तुषारशीतलान् कुमुद्वतीमोदनलम्पटान् करान् ॥ ३९ ॥

किमश्विनोरन्यतरोऽसि केवलं दिवोऽवतीर्णो धरणीदिदृक्षया ।
न चापि लोकेषु तयोरवस्थितिर्मिथो वियुञ्जानतयोपपद्यते ॥ ४० ॥

तदद्य कस्त्वं कमनीयविग्रहस्तवात्र किं वा करणीयमित्यपि ।
मम त्वदालोकनजं कुतूहलं प्रयच्छति प्रश्नविधौ प्रगल्भताम् ॥ ४१ ॥

वपुर्विशेषं तव वीक्ष्य वीक्ष्य मे विजृम्भते चेतसि पञ्चसायकः ।
तनूलता स्वेदकणानुषङ्गिणी बिभर्ति रोमाञ्चमयञ्च कञ्चुकम् ॥ ४२ ॥

गृहीतचामीकरवेत्रयष्टिभिः पदे पदे कञ्चुकिनां कदम्बकैः ।
निरुध्यमानप्रतिहारमण्डलं कथं प्रविष्टोऽसि नृपावरोधनम् ॥ ४३ ॥

वपुर्न ते केवलमद्भुताद्भुतं तथा चरित्रं च विचित्रमेव ते ।
सुदुष्प्रवेशं मरुतोऽपि मायया यतः प्रविष्टोऽसि मदीयमन्दिरम् ॥ ४४ ॥

वनप्रियालापमनोज्ञया गिरा मनो हरन्तीमिव मञ्जुभाषिणीम् ।
नलस्तरन्तीमिव हर्षवारिधाववोचदौचित्यविभूषितं वचः ॥ ४५ ॥

अवेहि राजन्यकुमारि! भूभुजं नलाह्वयं मां नलिनायतेक्षणे! ।
दिवौकसां दौत्यमुपेयुषा मया त्वदान्तिकं प्रापि दुरासदं परैः ॥ ४६ ॥

तदभ्यनुज्ञाविभवादहं विशन् नृपस्य शुद्धान्तमलक्षित· परैः ।
उपार्जिते नाकसदामनुग्रहे किमस्ति लोकत्रितयेऽपि दुर्लभम् ॥ ४७ ॥
पतिः सुराणां पतिरर्चिषां तथा पतिः पितॄणा पतिरम्भसामपि ।
अमी खलु त्वामभिजातलक्षणामुदाररूपामुपयातुमुत्सुका ॥ ४८ ॥
निशम्य सम्यग् भवती समन्मथा विमुच्य दिव्यासु वधूषु कौतुकम् ।
त्वयि स्पृहा दिक्पतयो वितन्वते वृणोतु तेषा भवती च कञ्चन ॥ ४९ ॥
तिरस्कृता मुग्धतया यदि त्वया कृतक्रुध· प्रत्युत मा शपन्ति ते ।
कथं तपोभि· सुलभ सुदुष्करैरुपस्थित रत्नमुदासते जना· ॥ ५० ॥
वदन्तमेवं दमयन्त्युवाच त सगद्गदा वाचमधीरलोचना ।
निरन्तरैरश्रुजलैर्निषिञ्चती निबद्धनिश्वासविकम्पितौ स्तनौ ॥ ५१ ॥
यदैव हंसाः प्रतिपद्य दूततां भवन्तमाख्यन्नतिमन्मथाकृतिम् ।
तदा प्रभृत्युत्कलिकासमाकुले भृशं निमग्नास्म्यनुरागसागरे ॥ ५२ ॥
तदैव सत्य मदनाग्निसाक्षिकं वृतो भवानेव मयात्मवल्लभ ।
नमोऽस्तु दिक्पालगणाय तादृशे विसर्जितो येन भवान् मदन्तिकम् ॥ ५३ ॥
मनोरथप्रार्थितवल्लभ! प्रभो! ध्रुवं त्वदालम्बनजीवितास्म्यहम् ।
प्रसीद नाथ! प्रणय प्रतीच्छ मे कुरुष्व मां त्वत्पदपद्मकिङ्करीम् ॥ ५४ ॥
यदि प्रपन्नामवमन्तुमर्हसे चिराय मां त्वय्यभिलाषबन्धनीम् ।
विषेण रज्ज्वा सलिलेन वह्निना जनोऽयमुन्मुञ्चति जीवित पुरा ॥ ५५ ॥
इति ब्रुवाणां पुनरब्रवीन्नलो नतभ्रु! न त्व सदसद्विवेकिनी ।
सुरेषु तिष्ठत्सु नराभिलाषिणी मणावुपेक्षां कुरु काचकाङ्क्षिणी ॥ ५६ ॥
अमर्त्यभोगाननुभुङ्क्ष्व शाश्वतान् मनुष्यभोगानवगच्छ नश्वरान् ।
क एव वा काञ्चिकलिप्सया पुमान् परित्यजेत् स्वादुतरं सुधारसम् ॥ ५७ ॥
वृणी व तत् काञ्चिदमीषु काङ्क्षित गिरं मदीयामपि मा तिरस्कृथाः ।
सुराङ्गनानामपि माननीयतामुपेयुषी स्वर्गसुखानि भोक्ष्यसे ॥ ५८ ॥
न पादपङ्केरुहरेणुनाप्यहं भवामि येषामुपमेयवैभवः ।
सुरेषु तेषु स्वयमागतेषु ते मनः प्रसादाभिमुखं प्रवर्तताम् ॥ ५९ ॥
इति ब्रुवन्तं तमुवाच सा पुन· शृणु स्फुटं जीवितनाथ! मे वचः ।
न चान्यदीयामनुरुन्धते मतिं स्वतन्त्रवृत्तीनि मनांसि योषिताम् ॥ ६० ॥

स्वयंवरार्थं मिलतां महीभुजामुपेयुषां नाकसदां च सान्निभौ ।
पतिं वरिष्यामि भवन्तमञ्जसा यत· स्त्रियो नूनमहार्यनिश्चयाः ॥ ६१ ॥

मदीयभावाभिनिवेशसाक्षिणो ध्रुव वरिष्यन्ति दिवौकसो न माम् ।
स्वयंवरार्थं च समाव्रजन्तु ते नृपालपाशा इव पादपूरणाः ॥ ६२ ॥

इति विदर्भसुतासमुदीरिता गिरमकृत्रिमभावनिबन्धनाम् ।
प्रतिनिवेदयितुं त्रिदिवौकसां निववृते र· सान्निषधाधिपः ॥ ६३ ॥

समधिगम्य निजागमनोत्सुकान् प्रथितसत्यवचा· पृथिवीपति ।
त्रिविषदो घटिताञ्जलिसम्पुटो दिवि विमानगतानिदमब्रवीत् ॥ ६४ ॥

दृष्टा भैमी तदनु कथिता युष्मदर्थे मया सा
तां तां वाच समयसदृशीं दूतभावोचितां वः ।
भूयो भूयः प्रणयकृपणा वल्लभ मां वृणीते
स्त्रीणां चेतः प्रकृतिकठिन तत्र यूय प्रमाणम् ॥ ६५ ॥

अभिनन्द्य नल पुरन्दराद्या· सह ना नन्दनपादपप्रसूनैः ।
अभिषिच्य तवास्तु नित्यलक्ष्मीरिति तस्याशिषमादरादकुर्वन् ॥ ६६ ॥

**इति वामनभट्टबाणविरचिते नलाभ्युदये**
चतुर्थ सर्ग ।

---

## अथ पञ्चमः सर्गः ।

अथोपयाते शशिनि प्रवृद्धि तिथौ शुभायां दिवसे शुभंयौ ।
स्वयंवरार्थं मिलितान् क्षितीशानाकारयमास विदर्भराजः ॥ १ ॥

तेनाथ निर्दिष्टमुदारशोभ युक्तं मणिस्तम्भपरम्पराभि· ।
रङ्गं व्यगाहन्त वितानवन्तं मदादहंपूर्विकया महीपाः ॥ २ ॥

अध्यास्य रत्नद्युतिरञ्जितानि हैमानि भद्रासनमण्डलानि ।
अवापुरारूढसुमेरुशृङ्गै· साम्य युवानो मृगराजशावैः ॥ ३ ॥

मह·प्ररोहैर्मणिकुण्डलानामुद्भास्यमानानि मुखानि तेषाम् ।
बालातपस्पर्शसमिद्धभासामौपम्यमापुः कमलाकराणाम् ॥ ४ ॥

उदारतेजःपरिवेषभाजामुद्यत्प्रभाणामिव तारकाणाम् ।
शरत्प्रसन्ने नभसीव रङ्गे पङ्क्तिर्बभासे पृथिवीपतीनाम् ॥ ५ ॥

तेषां व्यराजन्त सरत्नशोभा प्रतीतविश्राणनकर्मदक्षाः ।
प्रवालशोणाङ्गुलयो नृपाणां कल्पद्रुशाखा इव पञ्चशाखाः ॥ ६ ॥

विधूयमानानि विलासिनीभिः प्रतिक्षणप्रावृतदिङ्मुखानि ।
चिरार्जितानीव यशांसि तेषां विरेजिरे चामरमण्डलानि ॥ ७ ॥

तरङ्गमालेव पयःपयोधेः श्रियं नृपाणामुपसेवमाना ।
प्रकीर्णकानां परितश्चरन्ती पङ्क्तिश्चकाशे शरदिन्दुगौरी ॥ ८ ॥

प्रसाधनेनापि विना मनोज्ञां सौन्दर्यलक्ष्मीं सहजां दधानः ।
आकल्पवानद्भुतरूपलक्ष्मीर्नलोऽपि तां राजसभां प्रपेदे ॥ ९ ॥

निरीक्ष्य भूपा निषधाधिपं तं दूरादमन्यन्त सुदुर्लभां ते ।
विदर्भकन्याकरपङ्कजाभ्यां निधास्यमानां स्रजमात्मकण्ठे ॥ १० ॥

सङ्कल्पमात्रेण ततो दिगीशा नलस्य रम्यं परिगृह्य रूपम् ।
तस्योपकण्ठे विनिवेशितानि भद्रासनान्यारुरुहुः सहेलम् ॥ ११ ॥

ततो महार्हेषु नृपासनेषु पङ्क्तिक्रमेणैव समं निविष्टान् ।
(अन्योन्यतुल्याकृतिरूपवेषान्) आलोकयन् पञ्च नलान् नरेन्द्राः ॥ १२ ॥

तत्त्वार्थतोऽसौ नल एक एव स पञ्चधा संववृते किमेतत् ।
इत्याकुलान्तःकरणा सभा सा चित्रार्पितेव स्तिमितावतस्थे ॥ १३ ॥

अथ प्रसर्पन् ककुभां मुखेषु स्वयंवरारम्भमुहूर्त्तशंसी ।
विमानमालां मुखरीचकार संमूर्च्छितो मङ्गलशङ्खनादः ॥ १४ ॥

ततः सखीभिः परिवार्यमाणा त्रैलोक्यसंमोहनदेवतेव ।
मूर्त्तेव कीर्त्तिर्मकरध्वजस्य पतिंवरा प्रादुरभूत् कुमारी ॥ १५ ॥

आलोलमङ्गल्यमधूकमाला दूर्वाभिरामालकबन्धनश्रीः ।
नवेन चन्द्रांशुसहोदरेण क्षौमप्रकर्षेण कृतोत्तरीया ॥ १६ ॥

जपाप्रसूनाधिकपाटलाभिः प्रसारिणीभिः परितः प्रभाभिः ।
समुद्गिरन्तीव चिराय पीतमलक्तकं पादसरोरुहाभ्याम् ॥ १७ ॥

विभूषणैर्या सुषमा वितीर्णा विलोचनानन्दकरी जनानाम् ।
भूयोऽपि तां वृद्धिमती स्वकान्त्या प्रत्यर्पयन्तीव विभूषणानाम् ॥ १८ ॥
वातेरिताम्भोजदलाभिरामैर्विलोकनैर्लोचनयोर्विशालैः ।
स्वयंवरात् प्रागपि भूपतीनां कण्ठेषु मालामिव विक्षिपन्ती ॥ १९ ॥
(कुलकम्)
तद्रूपसन्दर्शनमात्र एव मनांसि मुह्यन्ति महीपतीनाम् ।
संक्षोभयामास भृशं मनोभूः केनापि संमोहनसायकेन ॥ २० ॥
तृषेव कन्दर्पनिदाघतप्तास्तदङ्गलावण्यसुधातरङ्गान् ।
मुदा पिबन्ति स्म तदा युवानो मुहुर्मुहुर्लोचनसम्पुटेन ॥ २१ ॥
तद्रूयमन्त करणे प्रयाते तदङ्गसौन्दर्यनिमग्ननेत्राः ।
स्विद्यद्भिरङ्गैः पुलकान्तरङ्गैर्महीभुजश्चित्रगता इवासन् ॥ २२ ॥
अथ प्रगल्भा जगतीपतीनां विज्ञातशीलान्वयवैभवार्धि ।
महत्तरी प्रारभताभिधातुं नामानि राज्ञामभिनिर्दिशन्ती ॥ २३ ॥
कीर्तिं प्रताप विभुतां महत्तामुदारतामुज्ज्वलवशतां च ।
आकर्णयन्त्याः क्रमशोऽथ भैम्याः सा वर्णयामास महीपतीनाम् ॥ २४ ॥
सा वर्ण्यमानान् क्रमशोऽथ भैमी शनैरतीयाय शत नरेन्द्रान् ।
क्षितौ तटाकाः शतशो भवन्तु नाथस्तु नद्या नदराज एव ॥ २५ ॥
अतीत्य सा य यमरालकेशी जगाम भूपं शशिनः प्रभेव ।
स स प्रपेदे मुकुलीकृतश्रीः प्रातः कुमुद्वानिव दीनभावम् ॥ २६ ॥
उद्भासमानान् नवयौवनेन रूपेण वेषेण च लोभनीयान् ।
अन्योन्यसादृश्यविशेषरम्यान् सा पञ्च भैमी पुरुषान् ददर्श ॥ २७ ॥
प्रत्येकमेतानवलोकयन्त्या भूयस्तरां विस्मयमाविशन्त्याः ।
अयं नलोऽयं नल इत्यमुष्या बभूव बुद्धिर्बहुधा विभिन्ना ॥ २८ ॥
तद्दर्शनेन प्रथमं जहर्ष विसिष्मिये तद्बहुतोपलब्ध्या ।
असावमीषु प्रिय इत्यबुध्द्या पश्चादभूदाकुलिता मृगाक्षी ॥ २९ ॥
सा तर्कयामास कथं प्रियोऽसावेकोऽपि नानेव विभाव्यते मे ।
प्रायेण मद्भक्तिपरीक्षणाय केनापि सन्दर्शितमिन्द्रजालम् ॥ ३० ॥

१ 'आशी स्वस्त्ययनाभिज्ञा या वृद्धा सा महत्तरी' इति यादव .

नूनं मयोक्तां निशमय्य वाचमुदीरितां सत्यगिरा नलेन ।
आदाय ते दिक्पतयश्छलेन तद्रूपमिच्छासुलभं समेता ॥ ३१ ॥

कथं नु मायामयकञ्चुकेन तिरोहिताङ्गाश्चतुरो दिगीशान् ।
नलं च नैसर्गिकचारुशोभं विशेषचिह्नैरधुना विविञ्चे ॥ ३२ ॥

अन्यैरुपायैर्जगदीश्वराणां मायातिरोधानमवार्यमेषाम् ।
स्तोत्रप्रियाणां मरुतां मनांसि स्तुतिप्रबन्धेन निवर्तयिष्ये ॥ ३३ ॥

सा सम्प्रधार्यैवमहार्यधैर्या सभागते शृण्वति राजलोके ।
अङ्गीकृतौदार्यमगूढभावं पतिंवरा वाक्यमिदं बभाषे ॥ ३४ ॥

नमोऽस्तु दिक्पालगणाय तस्मै भाव्यर्थसंवेदनपण्डिताय ।
योऽसावुपेतो मदनुग्रहाय न केवलं मय्यभिलाषबन्धात् ॥ ३५ ॥

सतीषु दिव्यासु विलासिनीषु न मानुषीषु प्रतिपत्तिरेषाम् ।
जानामि तेनास्मदनुग्रहाय भुवं प्रपन्नान् पुरुहूतमुख्यान् ॥ ३६ ॥

अहं तु भावेन नलार्पितेन नान्यं पतिं वेदितुमस्मि दक्षा ।
अतः प्रसीदन्तु महानुभावा दिवौकसो मे दयमानचित्ताः ॥ ३७ ॥

नलस्य साहं यदि वल्लभा स्यां नाथो यदि स्यान्मम नैषधोऽपि ।
इत्थं विधात्रा परिकल्पितं चेत् स एव भूयात् परिणायको मे ॥ ३८ ॥

सङ्कल्पसिद्धाखिलकामितार्थाः समुज्झितप्राप्यफलाभिलाषाः ।
दीनामनाथां कृपया महत्या दिवौकसो मां परिपालयन्ताम् ॥ ३९ ॥

मद्विप्रलम्भेन मखांशभाजां महात्मनामस्ति फलं न किञ्चित् ।
कारुण्ययोगादपहाय मायां भवन्तु ते दर्शितनैजचिह्नाः ॥ ४० ॥

श्रुत्वेति भैम्याः परिदेवितानि नले च तामर्पितभावबन्धाम् ।
देवाः परिज्ञाय दयाविधेया बभूवुराविष्कृतनैजचिह्नाः ॥ ४१ ॥

ततः प्रसन्नांस्त्रिदिवौकसस्तान् आलोकयामास नरेन्द्रकन्या ।
अस्वेदगात्राननिमेषनेत्रानम्लानमालानमहीतलस्थान् ॥ ४२ ॥

आरादपश्यच्च विशेषदृश्यं मनोरथप्रार्थितमात्मनाथम् ।
स्विद्यत्तनुं दत्तनिमेषदृष्टिं म्लानस्रजं भूतलवर्तिनं सा ॥ ४३ ॥

ततः स्रजं सौरभलीनभृङ्गां प्रत्यग्रकल्हारदलावनद्धाम् ।
पतिंवरा पाणिसरोरुहाभ्यामासञ्जयामास नलस्य कण्ठे ॥ ४४ ॥

लक्ष्मीरिवाधोक्षजमाम्बिकेव त्रियम्बकं वृत्रहणं शचीव ।
वरं सरूपं दमयन्त्यवापदिति प्रशंसामकरोत् सभा सा ॥ ४५ ॥

प्रीतो महेन्द्रः प्रददौ च तस्मै प्रवर्त्यमानेषु महाध्वरेषु ।
प्रत्यक्षसन्दर्शनमात्मनश्च गतिं च साध्वीं सुकृतोपलभ्याम् ॥ ४६ ॥

वह्निश्च वह्नित्वमथात्मलोकान् यमो यमत्वं च रतिं च धर्मे ।
अदादपां भावमपां पतिश्च सौरभ्यमाद्यद्भ्रमरां च मालाम् ॥ ४७ ॥

प्रशाधि भूमिं परिणीय भैमीमाज्ञाबलेनैव निरस्य शत्रून् ।
इत्याशिषं दत्तवराय तस्मै दत्वा ययुर्दिक्पतयो यथास्वम् ॥ ४८ ॥

महार्हवासोमणिहेममुक्ताप्रदानमुख्येन सभाजनेन ।
मनांसि सर्वस्य सभाजनस्य प्रमोदयामास विदर्भराजः ॥ ४९ ॥

स्वयंवरार्थं नृपतीनुपेतान् सर्वाननर्घ्यैरुपदाविशेषैः ।
सत्कृत्य नाथः क्रथकैशिकानां सम्प्रैषयत् स्वाः प्रति राजधानीः ॥ ५० ॥

ततो मुहूर्ते नृपतिः प्रहृष्टो मौहूर्तिकैर्भव्यतयोपादिष्टे ।
तौ दम्पती क्लृप्तविवाहवेषावानाययामास विवाहवेदिम् ॥ ५१ ॥

तत्राग्निमाधाय ततः पुरोधा विवाहवेद्यां विधिना विधिज्ञः ।
संयोजयामास वधूवरौ तौ मार्गेण वेदप्रतिपादितेन ॥ ५२ ॥

हरेण दग्धस्य पुनः प्ररूढं स्मरद्रुमस्येव नवं प्रवालम् ।
नखप्रभापिञ्जरितं नरेन्द्रः करेण जग्राह करं मृगाक्ष्याः ॥ ५३ ॥

परस्परं पाणिसमागमेन वधूवरौ कण्टकिताङ्गयष्टी ।
प्रादुर्भवत्स्वेदकणौ प्रदीप्तं परीयतुः पावकमादरेण ॥ ५४ ॥

पुरोधसा वेदविदा प्रयुक्ता वधूरभिन्नाञ्जलिसम्पुटेन ।
शनैः समिद्धार्चिषि हव्यवाहे चिक्षेप लाजाञ्जलिमानताङ्गी ॥ ५५ ॥

स्वेदोद्गमैरञ्चितफालदेशं प्रम्लानकर्णोत्पलमायताक्षम् ।
धूमाभिषङ्गेण मुखं मृगाक्ष्या रक्तारविन्दद्युतिमन्वयासीत् ॥ ५६ ॥

तौ दम्पती होमविधौ समाप्ते बध्वाञ्जलिं पाणिसरोरुहाभ्याम् ।
पुरोहितेन प्रमुदा प्रयुक्तां त्रयीमयीमाशिषमाद्रियेताम् ॥ ५७ ॥

नलेन भैमीं परिणीयमाना सोत्कर्षमालोकयता नृपाणाम् ।
पुराणगाथाश्रुतपङ्कजाक्षलक्ष्मीविवाहस्मृतिराविरासीत् ॥ ५८ ॥

इत्थं सहर्षमधिप क्रथकैशिकाना पाणिग्रह स्वदुहितुर्निपधाधिपेन ।
सम्पाद्य सम्पदनुरूपधनव्ययेन सन्तुष्टचित्तमकरोदखिल च लोकम् ॥ ५९ ॥

द्विपानश्वान् रत्न वसु वसनजात च सुमहद्
विदर्भाणामीश सपदि रचयित्वा हरणकम्[1] ।
नलं भार्योपेत निषधनगराय प्रमुदित
कथञ्चित् प्राहैषीद् दुहितृविरहव्याकुलमनाः ॥ ६० ॥

सम्प्राप्य तत्र नगर निजमुत्पताकं पौरैरमात्यसहितैरभिनन्द्यमान ।
सौधेषु चन्द्रधवलेपु विदर्भकन्या सोऽभुङ्क्त विग्रहवतीमिव राज्यलक्ष्मीम् ॥ ६१ ॥

**इति वामनभट्टबाणकृते नळाभ्युदये**

पञ्चम सर्ग ।

---

## अथ षष्ठः सर्गः ।

अथ मदनभुजावलेपदायी परभृतपञ्चमसूचितावतार' ।
मलयजसुकुमारमारुताना सुरभिरजायत सूतिकाक्रमान ॥ १ ॥

किसलयमृदुलेषु कामिनीनामधरदलेषु मुहु' कृतापराधा ।
सरसिजविभवेपु साभ्यसूया विरतिमवाप शनैस्तुषारवृष्टि ॥ २ ॥

उपवनसहकारपादपेषु प्रतिनवपाटलपल्लवाञ्चितेषु ।
पदमिव विदधे वसन्तलक्ष्मीर्नवनिहितारुणयावकाभिरामम् ॥ ३ ॥

ध्रुवमनिलशिशुर्निपीतशेषो विषकलुषेण फणाभृता मुखेन ।
परिलुलितपटीरपल्लवः सन् मनसि यदाधित मोहमङ्गनानाम् ॥ ४ ॥

मखमिव मदनस्य कर्तुकामा परभृतकूजितमन्त्रमीरयन्ती ।
किसलयमयपावके मधुश्रीर्नवमकरन्दरसाहुतिं वितेने ॥ ५ ॥

---

1. हरणक यौतकम 'हरण यौतकादिके' इति यादव .

मृदुपवनविनिद्रबालचूतप्रसवसमुच्चलिता परागरेखा ।
उपवनभुवि पुष्पसायकस्य त्रिभुवन(मोहन)चूर्णमुष्टिरासीत् ॥ ६ ॥

त्रिभुवनजयिन दिनावसानस्फुरितसमुज्ज्वलदीपिकासखीभि ।
दिशि दिशि नवचम्पकावलीभिर्मनसिशयं निरराजयन्मधुश्री ॥ ७ ॥

अनुविपिनमशोकवल्लरीणा मलयसमीरणमन्दकम्पितानाम् ।
उपरि मधुकरो निलीय गायन्ननुभवति स्म नवा वसन्तदोलाम् ॥ ८ ॥

कुसुमचषकसम्भृतं मरन्द सपदि निपीय परागरूषिताङ्गा ।
मधुकरतरुणा सह प्रियाभिर्दिवसमशेरत माधवीनिकुञ्जे ॥ ९ ॥

वरतनुवदनासवानपेक्ष बकुलतरु समुदञ्चित प्रसूनै ।
भ्रमरपरिषदा प्रमोददायी वनमधिवासयति स्म सौरभेण ॥ १० ॥

इति मधुसमयो विलासभाजा सपदि विलासपरम्परोपदेष्टा ।
तरुणपरभृतस्वनापदेशान्मदनमुदञ्चयति स्म मानसेषु ॥ ११ ॥

अधिकसमुदिताभिजातलक्ष्मीरभिनवपाणिनिपीडनोत्सवेन ।
मनसिजतरलापि लज्जया सा नलमभि कातरतां बभार भैमी ॥ १२ ॥

कतिचन दिवसानि कातराक्षी सललितनर्मगिरा सखीजनेन ।
कथमपि परिगृह्य नीयमाना दयिततमस्य समीपमाससाद ॥ १३ ॥

अवनतवदनेन्दुरन्तिकस्था सविधसखीजनवीक्षणान्तरेषु ।
असकलचलितैरपाङ्गपातैरनुकलमैक्षत पत्युराननं सा ॥ १४ ॥

निजवपुषि विलोक्य दुर्विनीतं पुलकसमुद्गममञ्चितायताक्षी ।
सविधगतसखीजनावलोकात् प्रथममुपांशु तिरोदधेऽशुकेन ॥ १५ ॥

अभजत सुतरां विलज्जमाना कतिचिदहानि चकोरलोचना सा ।
कथमपि परिणेतुरासनार्धे चतुरसखीवचनानुरोधवृत्त्या ॥ १६ ॥

अथ कथमपि तल्पभाजमेनां रजनिषु राजसुता नराधिनाथः ।
सदयमनुससार लज्जमानां वलिततनूमपराङ्गसेवनेन ॥ १७ ॥

अलकपरिमलानुभूतिदानक्षममपराङ्गमधीरलोचनाया ।
अनिभृतपुलकश्रमाम्बुलेश धरणिपति प्रमदेन निर्विवेश ॥ १८ ॥

चतुरमपगतासु कृत्यजातं किमपि विधातुमिवान्तिकात् सखीषु ।
सपदि निरवलम्बनावतस्थे कथमपि नौरिव नाविकैर्विहीना ॥ १९ ॥

अतिचतुरसखीवच क्रमेण व्यपगतसाध्वसभङ्गमुद्वहन्ती ।
प्रियमभिरमयाञ्चकार दूराद्भिमुखशायिकयेव केवल सा ॥ २० ॥
वकुलपरिमलानुकारमाराद्नुभवति स्म विजृम्भमाणमुच्चै ।
भ्रमर इव कृतोरुपक्षपातो वदनसरोरुहसौरभ मृगाक्ष्या ॥ २१ ॥
अभिमुखशयनानुषङ्गलाभादसहत किञ्चिदपत्रपा विमुच्य ।
अनिभृतमसहायबाहुदत्त प्रणयवत परिरम्भमत्रसन्ती ॥ २२ ॥
तदनु च परिरम्भणप्रसङ्गे कुचयुगल करिराजकुम्भकल्पम् ।
सरभससुपगूहति स्म बाला भुजयुगलेन निजेन वेपमाना ॥ २३ ॥
निजभुजयुगलोपगूढगाढस्तनकलशा बहिरेव सा प्रियेण ।
विदलितवलय विभिन्नहार पुलकितमङ्कुचिताङ्गमालिलिङ्गे ॥ २४ ॥
वरतनुरुपगूहनाय गात्रं व्यतरदसोढ न नीविबन्धमोक्षम् ।
मुखमभिमुखमर्पयाम्बभूव क्षणमपि चुम्बनसाहसं न सेहे ॥ २५ ॥
प्रणयिनि परिचुम्बनाय लोले दरपरिवर्तितचारुवक्रपद्मा ।
अभिनवमणिदर्पणाभिरामा सहृदयमर्पयति स्म गण्डपालिम् ॥ २६ ॥
सकपटहसित सखीषु काल्ये विरचितनर्मसु मर्मवेदिनीषु ।
प्रतिगदितुमसावपारयन्ती दरनमितेन मुखेन्दुनावतस्थे ॥ २७ ॥
अतिललितगभीरमानसा सा सविधगता सरसाभिलापदक्षाम् ।
किमपि किमपि मर्म घट्टयन्ती परुषमपश्यदसूयया वयस्याम् ॥ २८ ॥
इति कतिचिदहानि लज्जया सा दयिततमं रमयाञ्चकार तन्वी ।
ननु हरिणदृशामपत्रपैव व्रजति निरूपणतां विदग्धतायाः ॥ २९ ॥
भियमुपशमयस्त्रपां विलुम्पन् मनसि च कामपि धृष्टतां वितन्वन् ।
तरुणिममद एव तां नवोढामतनुत केवलमन्वहं विदग्धाम् ॥ ३० ॥
कतिपयदिवसात्यये वराङ्ग्याः परिणतयौवनमङ्गमुद्वहन्त्याः ।
रतिविधिषु विदग्धतामपूर्वामुपदिशति स्म मनोभवोपदेष्टा ॥ ३१ ॥
अथ परिसरलम्बमानमालापरिमलचञ्चलचञ्चरीकचक्रम् ।
मणिमयनवजालकोपसर्पन्मलयसमीरणमारुरोह सौधम् ॥ ३२ ॥
नरपतिरधिशय्य तत्र शय्या मृदुलमनोहरहंसतूलकल्पाम् ।
अरमयदुचितोपचारदक्षामखिलकलाकुशला मनोनुकूलाम् ॥ ३३ ॥

सरभसपरिरम्भणाभियोगादपगतनीविनिबन्धनं दुकूलम् ।
चलमणिवलयेन सत्रपा सा करकमलेन रुरोध कातराक्षी ॥ ३४ ॥

वलयितकुचकुड्मलोपपीडं[1] प्रणयिनि कुर्वति गाढमङ्कपालिम् ।
अभवदतितरामयत्नमोच्यं विगलितनीवि दुकूलमायताक्ष्याः ॥ ३५ ॥

बहुविधकरणोपयोगरम्यं[2] चलमणिकङ्कणनूपुराभिरामम् ।
मनसिजगुरुणा तदोपदिष्टं सुरतमजायत तत्र चारु यूनोः ॥ ३६ ॥

अगुरुतिलकलाञ्छनं वहन्ती रतिविरतौ सुतरामरालकेश्याः ।
श्रमजलकणवर्षिणा निरुद्धा चिकुरघनेन ललाटचन्द्रलेखा ॥ ३७ ॥

अविरहितमनोज्ञकम्पभाजौ गुरुतरनिश्वसितेद्धमानुपद्गात् ।
असकलनखलाञ्छनौ युवत्याः कुचकलशौ रुचिमुज्ज्वलां दधाते ॥ ३८ ॥

निवसितमभवद्यदेव पूर्वं समुचितसंयमनं रतावपास्तम् ।
सपदि निववसे तदेव वासः प्रकटितनाभि विभिन्ननीवि तन्व्याः ॥ ३९ ॥

मुखकमलमुवाह कान्तिमन्या च्युततिलकं गतचारुपत्रलेखम् ।
वपुरपि सुतनोरवाप शोभां परिमिलितोत्तमलोहिताङ्गरागम् ॥ ४० ॥

प्रविलसदुपभोगचिह्नमङ्गं प्रतिनवकान्तिविभूषणं प्रभाते ।
उपहितबहुमानमैक्षि तस्याः प्रमदविकासितलोचनं सखीभिः ॥ ४१ ॥

अपजयमभिजग्मुषा जनेन स्वयमुपगूहनसाहसं विधेयम् ।
इति पणितवता सखीसमक्षं सह दयितेन वधूरदीव्यदक्षैः ॥ ४२ ॥

निजविजयसमेतमक्षपातं सपदि सखीषु मृषा वितन्वतीषु ।
स्फुरणमधरबिम्बमभ्ययासीदरुणमजायत लोचनं तरुण्याः ॥ ४३ ॥

अथ नवकुसुमप्रवालरम्यामुपवनभूमिमुपेत्य कौतुकेन ।
अचकमत नलः प्रियासहायो विरचयितुं कुसुमापचायकेलिम् ॥ ४४ ॥

उपवनभुवि सा समं सखीभिर्दयिततमस्य समक्षमेव तन्वी ।
प्रतिनवकुसुमेषु दत्तदृष्टिर्भृशमितरेव समाकुला चचार ॥ ४५ ॥

अयमिह बकुलः प्रसूनशाली कुसुमभरानमितोऽयमप्यशोकः ।
अयमपि नवपल्लवो रसालो वरतनु ! पश्य वसन्तमासलक्ष्मीम् ॥ ४६ ॥

---

१. वलयितयोः कुचकुड्मलयोरुपपीड्येत्यर्थः 'सप्तम्यां चोपपीडरुधकर्षः' (३-४-४८) इति णमुल्. २ करणं रतबन्धः

अपचिनु कुसुमानि यान्यमुष्यामुपवनसीमनि भूषणोचितानि ।
इति दयिततमेन सानुशिष्टा तदुदितमाशु चकार चञ्चलाक्षी ॥ ४७ ॥

नवनखपदलक्ष्यबाहुमूल कुचयुगजृम्भणविश्लथोत्तरीयम् ।
वलिरहितविलग्नदृश्यनाभि प्रियमभि सा कुसुमानि सञ्चिकाय ॥ ४८ ॥

अपाचितकुसुमेऽपि सिन्दुवारे तदुपरि सहितसव्यपाणिपद्मा ।
सुमनस इति तन्नखांशुजाल मुहुरितरेण मुधा लुलाव मुग्धा ॥ ४९ ॥

वरतनुकुसुमापचायकेलि सपदि विलोकयतो विलासगर्भाम् ।
अहरत नृपतेर्मनो मनोभूर्भवति हि मोहनमङ्गमङ्गनानाम् ॥ ५० ॥

नरपतिरथ ता शिरीषमृद्वीमुपवनसञ्चरणक्रम निवार्य ।
मणिकनकविभूषणातिरिक्तै स्वकरहृतै कुसुमैरलञ्चकार ॥ ५१ ॥

वनविहृतिभुवा परिश्रमेण प्रकटितघर्मजला प्रियां नरेन्द्रः ।
सलिलविहरणेन मोदयिष्यन्नुपवनकेलिसरः समाससाद ॥ ५२ ॥

सलिलपरिचयोपजातशैत्यो विकचसरोरुहसौरभानुकारी ।
मलयगिरिसमीरणस्तदानी श्रमजलमुद्गतमाचचाम तन्व्याः ॥ ५३ ॥

अथ स दयितया समं सरस्तत् सलिलविहारसकौतुको जगाहे ।
परिचलितसरोजषण्डनिर्यन्मधुकरमण्डलझङ्क्रियाभिरामम् ॥ ५४ ॥

सहविहरणकौतुकेन तस्यास्त्वरितमगाहत तत्सखीजनोऽपि ।
मणिवलयझणत्क्रियाविशेषैर्द्रुतमपसारितहससारसौघ ॥ ५५ ॥

अतिगुरुजघनस्थलावगाहाज्जलमतिवेलमजायताङ्गनानाम् ।
अथ पुनरतिनिम्ननाभिरन्ध्रैश्चुलुकितमाशु नितम्बदघ्नमासाम् ॥ ५६ ॥

सपदि विलिखितोरुरायताक्षी सलिलगतेन नलेन नर्मपूर्वम् ।
प्रियमभिनयति स्म सा सखीनां चलशफरीपरिघट्टनोपजातम् ॥ ५७ ॥

कुचकलशतटाद्विदर्भजाया परिगलितो नवकुङ्कुमाङ्गराग ।
सरसि तत इतो जले विसर्पन् बहिरनुराग इवोद्गतो बभासे ॥ ५८ ॥

उपरि परिगतेन कण्ठदघ्ने पयसि वधूजनवक्त्रमण्डलेन ।
प्रथमविकसितं सरोजलस्थं कमलवन पुनरुक्तशोभमासीत् ॥ ५९ ॥

जलविहृतिजुषा ततो वधूना नयनमवाप्तमतीव पाटलिम्ना ।
नवमधुमदसम्भृतामपूर्वामतिललिता बिभराम्बभूव शोभाम् ॥ ६० ॥

अनिभृतजलकेलिपारवश्यादपगतयावकमप्यहो तरुण्या ।
पुनरधिकतरामवाप लक्ष्मीमधरदल सहजेन पाटलिम्ना ॥ ६१ ॥

अधरदलमयावकं विरेजे नयनमनञ्जनमाप कान्तिमन्याम् ।
वपुरपि सहजेन जातमस्या जनितपरिष्कृति रामणीयकेन ॥ ६२ ॥

इति जलविहृति विधाय तन्व्या सह सलिले कमलोत्पलाभिरामे ।
करिपतिरिव सङ्गत. करिण्या पुनरनया सरस समुत्ततार ॥ ६३ ॥

गुरुनिबिडनितम्बभारसक्तस्फुटजलसिक्तदुकूलमूरुमूलम् ।
विवलितदृशि पश्यति प्रिये सा तमभिजघान नवोत्पलेन तन्वी ॥ ६४ ॥

परिहितवसनस्तया तरुण्या मुदितमना मणितोरणाभिरामम् ।
विरचितविविधोपचारमागादथ निजमन्दिरमिन्दिरानिवासम् ॥ ६५ ॥

इति विविधविहारै रञ्जयन् राजपुत्री
भुवमाशिषदशेषा भूपतिः पुण्यकीर्ति. ।
अयजत विधिपूर्वा दक्षिणाभि· समग्रै·
क्रतुभिरपि महार्हैरश्वमेधावसानैः ॥ ६६ ॥

अजनयदपि पुण्यैरिन्द्रसेनं कुमारं
दुहितरमपि लक्ष्मीसन्निभामिन्द्रसेनाम् ।
ऋषिविबुधपितॄणामित्थमानृण्यमाप्त्वा
निरविशदखिलानि द्वादशाब्दान् सुखानि ॥ ६७ ॥

**इति वामनभट्टबाणकृते नळाभ्युदये**

षष्ठ सर्ग ।

---

## अथ सप्तमः सर्गः ।

हरितां पतय· स्वयंवरं प्रतिनन्द्य त्रिदिव यदागमन् ।
सहसैव तदा व्यलोकयन् पथि सद्वापरमागतं कलिम् ॥ १ ॥

किमिहागमनस्य कारण युवयोरित्यनुयुक्तवान् हरि ।
अवलोकयितु स्वयवर दमयन्त्या इति त कलिर्जगौ ॥ २ ॥

अथ तं निजगाद वासव· समतीत खलु स स्वयवर ।
निषधाधिपति नल वधूरवृणोत् तेन न गम्यतामिति ॥ ३ ॥

कलिराह पुर· शतक्रतुं वद युष्मासु सुरेपु सत्स्वपि ।
अवृणीत वर नलं वधूरवमान भवतां कथं सहे ॥ ४ ॥

अनुमन्य वयं समागता दमयन्तीनलयो समागमम् ।
तमपि त्यज रोषमञ्जसेत्यभिधाय त्रिदिव ययु· सुरा· ॥ ५ ॥

त्रिदिवेषु गतेषु स क्रुधा न्यगदद् द्वापरमान्तिकस्थितम् ।
ज्वलतीव भृश स्वयवरात् प्रतिघात समवाप्य मे मनः ॥ ६ ॥

अवमत्य सुरान् हरित्पतीन् दमयन्तीवरणेन गर्वितम् ।
करवाणि नल पदच्युतं कुरु साहाय्यकमद्य मे सखे! ॥ ७ ॥

इति वाचमुदीर्य सोऽभ्यगादतिरोषाकुलितो नलान्तिकम् ।
अथ तत्समय प्रतीक्षितुर्व्यगमन् द्वादश वत्सरा· कले· ॥ ८ ॥

अवलोक्य परश्रियं खल· परितप्येत विनाप्यपक्रियाम् ।
यदय कलिरभ्यसूयया चकमे ध्वंसयितु पदान्नलम् ॥ ९ ॥

कृतसान्ध्यविधिं ततो नलं चरणक्षालनकर्मणा विना ।
प्रविवेश कलिर्महात्मनामपि रन्ध्राणि गवेषयेत् खलः ॥ १० ॥

अथ तस्य सनाभिमासवान् सह मित्रेण स पुष्कराह्वयम् ।
निजगाद नलेन दीव्यतां सममक्षैर्विजय ददामि ते ॥ ११ ॥

कलिरस्म्यहमेष भूपते! बलवान् द्वापर एष मे सखा ।
विजितिं तव दातुमुत्तमामयमक्षेपु किल प्रवेक्ष्यति ॥ १२ ॥

अचिरेण विजेष्यते भवान् नलमस्यापि पद ग्रहीष्यति ।
अविशङ्कमुपेहि पृष्ठतो मम सन्देहमति च मा कृथाः ॥ १३ ॥

इति तेन स चोदितस्तदा नलमभ्येत्य जगाद पुष्करः ।
सह दीव्य मयाक्षवेदिना ध्रुवमद्यैव भवान् विजेष्यते ॥ १४ ॥

इति पुष्करवाचमुद्धतां निशमय्यासहमेन चेतसा ।
बलिना कलिना प्रचोदित सहसा देवनमन्वमंस्त सः ॥ १५ ॥

वसुधा सकला च सम्पदं पणमाधाय तयोश्च दीव्यतोः ।
नृपतेरभवत् पराजयो विजयः पुष्करभूपतेरभूत् ॥ १६ ॥

अथ मन्त्रिभिराप्तकोविदैर्दमयन्त्या च निवारितोऽपि सन् ।
विजयाय रिपोः पुनः पुनर्विदधे देवनकर्मणि स्पृहाम् ॥ १७ ॥

अथ सा दमयन्त्यनाश्रयं व्यसनासक्तमवेक्ष्य पार्थिवम् ।
सचिवैः सममाह सारथिं भुवि वार्ष्णेय इति प्रथां गतम् ॥ १८ ॥

अयि सूत! सुताविमौ नृपो विजितो नेष्यति दासतां रिपोः ।
अधिरोप्य रथं ततः पुरान्मम पित्रोस्त्वरया नयान्तिकम् ॥ १९ ॥

मतिमान् स रथस्थितौ सुतौ विनिवेश्याथ विदर्भभूपतौ ।
मनुवंशभुवो महामतेर्ऋतुपर्णस्य जगाम सूतताम् ॥ २० ॥

अथ देवनमाचरन् नलो विवशाक्षो विधुरत्वमाययौ ।
वशवर्तिभिरक्षमण्डलैः पुनरेनं स जिगाय पुष्करः ॥ २१ ॥

नगराद् बहिरेव सोऽवसद् दिवसांस्त्रीनशनाययार्दितः ।
सदकुर्वत नागरा जना न च तं पुष्करदण्डभीरवः ॥ २२ ॥

अथ कांश्चिदवेक्ष्य भूपतिः शकुनान् काञ्चनपक्षशालिनः ।
उपगम्य शनैरवास्तृणात् परिधानेन स वृत्तिकार्शितः ॥ २३ ॥

विहगाः परिगृह्य तत्क्षणं परिधानांशुकमस्य भूपतेः ।
परुषाक्षरया गिरा शनैरवदन्नम्बरवर्तिनो नलम् ॥ २४ ॥

अयि पुष्करहस्तवर्तिनो वयमक्षास्त्वदपायहेतवः ।
गमनं हि सवाससस्तव च्युतराज्यस्य न रोचते हि नः ॥ २५ ॥

इति तेषु गतेष्वदृश्यतां दमयन्त्या वसनार्धसंवृतः ।
अवनम्रमुखो विलज्जितो दयितां तामिति नैषधोऽब्रवीत् ॥ २६ ॥

अयि भामिनि! दैववञ्चितो वचनं ते सुहृदां हितैषिणाम् ।
अवमत्य च मन्त्रिणामगां स्थितिमेनामहमक्षदेवनात् ॥ २७ ॥

कथयामि हितं तव प्रिये! सहसा त्वं व्रज कुण्डिनं पुरम् ।
क्रथकैशिकदेशगामिनी पदवी सेयमितो विलोक्यते ॥ २८ ॥

इति तस्य निशम्य भाषितं दमयन्ती कलगद्गदस्वना ।
परिवाहिभिरश्रुभिस्तनौ स्नपयन्ती निजगाद नैषधम् ॥ २९ ॥

अयि जीवितनाथ! पादयोस्तव शुश्रूषणकर्मणि स्थिताम् ।
समदुःखसुखामपासुला कथमन्यामिव मा प्रभापसे ॥ ३० ॥

अथ चेद्रुचिरास्ति ते विभो! सममावामुपयाव कुण्डिनम् ।
जनकस्तव दास्यति ध्रुव सकला सम्पदमत्युदारधी ॥ ३१ ॥

अथ तामवदत् स भूपतिर्दयिते! त्वा न जहामि वल्लभाम् ।
बहुदेशपरिभ्रमाक्षमा भवतीत्येव भृश मम व्यथा ॥ ३२ ॥

यदपि त्वमवोचथा· प्रिये! सह याव क्रथकैशिकानिति ।
व्यसने समुपस्थिते कथ प्रति यास्यामि विदर्भभूपतिम् ॥ ३३ ॥

इति तौ परिदेव्य दम्पती सह यान्तौ परिमुच्य तत्पुरम् ।
पदवीमतिवाह्य भूयसी विपिने कञ्चिदपश्यता सभाम् ॥ ३४ ॥

कठिनातपतापमापुषी श्रमखिन्नामनुकम्प्य ता प्रियाम् ।
स तया सह शिश्रिये सभां शयितु शीतळवातसेविताम् ॥ ३५ ॥

अथ तत्र निषेदुषोस्तयोर्विपिनानोकहपुष्पगन्धिन ।
अपजह्रुरतीव शीतलाः पवमाना· श्रममध्वसम्भवम् ॥ ३६ ॥

अशयिष्ट नलस्तया सम विवश स्थण्डिल एव केवले ।
विधिना विषमेण जायते महतामप्यतिदारुणा दशा ॥ ३७ ॥

महता व्यसनेन पीडितो न च निद्रामुपलब्धवान् नल ।
अवबुध्य ततो व्यतर्कयन्मनसा कातरतामुपेयुषा ॥ ३८ ॥

न रविर्न च मारुतोऽपि या मम पश्यत्यवरोधवर्तिनीम् ।
इतरेव वधूरियं कथ स्वपिति स्थण्डिल एव सुन्दरी ॥ ३९ ॥

मयि दु खिनि दुःखशालिनी कथमेषा विपिने चरिष्यति ।
रहिता तु मयाभियास्यति स्वजनोपान्तिकमध्वगानुगा ॥ ४० ॥

अथ वा पतिदेवतामिमां परिमुञ्चेयमहं कथं वने ।
परिशुष्यति पद्मिनीव या हृतमूला सलिलान्मया विना ॥ ४१ ॥

मम सम्प्रति नैव जायते कलुषे चेतसि कार्यनिश्चय ।
वरमेव वनप्रवासत· सुतनोर्बन्धुजनोपसर्पणम् ॥ ४२ ॥

निरुणद्धि वृथा पृथग्गतिं परिधानीकृतमेकमंशुकम् ।
अथ कर्तनमस्य चेद् भवेद् अपयानं निरपायमेव मे ॥ ४३ ॥

इति निश्चितधीर्व्यलोकयत् सविधे काममपि खड्गवल्लरीम् ।
सहसा परिगृह्य ता नलो वनिताया वसन द्विधाकरोत् ॥ ४४ ॥

अपगन्तुमना विसृज्य ता निदधे तत्र पदानि कानिचित् ।
कलिना कलुषीकृतोऽपि सन् पुनरावर्तत सौहृदेन सः ॥ ४५ ॥

अपहाय पुनर्जगाम ता पुनरेयाय सबाष्पलोचन ।
अकरोदतिचञ्चलाशयो बत दोलेव गतागतं नलः ॥ ४६ ॥

दयिता पतिदेवतामिमा परिरक्षन्तु वनस्य देवता. ।
इति वाचमुदीर्य नैषधो निरगादेव विधेर्नियोगत· ॥ ४७ ॥

अथ सा प्रतिबुध्य तत्क्षणादनवेक्ष्यान्तिकशायिनं पतिम् ।
अवलोक्य च कृत्तमशुक परिचुक्रोश नलस्य वल्लभा ॥ ४८ ॥

विललाप च बाष्पवर्षिणीर्विपिनस्था वनदेवता अपि ।
करुणेन रुतेन कुर्वती कुररीव प्रियसङ्गमोज्झिता ॥ ४९ ॥

अयि जीवितनाथ! किन्नु मा त्यजसि प्राणसमामनागसम् ।
परिहासकथास्वपि प्रभो! न हि ते विप्रियमीषदाचरम् ॥ ५० ॥

कृपया परयार्द्रमानसो न भवानीदृशकर्मनिष्ठुर· ।
मम भाग्यविपर्ययेण ते मतिरेषा परिमोहशालिनी ॥ ५१ ॥

अवयाम्यहमक्षदेवनान्[1] प्रभृति त्वा प्रकृतेः परिच्युतम् ।
परिभूतमतिर्विलोक्यते ननु भूतेन च केनचिद् भवान् ॥ ५२ ॥

फणवानिव चन्दनद्रुमं गुणिनं त्वां प्रविवेश यः खल· ।
अतिदुःखितया स वर्तता यदि सत्य पतिदेवतास्म्यहम् ॥ ५३ ॥

अतिगूढतनुर्वनेऽथवा परिहासं वितनोषि मां प्रति ।
दयया मयि दर्शय प्रभो! परिभूतस्मरमात्मविग्रहम् ॥ ५४ ॥

हरितां पतयोऽवमानिता भवदर्थे हि मया स्वयवरे ।
कुपितास्त इमे वितन्वते ध्रुवमन्योन्यवियोगमावयोः ॥ ५५ ॥

भवतः स्मितचन्द्रिकान्वितं कमनीयं वदनेन्दुमण्डलम् ।
क्षणमप्यनवेक्ष्य जीवितं दमयन्त्या कथमीश! धार्यते ॥ ५६ ॥

इति साविलपन्त्यनाथवन्नलमन्वेष्टुमुदश्रुलोचना ।
विपिनं प्रविवेश दुर्गमं करणीयं च किमप्यजानती ॥ ५७ ॥

---

१ अवगच्छामि

अथ तां करुणप्रला[illegible] ।
विवृतास्यमहागुहो बली निजगाराजगरः क्षुधातुरः ॥ ५८ ॥

तमसा शशिनः कलेव सा सहसैवाजगरेण जग्रसे ।
अहिना कबळीकृतां प्रियामनुकम्पस्व नलेति चाभ्यधात् ॥ ५९ ॥

अथ तत्र यदृच्छयागतो मृगयुर्वीक्ष्य परं दयापरः ।
द्रुतमेत्य कृपाणधारया शितया तस्य वपुर्व्यदारयत् ॥ ६० ॥

अभिषिच्य सरोजलोचना निजमानीय निकेतनं मुदा ।
समपादयदाशु सुभ्रुवः फलमूलाम्बुभिरेव सत्क्रियाम् ॥ ६१ ॥

अयि! कस्य सुतासि कासि वेत्यनुयुक्ता मृगजीविनामुना ।
अखिलं निजवृत्तमादितः कथयामास तदा तलोदरी ॥ ६२ ॥

अतिमानुषरूपसम्पदं कलशाब्धेरिव कन्यकामिमाम् ।
चकमे मृगयुः स्मरातुरो दमयन्ती पुनरेवमब्रवीत् ॥ ६३ ॥

मृगयो! विपदः समुद्धरन् भवसि त्वं मम धर्मतः पिता ।
अत एव मयि त्यज स्पृहां चिरकालं यदि ते जिजीविषा ॥ ६४ ॥

इति तामभिभाषणोद्यतां स बलादाक्रमितुं प्रचक्रमे ।
दमयन्त्यपि शापवह्निना गमयामास तमन्तकालयम् ॥ ६५ ॥

मृगयुं विनिहत्य सा सती निजचारित्रमयेन तेजसा ।
विशरारुशरारु(सकुले) न बिभेति स्म कुतोऽपि कानने ॥ ६६ ॥

पतिमार्गणकौतुकेन सा सरणिं काञ्चिदुपेत्य जग्मुषी ।
अटवीमतिभीषणामगादतितुङ्गद्रुमलम्बिताम्बराम् ॥ ६७ ॥

मृगराजनखाङ्कुशावलीदलिताना वनगन्धहस्तिनाम् ।
मणिभिः शिरसः परिच्युतैः परिकीर्णामुडुमण्डलैरिव ॥ ६८ ॥

तरुकोटरवर्तिपन्नगीमुखनिष्ठ्यूतविषानलार्चिषा ।
परिमुग्धमृगीकदम्बकां परिमूर्च्छत्पटुझिल्लिकारवाम् ॥ ६९ ॥

क्वचिदृक्षगणान्धकारितां क्वचिदुद्दामवराहचेष्टिताम् ।
क्वचिदुत्पलपत्रमेचकैर्हरिणीनां नयनैरलङ्कृताम् ॥ ७० ॥

जनिताहिभयां सकण्टकामभितो वञ्चकयूथशालिनीम् ।
कुनृपालमहीमिव स्थितां परिकीर्णामपि पश्यतोहरैः ॥ ७१ ॥

(कुलकम्)

अथ तामटवीमतीत्य सा विलपन्ती दयित विचिन्वती ।
अवलोकयति स्म विस्मिता गिरिमभ्रलिहशृङ्गसङ्कुलम् ॥ ७२ ॥

कटकच्च्यवमाननिर्झरप्रसरन्निर्भरशीकरोत्करैः ।
परितापविनोदनक्षमं दवसन्तापजुषा तपस्विनाम् ॥ ७३ ॥

शिखरे शिखरे विहारिणां कलकेकानिनदेन बर्हिणाम् ।
रचयन्तमुपान्तवर्तिनां कुशलप्रश्नमिव क्षणे क्षणे ॥ ७४ ॥

(विशेषकम् )

गिरिराज ! विभो ! कृपानिधे ! दयितं मे नलमाशु दर्शय ।
इति त गलिताशयेव सा गिरिमभ्यर्थयते स्म कातरा ॥ ७५ ॥

किमिवाद्भुतमत्र चेतनान् परिपप्रच्छ मृगान् नलस्थितिम् ।
इदमद्भुतमन्वयुङ्क्त यत् प्रतिशैल प्रतिपादप च सा ॥ ७६ ॥

अथ तस्य गिरेरुपान्तिके महितैस्तापसमण्डलैर्वृतम् ।
विषयीकुरुते स्म चक्षुषो दमयन्ती कमनीयमाश्रमम् ॥ ७७ ॥

अथ तानभिवाद्य तापसान् कुशलप्रश्नपरान्निषेदुषी ।
दिवसत्रयकाननभ्रमश्रमखेदापनय चकार सा ॥ ७८ ॥

अथ सा फलमूलतर्पिता परिपृष्टा मुनिभि· कुतूहलात् ।
निजगाद नितान्तखेदिनी निजवृत्तान्तमशेषमादित ॥ ७९ ॥

प्रमुखे तव दुःखमन्ततः शृणु कल्याणि ! सुख भविष्यति ।
अचिराद् दयितेन योक्ष्यसे तनयाभ्यामपि तन्वि ! मा शुचः ॥ ८० ॥

इति ते प्रणिधानचक्षुषो दमयन्तीमपशोकमानसाम् ।
विरचय्य वचोभिरूर्जितैर्मुनयस्तत्र तिरोधिमाययुः ॥ ८१ ॥

क्वचिदप्यनवेक्ष्य सा नलं गुरुशोकोपहता तपस्विनी ।
विपिनभ्रमणानवेक्षिणी सरणि कामपि सा व्यलोकयत् ॥ ८२ ॥

चेदीश्वरस्याथ सुबाहुनाम्न· पुरोपकण्ठं प्रति तत्र यन्तम् ।
ददर्श सार्थं विपिने वरोरु· सह द्विजैस्तत्र जगाम साध्वी ॥ ८३ ॥

रात्रौ पथि द्विरदयूथनिपीडितेन सार्थेन तेन हतशेषवणिग्वृतेन ।
सरक्षिता द्विजगणेन पतिव्रता सा साय विवेश नगरीं कृपणा सुबाहोः ॥ ८४ ॥

तामागतामथ विलोक्य सुबाहुमाता
तेजस्विनीमतिकृशां मलिनार्धवस्त्राम् ।
सत्कृत्य सम्यगनुकम्प्य ततोऽन्वयुङ्क्त
कासि त्वमम्ब! कथयेति दयार्द्रचेता· ॥ ८६ ॥

द्यूते जितेन दयितेन वन गतेन सुप्तौ निकृत्तवसनेन विनाकृताहम् ।
या काचिदस्मि गणिता·पतिदेवतासु मां रक्ष मातरिति ता दमयन्त्यवादीत् ॥

आहूय सा पुनरथात्मसुता सुनन्दा-
मभ्यागता पुनरियं पतिदेवता न· ।
संरक्ष साधु परिगृह्य सखीमिवैना-
मित्यादिदेश च दिदेश तदीयहस्ते ॥ ८७ ॥

लक्ष्मीरिव त्वमतिशोभनविग्रहासि
का त्व शुभे! कथय सम्यगिति ब्रुवत्याम् ।
तस्यां जुगोप निजवैभवमायताक्षी
तद्रक्षिता तदनु तत्र चिर न्यवात्सीत् ॥ ८८ ॥

**इति वामनभट्टबाणविरचिते नलाभ्युदये**
सप्तम सर्ग ।

---

## अथाष्टमः सर्गः ।

ततः प्रसुप्तामपहाय भैमीं व्रजन् नलो दु खपरीतचेता ।
ददर्श दावानलदह्यमानं वनं महज्जन्तुशतानुकीर्णम् ॥ १ ॥

शुश्राव तस्मिन् नल! पुण्यकीर्ते! दहत्ययं दावहुताशनो माम् ।
मामुद्धरास्मादिति दीनदीनं भूतस्य कस्यापि रव महान्तम् ॥ २ ॥

आपद्गतोऽप्यार्तरवं निशम्य विवेश तस्मिन्निषधाधिनाथः ।
स्वयं महान्त· किल दुःखिनोऽपि परस्य दुःखं नतरां सहन्ते ॥ ३ ॥

भयातुर कुण्डलितं फणीन्द्र विलोकयंस्तत्र नलो दयालु ।
पप्रच्छ कोऽसीति स चाहिराज कार्कोटक स्वं कथयाम्बभूव ॥ ४ ॥

ब्रह्मर्षिशापेन न पारयामि पदात् पद गन्तुमितो दवाग्नेः ।
मामन्यतः कर्तुमिहार्हसि त्व श्रेयांसि दीनोद्धरणेन ते स्यु· ॥ ५ ॥

इत्युक्तवन्तं भुजगाधिराजमुवाह दोर्भ्यां निषधाधिराजः ।
तेनोह्यमानो लघुतां जगाम निन्ये स देशं च दवाग्निशून्यम् ॥ ६ ॥

निर्बाधमानीयत भूप्रदेशमुन्मोचितो मृत्युमुखाद् भुजङ्गः ।
उत्स्रष्टुकामं तमुवाच भूयः पदानि सङ्ख्याय नल! व्रजेति ॥ ७ ॥

निधाय भूमौ दशमं पदं स दशेति यावद्गणयाञ्चकार ।
मुखेन मुञ्चन् गरलं करालं तावद् भुजङ्गो दशति स्म भूपम् ॥ ८ ॥

सन्दष्टमात्रो भुजगेन तेन स ह्रस्वबाहुर्विकरालवक्त्रः ।
गात्रेण वैवर्ण्यनिकेतनेन शैलूषवत् प्राप शरीरमन्यम् ॥ ९ ॥

विषप्रभावाद् विकृताकृतिः सन्नात्मानमालोक्य भृशं शुशोच ।
स्वरूपमास्थाय विषण्णमेनं भुजङ्गराजोऽपि पुनर्बभाषे ॥ १० ॥

यथा न जानन्ति परे नलं त्वां तथा मया तेऽन्तरधायि रूपम् ।
अनेन सत्येन न बोध्यसे त्वं किञ्चान्यदप्यस्ति विवेश यस्त्वाम् ॥ ११ ॥

दुराशयो द्यूतपथोपदेष्टा त्वद्गात्रलग्नेन स मे विषेण ।
दिवानिशं तापमुपैतु तिष्यो न तेऽस्तु तापो मदनुग्रहेण ॥ १२ ॥

इतः परं ते मदनुग्रहेण विषप्रयुक्ता न भवेच्च पीडा ।
सन्धाय सीमास्वपि शौर्ययुक्तान् विजेष्यसे त्वं विमतानशेषान् ॥ १३ ॥

कृत्वा भवान् बाहुकनामधेयं पुरीमयोध्यामृतुपर्णनाम्नः ।
इक्ष्वाकुवंशप्रभवस्य राज्ञो गत्वा सहानेन करोतु सख्यम् ॥ १४ ॥

तुरङ्गमाणां हृदयं ग्रहीष्यन्नक्षस्य दाता हृदयं तवासौ ।
विरोधिनं तेन विजित्य राज्यं करिष्यसि त्वं सकलत्रपुत्रः ॥ १५ ॥

दास्यामि दिव्ये नृप! वाससी ते यदा निजं रूपमवाप्तुमिच्छा ।
मद्रूपमन्तःकरणे निधाय तदार्हसि त्वं परिधातुमेते ॥ १६ ॥

आदिश्य राजानमिति प्रहर्षादन्तर्दधे तत्र भुजङ्गराजः ।
नलोऽप्यगाद् बाहुकनामधेयः पुरीमयोध्यामृतुपर्णनाम्नः ॥ १७ ॥

अभ्यागतं तं पटुमश्वयाने शिल्पेषु सर्वेषु च दाक्ष्यवन्तम् ।
नियोजयामास नृपः प्रतीतस्तुरङ्गमाणां द्रुतमाधिपत्ये ॥ १८ ॥

ततः स वार्ष्णेयममुष्य सूतं सूतं स्वकं जीवलनामधेयम् ।
कार्येषु सर्वेष्वपि बाहुकस्य साहाय्यकं कर्तुमुभौ न्ययुङ्क्त ॥ १९ ॥

ततो वियुक्तामनुचिन्त्य भैमीं पथ्यदेशात् प्रलपन्नजस्रम् ।
अलब्धनिद्रो नृपतिः पुरीं तामज्ञातवासश्चिरमध्युवास ॥ २० ॥

इत्थं तदा द्यूतहृताधिपत्ये नष्टे नले तत्र सहैव भैम्या ।
भीमो नृपः शोकसमाकुलात्मा विवेद न क्वापि तयोः प्रवृत्तिम् ॥ २१ ॥

विज्ञातुकामश्च तयोरुदन्तं प्रस्थापयामास बहून् द्विजेन्द्रान् ।
तद्दर्शने साङ्गिरते स्म तेषां ग्रामेण सार्धं च गवां सहस्रम् ॥ २२ ॥

अन्वेषमाणाः पृथिवीमशेषां ते बभ्रमुस्तेषु सुदेवनामा ।
पुण्याहहेतोर्निबिडं द्विजेन्द्रैश्चैदीश्वरस्यालयमाससाद ॥ २३ ॥

ततस्सुनन्दासविधे वसन्तीमपश्यदन्यामिव भीमकन्याम् ।
पत्युर्वियोगप्रभवं विषादं प्रत्यक्षयन्तीं वपुषा कृशेन ॥ २४ ॥

मन्दप्रकाशां मलपङ्कदिग्धां शिखां कृशानोरिव धूमनद्धाम् ।
दीनां दिनानामिव चन्द्रलेखां नदीमिव क्षीणजलां निदाघे ॥ २५ ॥

ततः सुदेवः समुपेत्य भैमीमभाषत स्वस्तिगिराभिवर्ध्य ।
कल्याणि ! भीमस्य पितुः सकाशान्नष्टां विचेतुं भवतीमिहागाम् ॥ २६ ॥

नलस्य जामातुरदर्शनेन तथा भवत्याः क्लशमानमासौ ।
भीमो नृपः सा जननी तवापि कष्टां दशामन्वहमश्नुवाते ॥ २७ ॥

वार्ष्णेयनीतौ सुखिनौ सुतौ ते सुखान्वितो बन्धुजनोऽप्यमीषाम् ।
अस्त्येव शोकोऽयमदर्शनेन विनष्टयोर्वां विपिनान्तराळे ॥ २८ ॥

श्रुत्वा सुदेवस्य गिरं मुदा तं ननाम बाष्पाकुलिताक्षिपद्मा ।
पप्रच्छ विज्ञातचरं द्विजं सा पुनः पुनर्बन्धुजनस्य वार्ताम् ॥ २९ ॥

दृष्ट्वाह तं प्राह सुबाहुमाता कैषाथवा कस्य वधूर्वराङ्गी ।
केन प्रयाता वनवासदुःखमाचक्ष्व विप्राखिलमञ्जसेति ॥ ३० ॥

ततः सुदेवो निजगाद सैषा भीमस्य पुत्री दमयन्त्यभिख्या ।
भर्त्रा समं द्यूतपराजितेन विभ्रष्टराज्येन वनं प्रविष्टा ॥ ३१ ॥

अस्याश्च पत्युश्च गवेषणाय भीमेन विप्राः शतशो नियुक्ताः ।
भाग्येन मे हन्त पुराकृतेन सैषा चिरादक्षिपथं प्रयाता ॥ ३२ ॥

अथ द्विजातेर्वचनं निशम्य विमुक्तबाष्पाम्बु सुबाहुमाता ।
आश्लिष्य भैमीं सहसा बभाषे पुत्रीमिवैनां बहुमन्यमाना ॥ ३३ ॥

अह च माता च तवापि वत्से! सुते दशार्णाधिपते सुदाम्न ।
तस्मात् सुता मे भवसि त्वमेवमालोक्य शोचाम्यतिथीकृता त्वाम् ॥ ३४ ॥

अस्मिन्ननाथेव गृहे मदीये तूष्णी सुनन्दासविधे न्यवात्सी. ।
तव स्वरूपाकथनेन साहमभूवमेव खलु मन्दभाग्या ॥ ३५ ॥

इत्यूचुषी ता विनयेन भैमी विज्ञाय मातुर्भगिनी प्रणम्य ।
आलिङ्ग्य भूयोऽपि सबाष्पकण्ठामुवाच सा मातरमादरेण ॥ ३६ ॥

सुख न्यवात्स साविधे भवत्या मत्त सुनन्दा मनुषे न मान्याम् ।
बन्धाववज्ञातचरेऽपि पुसा मुह्यन्ति चित्तानि विनैव हेतुम् ॥ ३७ ॥

मातु. प्रिय कर्त्तुमिहार्हसि त्वं ममाधुना नैव सहे विलम्बम् ।
मया च पित्रा च शिशू वियुक्तौ दीनौ भवेतामियता दिनेन ॥ ३८ ॥

तन्मां विदर्भाधिपते. सकाशं प्रस्थापयेथा निजसैन्यगुप्ताम् ।
अभ्युत्सहे बन्धुजनावलोकादन्तर्गत शोकतमो निहन्तुम् ॥ ३९ ॥

आकर्ण्य माता वचन तदीय निवेद्य पुत्राय तदेतिवृत्तम् ।
आरोप्य भैमी चतुरन्तयानं प्रस्थापयामास पितु सकाशम् ॥ ४० ॥

अन्वीयमाना महता बलेन द्विज पुरस्कृत्य सुदेवसंज्ञम् ।
विश्रम्य विश्रम्य पथि प्रयाणे समाससाद क्रमशो विदर्भान् ॥ ४१ ॥

अमान्तमन्तःकरणप्रमोदमङ्गेन रोमाञ्चमयेन मुञ्चन् ।
प्रत्युज्जगाम क्रथकैशिकेन्द्रस्तदा प्रसूता च सुतां स मेने ॥ ४२ ॥

सा तत्र मातापितरौ प्रणम्य प्रमोदयामास चिराय बन्धून् ।
परा मुदं पौरजनः प्रपेदे लब्ध्वेव नष्ट द्रविण दरिद्रः ॥ ४३ ॥

इत्थं विनष्टा तनयामवाप्य प्रमोदमान. क्रथकैशिकेन्द्रः ।
ददौ सुदेवाय यथाप्रतिज्ञं ग्राम सहस्र च गवामुदारः ॥ ४४ ॥

सम्मानिता सातिशयं पितृभ्यामेकामुषित्वा रजनी प्रभाते ।
सन्दर्शन पत्युरवेक्षमाणा शोकातुरा मातरमाबभाषे ॥ ४५ ॥

पतिव्रतानां किल मानुषीणां मातः! पतिं दैवतमामनन्ति ।
विनाकृताया मम तेन पत्या किं वा फलं जीवितधारणेन ॥ ४६ ॥

वाञ्छा यदि स्यान्मम जीविते ते पत्युर्यतेथा परिमार्गणाय ।
निवेदयेथा जनकाय मे त्वं सञ्चिन्तयेदेष तदभ्युपायम् ॥ ४७ ॥

तथेति तस्या॰ प्रतिपद्य वाच भीमाय राज्ञी कथयाञ्चकार ।
स चिन्तयामास वने विनष्टमन्वेषयिष्यन् पतिमात्मजाया ॥ ४८ ॥
पर्णादमुख्यानथ स द्विजेन्द्रान् परेङ्गितज्ञानकलाविदग्धान् ।
आहूय समान्य विदर्भराज प्रस्थापयामास नल विचेतुम् ॥ ४९ ॥
वासांसि रत्नानि वसूनि दत्वा समुत्सुका सा पतिदर्शनेन ।
समानयन्ती मधुरैर्वचोभिस्तानाह भैमी रहसि द्विजेन्द्रान् ॥ ५० ॥
ग्रामेषु देशेषु पुरेषु यूय प्रच्छन्नवेषेण परिभ्रमन्त ।
दारिद्र्यदोषादिव याचमाना भर्त्तारमन्विच्छत मे विनष्टम् ॥ ५१ ॥
प्रशान्तसत्त्वेषु तपोधनाना महात्मनामाश्रममण्डलेषु ।
निजेन रूपेण वसेत् स कि वा रूपान्तरं किञ्चन धारयेद्वा ॥ ५२ ॥
परिच्युत स्वस्य पदात् समृद्धात् स वृत्तये याचितुमक्षम सन् ।
कन्दस्य मूलस्य फलस्य हेतोर्वनेषु कि वा वसति विदध्यात् ॥ ५३ ॥
सभासु सर्वासु महीसुराणा नरेश्वगणामपि मन्दिरेषु ।
गृहेषु वाप्युत्सवसङ्कुलेषु वदन्तु मे वाचमिमा भ्रमन्त ॥ ५४ ॥
को वा नृशंस पुरुषो विमुञ्चेत् कृत्तार्धवस्त्रा कृपणां प्रसुप्ताम् ।
भार्यां प्रियां प्राणसमामनाथा कृपाविहीनो विजने वनान्ते ॥ ५५ ॥
इत्यूचुषा वो वचनप्रसङ्गे य कोऽपि तिष्ठेद्यदि दत्तकर्ण ।
प्रत्युत्तरं वा भवता प्रदद्यात् ज्ञेय स कोऽसाविति यत्नपूर्वम् ॥ ५६ ॥
यद्यस्ति तेनाभिहितं वचस्तन्मह्य भवद्भि प्रतिपादनीयम् ।
वैराग्यभाजो विषयार्थिनोऽपि चिकीर्षित तस्य च वेदनीयम् ॥ ५७ ॥
इति निगदितवत्या तत्र भैम्या निदेशान्नलविचयनकृत्ये नित्यबद्धाभिलाषा ।
गिरिवनपुरदेशग्रामसौभाग्यलक्ष्मी(इठ)हृतमनसस्ते बभ्रमु॰ क्ष्मामशेषाम् ॥ ५८ ॥

इति वामनभट्टबाणविरचिते नलाभ्युदये

अष्टम सर्ग समाप्त ।



१ 'प्रसितोत्सुकाभ्या तृतीया च' (२-३-४४) इति तृतीया

TRIVANDRUM SANSKRIT SERIES.

NO VIII.

# THE PRADYUMNÂBHYUDAYA

OF

# RAVI VARMABHÛPA.

Edited with Notes

BY

T GANAPATI ŚÂSTRÎ

*Curator of the Department for the publication of Sanskrit manuscripts,*

TRIVANDRUM

---

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

---

TRIVANDRUM

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS

1910

---

॥ श्रीः ॥

अनन्तशयनसंस्कृतग्रन्थावलिः.

ग्रन्थाङ्कः ८.



# प्रद्युम्नाभ्युदयं

रविवर्मभूपेन

विरचित



संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितं

लघुटिप्पण्या च संयोजितम् ।



तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितम् ।



कोळम्बाब्दाः १०८५, क्रैस्ताब्दाः १९१०.

# PREFACE.

Four manuscripts were examined in bringing out the present edition of Pradyumnâbhyudaya. They were obtained from the Palace Library and are between two and three hundred years old. Sanskrit renderings for the Prakrit passages of the text are not given in any of them. The manuscripts are referred to in the foot-notes as क, ख, ग and घ. The last one घ is an incomplete [illegible]pt.

The story of the drama relates to the exploits—famous in legends—of Pradyumna, son of Srîkrishna. The portions of the story comprised in each act of the play are detailed in the table of contents.

By its variety of expression and elegance of stlye, its pure diction and choice vocabulary this drama should, I think, in no way be classed as inferior to Nâgânanda of Srî-Harsha and other similar works. It is not surprising that this drama is not known as it deserves even in the land of its birth—not to speak of its publicity abroad—when we remember that many are the rare poetical gems like Tapatî-samvarana that have been allowed to lie buried even in their native country of Kerala.

The author Ravivarma Deva *alias* Sangrâma Dhîra and king of Kolambapura is described in the prelude to the drama as the son of Jayasimha of the family of Yadus and descendant of the Lunar race. He is also stated to be well-versed in music and poetry. The prelude also discloses that our author is a devotee of Padmanâbha from the statement that he wishes the play to be enacted at the यात्रोत्सव or festival of Padmanâbha and the description of Padmanâbha as यादव-नृपकुलदैवत.

Samudrabandha[1], the author of a commentary on Alankârasarvasva states that his work[2] is based on the commentary of that work as propounded by Ravivarma Deva at the request of the Pandits at his court, thus —

"कदाचिन्मङ्खुकोपज्ञ काव्यालङ्कारलक्षणम् ।
प्रदर्श्य रविवर्माणं प्रार्थयन्त विपश्चितः ॥
गम्भीरं [illegible] मङ्खुकग्रन्थसागरम् ।
नौरस्तु भवतः प्रज्ञा स्थेयसी यदुनन्दन ! ॥

. . . . . .

इत्युक्तैष [illegible]भूतवासवाचार्यः ।
बुधपरिषदलङ्कारे [illegible] ॥
अवधृत्यै यदुपतिना विवृतस्य [illegible] ।
कश्चिद् व्यधित [illegible]" ॥

In illustrating the Alankâras, Samudrabandha eulogises Ravivarma Deva and in so doing largely uses the same epithets as those by which our author is described in the present work, thus —

"यद्याकाङ्क्षसि वीक्षितुं गुणरुचे ! चेत ! समस्तान् गुणान्
कोलम्बाख्यमुपेहि दक्षिणदिशासीमन्तरत्नं पुरम् ।
आस्ते यत्र भुजेन कीर्तिशशिन पूर्वाचलेनोद्वहन्
उर्वीमर्णवमेखला यदुपतिः कल्पद्रुमो जङ्गमः ॥
अर्जुनगुणानुरागी रक्षितगोमण्डलो बलज्येष्ठः ।
यदुपतिरभिमतसत्यः शरदयुतं जयति विबुधहितनिरत. ॥
सङ्ग्रामधीरनृपतिर्भीरुरवर्मादिभिरुराहवन ।
शुश्रूषुर्निगमविदस्तद्वाक्यविदो भवन्त्यशुश्रूषु" ॥

---

1 Simharâja, the author of Prâkrita Rupavatâra which, I understand, is in course of publication by Professor Hultzsch, calls himself the son of Samudrabandha Yajvan. It is probable, from the rarity of these names समुद्रबन्ध and समुद्रबन्धयज्वन्, that they refer to the same person and that Samudrabandha got the title of Yajvan after he compiled the commentary on Alankârasarvasva.

2. There is a palm leaf manuscript of this work about 300 years old in the library of H. H. the Maharaja.

Thus it is evident that our author and the Ravivarma Deva referred to by Samudrabandha are identical and that his fame was made the subject matter of a poet's song. In illustrating रशनोपमा (a figure of speech in Sanskrit rhetoric) Samudrabandha addresses the king as कूपकभूपति —

"वपुरिव मधुरं वचः प्रसन्न वच इव कूपकभूपते! मनस्ते" ।

That this epithet is also in reference to our author is evident from the following slokas in Sukasandesa —

"कूले भान्तीमिव कुलपुरीं [illegible]
[illegible] पश्य रत्नाकरस्य ।
भूयोऽप्यात्मन्नमथनभिया तेन विश्वोपभोग्ये
न्यस्तेवास्मिन्नुदरकुहराद् या पुरा रत्नभूता ॥ ५४ ॥

.... ... . . ... ... .......

लोकत्रय्यामखिल[illegible]
कोलम्बेऽस्मिन् क्वचन भवतः कोऽपि मा भूद् विलम्बः ।
अल्पीयस्यामपि परिचितावन्यदेशातिशायि-
न्याश्चर्याणामहमहमिका कस्य कर्षेन्न चेतः ॥ ५६ ॥
अग्रे सिन्धुद्वयमथ पुरी काप्यमीषाममुष्यां
[illegible] केतुलोलैर्दुकूलैः ।
व्यङ्ग्योत्तंसैरिव रसविदः सत्कवीनां प्रबन्धैः
प्रीतिर्मन्ये मनसि भवतः स्फीततामेष्यतीति ॥ ५७ ॥
अर्हद्भ्यो यः स्वमिह विभजन्नाश्रमाणां चतुर्णा-
मग्र्यं धर्मं कथयति नृणां कर्मणा केवलेन ।
वन्द्यश्छन्दोरहसि विहरन् वल्लभग्रामवासी
केशिध्वंसी निजपदजुषां क्लेशहन्ता स देवः" ॥ ५८ ॥

which show that Kolamba is the capital of the country of Kûpaka, and that the town of Kolamba is none other than the modern Kollam or Quilon is clear from its being described as situated north of Trivandrum and south of Srîvallabha or Tiruvalla.

There are three inscriptions in which reference is made to king Ravivarma of Kerala All these have been reproduced in the Epigraphia Indica, two by Professor Kielhorn (Vol IV pp. 145-152) and one by Professor Hultzch (Vol VIII pp 8-9) The first is taken from a wall in the Vaishnava temple of Arulalaperumal in Conjeevaram and runs as follows :—

"स्वस्ति श्रीजयसिंह इत्यभिहित. सोमान्वयोत्तंसको
राजासीदिह केरलेषु विषये नाथो यदुक्ष्माभृताम् ।
जातोऽस्माद्[illegible] कुमारः शिवाद्
देहव्याप्य (११८८) [illegible] समये देहीव वीरो रसः ॥
क्षयं नीत्वा सोऽद्य [illegible]
जयश्रीवत् कृत्वा निजसहचरीं पाण्ड्यतनयाम् ।
अ[illegible] यश इव ययौ केरलपद
ररक्ष स्वं राष्ट्रं नगरमिव कोलम्बमपि च. ॥
जित्वा सङ्ग्रामधीरो नृपतिरधिरण विद्विषं वीरपाण्ड्यं
कृत्वासौ पा[illegible] चोलान् नय इव तनुगान् केरलेभ्योऽप्यधीनान् ।
षट्चत्वारिंशदब्द[illegible] तटभुवि मकुटं धारयन् [illegible]
क्रीडां सिंहासन[illegible] महीकीर्तिवाणीरमाभि ॥
कृत्वा केरलचोल[illegible] पाण्ड्यविजय [illegible]
सङ्ग्रामापजयेन [illegible] तं वीरपाण्ड्यं रिपुम् ।
नीत्वा स्फीतबल ततोऽपि विपिनं नीत्वा दिशामुत्तरां
काञ्च्या[illegible] चतुर्थमब्द(?) [illegible] सङ्ग्रामधीरो नृपः ॥
आमेरोरा मलयाद[illegible] पूर्वादा च पश्चिमाद् [illegible] ।
यदुकुलशेखर एष क्षोणीं कुलशेखरः स्वय बुभुजे ॥

स्वस्तिश्री-चन्द्रकुलग[illegible]प्रदीप-यादवनारायण-केरलदेशपुण्यपरिणाम-नामान्तरकर्ण--कूपकसार्वभौम- कुलशिखरप्रतिष्ठापितगरुडध्वज--कोलम्बपुरवराधीश्वर-श्रीपद्मनाभपदकमलपरमाराधक-प्रणतराजप्रतिष्ठाचार्य-विगतराजबन्दीकार धर्मतरु--मूलकन्द-सद्गुणालङ्कार-चतुष्पष्टिकलावल्लभ-दक्षिणभोजराज सङ्ग्रामधीर-महाराजाधिराज-परमेश्वर-जयसिंहदेवनन्दन-रविवर्ममहाराज-श्रीकुलशेखर-त्रिभुवनचक्रवर्ती

கோனேரின்மை கொணடான காஞசீபுரததில திருவததியூரில நினறருளிய அருளாளபபெருமாள கோயில திருபபடி ஸ்ரீவைஷணவாகளுககு பெருமாள அருளாளபபெருமாளுககு நமபேரால கடடின குலசேகரன சநதிககு அமுதுபடி சாததுபபடி உளளிடட பலவெஞசனததுககும ஆவணி மாததது எழுநதருள நமபேரால கணட திருநாளுககும திஙகள திருநாளுககும அமுதுபடி சாததுபபடி உளளிடட வெஞசனததுககும, திருககொடை"

The second is from the famous pagoda at Srirangam an runs thus —

"स्वस्ति श्रीजयसिंह इत्यभिहितः ...... . . . ॥

क्षय नीत्वा सोऽयं. .. .... .. .. ॥

जित्वा सङ्ग्रामधीरो. . ......... . .. .. . ॥

आमेरोरा मलयात् ........ .................... ॥

स्वस्ति श्री चन्द्रकुलमङ्गलप्रदीप. . ... .श्रीकुलशेखरदेवः ।

कृत्वा दुर्नयवैरिनैर्ऋतशमं सस्कारसशोभिते
निद्राणामविदेवतां निरुपमैरभ्यर्च्य माल्यादिभिः ।
धर्मैरन्तरधिष्ठिते सहृदयैः सङ्ग्रामधीरः कृती
रङ्गेऽस्मिन् सुमनोविवासमकरोल्लास्ये नियोज्य त्रयीम् ॥
लब्धा सागरनेमिभूमिविषया रन्तुं प्रतिष्ठा यत-
स्तस्मै श्रीकुलशेखरो यदुपतिस्त्रिक्षत्रचूडामणिः ।
रङ्गेऽस्मिन् कमलासखाय हरये रम्यां प्रतिष्ठां ददौ
सन्तः प्रत्युपकुर्वते ह्युपकृताः सर्वे किमत्राद्भुतम् ॥
भूपालैरिलकार्तवीर्यसगरैर्यः पूर्वमासीत् कृतः
पश्चात् प्रौढतमोहरं यदुपतिस्तं भद्रदीपोत्सवम् ।
चक्रे शक्र इवाश्रयः सुमनसां सम्राट् त्रयीधर्मविद्
रङ्गेऽस्मिन् रुचिराङ्कसंश्रितरमारोचिष्णवे विष्णवे ॥
सम्राजामिव यः सतां समुदभूत् तैस्तैर्गुणैर्मातृका
सैषः श्रीकुलशेखरः शतभिषक्तारे सकन्यारवौ ।
भट्टेभ्यः पुरतोऽत्र रङ्गनृपतेः पञ्चाशते(?) साक्षिणः
प्रत्येकं प्रतिहायनं पणशत दातुं प्रतिष्ठां व्यधात् ॥

कविभूषणस्य

स्वस्ति [illegible] रविवर्मणे ।
[illegible] ॥

दुर्बलस्य बलं राजेत्येषा सत्या सरस्वती ।
[illegible] धर्मस्य दुर्बलस्य बल कलौ ॥

रविश्च रविवर्मा च द्वाविमौ तेजसां निधी ।
[illegible] स्वहर्निशम् ॥

कृष्णश्च रविवर्मा च यदुवंशोद्भवावुभौ ।
एको [illegible] ॥

[illegible] रविवर्ममहीपते ! ।
पुष्पाभिषेको भूपाना [illegible] ॥

[illegible] या करोषि रवे ! महीम् ।
ज्ञाता दाता सतां पाता महतां कि न दुष्करम् ॥

सङ्ग्राम [illegible] ! त्वद्राज्यं चोरो नास्तीति वाङ् मृषा ।
[illegible] विग्रह स्वयम् ॥

दृष्ट्वा [illegible] त्वा पर बिभ्यति तद्वरम् ।
[illegible] द्रष्टु बिभेषि त्वं हि सर्वदा ॥

एकः स्वादु न [illegible] कि न श्रुत वचः ।
एकः स्वादु जगत् सर्वं भुङ्क्ते [illegible] ॥

कथं दक्षिणभोज ! त्वा ब्रुवते [illegible] ।
दत्त सव्यः सदा पश्चाद [illegible] बुध्यसे ॥

रिपूनेको [illegible] रणे मा हव्य यादव ! ।
बाहु, खड्गो मनो वाजी सहायाः किं न सन्ति ते ॥

प्रायो न [illegible] राज्ञा [illegible] ।
सतां सहचरी हंसि रविवर्मन् ! [illegible] ॥

धनं सर्वं [illegible] ते यादव ! व्रतम् ।
ब्रह्माण्डभाण्डभागेऽस्मिन् [illegible] यशोधनम् ॥

सेव्यस्तैस्तैर्गुणैरेव सांव [illegible] यद्ददासि नः ।
एषा यदुपते ! सत्यमिक्षुभक्षणदक्षिणा ॥

... । सिंहासन ... ।
... लोके स्थावरा एव भूभृतः ॥
सङ्ग्रामधीर इत्येत मन्त्रं पञ्चाक्षरं बुधाः ।
जपन्तो दुर्गतिं जित्वा प्राप्नुवन्ति परं शिवम् ॥
इति यादवकीर्तीन्दोः कलाः षोडशसूक्तय. ।
उल्लासयन्तु कुमुद भूषणे पर्वाणि स्फुटा. ॥
अतसीचम्पकच्छ्रौ तुलसीकी... ।
यदुनाथौ नाथौ नः ... ॥
कविभूषणस्य"

The third is from the Saivait temple of Vîrastâneswara in the village of Thiruvadi (near Panrutti, South Arcot District) and is as follows —

"स्वस्ति श्रीजयसिंह इत्यभिहितः ... . .... ॥
क्षय नीत्वा सोऽय .. ... . ॥
जित्वा सङ्ग्रामधीरो .. .. ॥
आ मेरोरा मलयात् . ॥
स्वस्ति श्रीचन्द्रकुलमङ्गलप्रदीप . . . . श्रीकुलशेखरदेवः ।

இவறகு யாணடு நாலாவது கலியுக வருஷம 4414 இதில நீஙகிய ச. 35 இதன மேல செல்லாநினற மகர நாயறறு பூரு வபக்ஷத்து ஏகாதசியும சனிககிழமையும பெறற ரோகிணி நாள திருவதிகையுடையாற திருவீரட்டானம உடைய நாயனாற கோயில வாணைகையிலாயத் திருமலை ஸதாபிபாயநதமாக திருமஞசனமும பணணி புரசசரணத திருககலசமும சாறறியருளிநாற ரவிவாம ம காராஜன பெருமாள குலசேகர தேவற

स्वस्ति श्री"

From the attributes regarding family, parentage etc. given in these inscriptions, it being evident that the Ravivarma therein mentioned is none other than the author of Pradyumnâbhyudaya, these inscriptions further reveal the achievements of our author such as the conquest of the Pandya Kingdom — this is in keeping with his title of Sangrâma-

**Dhîra i e. the bravo in battle—his coronation at Conjeevaram etc.**

It is a matter of extreme gratification to us who have not till now heard of any king of Kerala whose fame has spread to foreign lands that we are at present in a position to announce with certainty that king Ravivarma of Kolamba born in Saka 1188 (A D 1265) in the country of Kerala was renowned for his conquest of the countries as far as Conjeevaram, no less than for his matchless skill as a poet Furthermore, from the similarity of the references regarding the Yadava family and devotion to Srî Padmanâbha, we can also state that king Ravivarma might, in all probability have been an ancestor of His Most Gracious Highness the present Maharaja of Travancore

**T. Ganapati Sâstrî.**

# निवेदना ।

अस्य **प्रद्युम्नाभ्युदयस्य** संशोधनाधारतया चत्वार आदर्शा द्वित्रशतवर्षवृद्धा राजकीयग्रन्थशालाया आसादिताः । क ख-ग-घ-चिह्नितेषु तेषु घ-सञ्ज्ञ एकोऽसमग्रः । प्राकृतस्यच्छाया तु नैकस्मिन्नप्यादर्शे दृष्टा ।

अत्र श्रीकृष्णसूनोः प्रद्युम्नस्याभ्युदयलक्षणमितिहासप्रसिद्धं कथावस्तु प्रतिपाद्यं, यस्य प्रत्यङ्कस्था विभागाः पृथक् सूचिकायामावेदिता ।

ग्रन्थोऽयं भणितिवैचित्र्यस्य वृत्तिसौष्ठवस्य पदवाक्यपरिशुद्धेश्च पर्यालोचनाया **नागानन्दादे**र्नाटकस्य नाधस्ताद् मन्ये भवितुमर्हति । नाटकमिदमीदृशमपि न केवलं देशान्तरेषु, स्वाभिजनदेशेऽपि न प्रथत इति नैतदद्भुत, यस्मादितोऽपि बहुतरगुणोज्ज्वल **तपतीसंवरणा**दिक केरलदेशप्रभव काव्यरत्नजात स्वाभिजने स्वपित्येव केवलमद्यापि ।

अस्य नाटकस्य प्रणेता **कोलम्बपुरेश्वर**श्चन्द्रवश्यो यदुकुलजन्मा सङ्गीतसाहित्यविद्याविचक्षणो **जयसिंहसूनु** **सङ्ग्रामधीरा**परनामा **श्रीरविवर्मदेव** इति प्रस्तावनाया वर्णितम् । तत्र स्वप्रणीतस्य रूपकस्य श्रीपद्मनाभयात्रोत्सवे प्रयोगं शंसता पद्मनाभ च 'यादवनृपकुलदैवतस्य' इति विशिंषता कविना पद्मनाभभक्तत्वमप्यात्मन आविष्कृतम् । अस्ति **समुद्रबन्ध**नाम्ना विदुषा कृता काचिद् **अलङ्कारसर्वस्वस्य** व्याख्या, यस्यास्तालपत्रात्मक एक आदर्श उपत्रिशतवर्षवृद्धो राजकीयग्रन्थशालायामुपलभ्यते । ग्रन्थोऽय **सङ्ग्रामधीरा**परपर्यायेण **कोलम्बपतिना** **रविवर्मदेवेन** स्वसभासदभ्यर्थितेन व्याख्यातस्यैवा**लङ्कारसर्वस्वा**र्थस्य प्रतिपादक इति **समुद्रबन्धो** वक्ति । यथा—

"कदाचिन्मङ्खुकोपज्ञं काव्यालङ्कारलक्षणम् ।
प्रदर्श्य **रविवर्माणं** प्रार्थयन्त विपश्चितः ॥
गम्भीर नस्तितीर्षूणां मङ्खुकग्रन्थसागरम् ।
नौरस्तु भवतः प्रज्ञा स्थेयसी यदुनन्दन! ॥

---

१. प्राकृतरूपावतारग्रन्थस्यान्ते तत्कर्ता **सिंहराज** आत्मान **समुद्रबन्ध**यज्वसूनु वक्ति । नामापूर्वत्वात् स एवाय समुद्रबन्ध कदाचिद् भवेत् । यज्वत्व चालङ्कारसर्वस्वव्याख्यानरचनोत्तरकालसिद्ध स्यात । प्राकृतरूपावतार तु इ. **हुल्ष**नाम्ना जर्मनिदेशोद्भवेन पण्डितमहाशयेन सशोध्य प्रकाश्यमानमधुना जानीमः.

इत्युक्त्वैष मनीषावैभवपरिभूतनासवाचार्यः ।
बुधपरिषदलङ्कारो व्याख्यदलङ्कारसर्वस्वम् ॥
अवधूत्य यदुपतिना विवृतस्य गरीयसस्तदर्थस्य ।
कश्चिद् व्यधित विपश्चिच्छब्दनिबन्ध समुद्रबन्धाख्य॰" ॥

इति । अलङ्कारोदाहरणप्रसङ्गे च बहुत्र स रविवर्मदेवमुपश्लोकयति, विशिनष्टि च नाटककर्तृरविवर्मदेवसाधारणैरुक्तैर्विशेषणै । यथा—

"यद्याकाङ्क्षसि वीक्षितु गुणरुचे! चेत! समस्तान् गुणान्
कोलम्बाख्यमुपेहि दक्षिणदिशासीमन्तरत्न पुरम् ।
आस्ते यत्र भुजेन कीर्तिशशिन पूर्वाचलेनोद्वह-
न्नुर्वीमर्णवमेखला यदुपति॰ कल्पद्रुमो जङ्गम ॥
अर्जुनगुणानुरागी रक्षितगोमण्डलो बलज्येष्ठ॰ ।
यदुपतिरभिमतसत्य शरदयुत जयति विबुधहितनिरत ॥
सङ्ग्रामधीरनृपतिर्भीरुरधर्मादभीरुराहवत ।
शुश्रूषुर्निगमविदस्तद्ब्राह्मविदो भवत्यशुश्रूषु" ॥

इत्यादि । तेनास्य रविवर्मदेवस्योक्तरविवर्मानन्यत्वप्रतीतेरस्माक नाटककविः कविगीतकीर्तिरप्यासीदित्यवगम्यते । यत्तु—

'वपुरिव मधुर वच॰ प्रसन्न वच इव कूपकभूपते! मनस्ते'

इति रशनोपमोदाहरणश्लोके 'कूपकभूपते" इति सम्बोधन, तदप्यस्मन्नाटककर्तुरुपपन्नं, यस्मात् कूपकदेशस्यैव राजधानी कोलम्बपुरम् । तच्च स्यानन्दूरपुरादुत्तरतया श्रीवल्लभग्रामाद् दाक्षिणतया च शुकसन्देशे—

"कूले भान्तीमथ कुलपुरीं कूपकाधीश्वराणां
लक्ष्मीसाक्षात्कृतिरामुचिते पश्य रत्नाकरस्य ।
भूयोऽप्यात्मप्रमथनभिया तेन विश्वोपभोग्ये
न्यस्तेवास्मिन्नुदक्कुहराद् या पुरा रत्नभूता ॥ ५४ ॥

.... .... .... .... .... .... ....

लोकत्रय्यामखिलतनुभृल्लोचनैकावलम्बे
कोलम्बेऽस्मिन क्वचन भवतः कोऽपि मा भद्विलम्ब॰ ।

1 Published in the 'Journal of the Royal Asiatic Society of Great Britain and Ireland', Vol XVI Part 4

अल्पीयस्यामपि परिचितावन्यदेशातिशायि-
न्याश्चर्याणामहमहमिका कस्य कर्षेन्न चेतः ॥ ५६ ॥
अग्रे सिन्धुद्वयमथ पुरी काप्यमीषाममुष्यां
केलीलास्यस्मरणगुरुभिः केतुलोलैर्दुकूलैः ।
व्यङ्ग्योत्तसैरिव रसविद· सत्कवीना प्रबन्धैः
प्रीतिर्मन्ये मनसि भवत· स्फीततामेष्यतीति ॥ ५७ ॥
अर्हद्वचो य· स्वमिह दिशजन्नखनाथ चतुर्णा-
मग्र्यं धर्म कथयति नृणां कर्मणा केवलेन ।
वन्द्यश्छन्दोरहासि विहरन् वल्लभग्रामवासी
केशिध्वसी निजपदजुषां क्लेशहन्ता स देव" ॥ ५८ ॥

इति निर्दिष्टं 'कोल्लम्' इति प्रसिद्धमेव ।

केरलेश्वररविवर्मराजसम्बन्धिनस्त्रय शिलालेखा उपलभ्यन्ते । तत्राद्यौ द्वौ एपिग्राफियाइन्डिकायास्तुरीये पुस्तके (प· १४५—१५२·) किल्हारनाख्येन पण्डितमहाशयेन निवेशितौ, तृतीयस्तु अष्टमे पुस्तके (प· ८, ९·) हुल्षनाम्ना पण्डितमहाशयेन निवेशितः । तेष्वादिम काञ्चीपुरे अरुळाळप्पेरुमाळ्नामकविष्णुक्षेत्रस्य भित्तेरुपात्तः । स यथा —

"स्वस्ति श्रीजयसिंह इत्यभिहित सोमान्वयोत्तंसको
राजासीदिह केरलेषु विषये नाथो यदुक्ष्माभृताम् ।
जातोऽस्माद् रविवर्मभूपतिरुमादेव्यां कुमार· शिवाद्
देहव्याप्य (११८८) [1]शकाब्दभाजि समये देहीव वीरो रसः ॥
क्षयं नीत्वा सोऽय कलिबलमिवारातिनिवहान्
जयश्रीवत् कृत्वा निजसहचरीं पाण्ड्यतनयाम् ।
त्रयस्त्रिंशद्वर्षो यश इव ययौ केरलपद
ररक्ष स्व राष्ट्रं नगरमिव कोलम्बमधिपः ॥
जित्वा सङ्ग्रामधीरो नृपतिरधिरण विद्विष वीरपाण्ड्यं
कृत्वासौ पाण्ड्यचोलान् नय इव तनुमान् केरलेभ्योऽप्यधीनान् ।
षट्चत्वारिंशदब्दस्तटभुवि मकुट धारयन् वेगवत्याः[2]
क्रीडा सिंहासनस्थश्चिरमकृत महीकीर्तिवाणीरमाभि ॥

---

१. अस्य शकाब्दस्य सम क्रैस्ताब्द १२६५. २ वेगवती नाम काञ्च्या नदी

कृत्वा केरलपाण्ड्यचोलविजयं क्लृप्ताभिषेकोत्सवः
सङ्ग्रामापजयेन कोङ्कणगत त वीरपाण्ड्यं रिपुम् ।
नीत्वा स्फीतबल ततोऽपि विपिन जित्वा दिशामुत्तरा
काञ्च्यामत्र चतुर्थमब्द (?) मलिखत् सङ्ग्रामधीरो नृपः ॥
आ मेरोरा मलयादा पूर्वादा च पश्चिमादचलात् ।
यदुकुलशेखर एष क्षोणीं कुलशेखर. स्वय बुभुजे ॥

स्वस्तिश्री-चन्द्रकुलमङ्गलप्रदीप-यादवनारायण-केरलदेशपुण्यपरिणाम-नामान्तरकर्ण -कूपकसार्वभौम--कुलशिखरिप्रतिष्ठापितगरुडध्वज-कोलम्बपुरवराधीश्वर-श्रीपद्मनाभपदकमलपरमाराधक--प्रणतराजप्रतिष्ठाचार्य-विमतराजबन्दीकार-धर्मतरु-मूलकन्द - सद्गुणालङ्कार-चतुष्षष्टिकलावल्लभ-दक्षिणभोजराज-सङ्ग्रामधीर-महाराजाधिराज-परमेश्वर-जयसिंहदेवनन्दन-रविवर्ममहाराज--श्रीकुलशेखर - त्रिभुवनचक्रवर्ती ।

*கோனேரினமைகொணடான காஞ்சிபுரததில திருவததியூரில நினறருளிய அருளாளபபெருமாள கோயில திருபபடி ஸ்ரீவைஷணவாகளுககு பெருமாள அருளாளபபெருமாளுககு நமபேரால கடடின குலசேகரன சநதிககு அமுதுபடி சாததுபடி உளளிடட பலவெஞசனததுககும ஆவணியாததது எழுநதருள நமபேரால கணட திருநாளுககும திஙகள திருநாளுககும அமுதுபடி சாததுபடி " ளளிடட வெஞசனததுககும திருககொடை"*

इति । द्वितीयः श्रीरङ्गीयरङ्गनाथक्षेत्रभित्तेरुपलब्ध । स यथा—

"स्वस्ति श्रीजयसिंह इत्यभिहितः .. .. .... ॥
क्षयं नीत्वा सोऽय . .. .... ..... . ॥
जित्वा सङ्ग्रामधीरो . . . .. . . ॥
आ मेरोरा .... . ........... ॥

स्वस्तिश्री-चन्द्रकुलमङ्गलप्रदीप. श्रीकुलशेखरदेव ।

कृत्वा दुर्नयवैरिनैर्ऋतशमं संस्कारसंशोभिते
निद्राणामधिदेवतां निरुपमैरभ्यर्च्य माल्यादिभि ।
धर्मैरन्तरधिष्ठिते सहृदयैः सङ्ग्रामधीरः कृती
रङ्गेऽस्मिन् सुमनोऽधिवासमकरोल्लास्ये नियोज्य त्रयीम् ॥

लब्धा सागरनेमिभूमिविषया रन्तुं प्रतिष्ठा यत-
स्तस्मै श्रीकुलशेखरो यदुपतिस्त्रिक्षत्रचूडामणि· ।
रङ्गेऽस्मिन् कमलासखाय हरये रम्या प्रतिष्ठा ददौ
सन्त· प्रत्युपकुर्वते ह्युपकृताः सर्वे किमत्राद्भुतम् ॥
भूपालैरिलकार्तवीर्यसगरैर्यः पूर्वमासीत् कृत·
पश्चात् प्रौढतमोहरं यदुपतिस्तं भद्रदीपोत्सवम् ।
चक्रे शक्र इवाश्रयः सुमनसा सम्राट् त्रयीधर्मविद्
रङ्गेऽस्मिन् रुचिराङ्कसंश्रितरमारोचिष्णवे विष्णवे ॥
सम्राजामिव यः सता समुदभूत् तैस्तैर्गुणैर्मातृका
सैष श्रीकुलशेखर शतभिषक्कारे सकन्यारवौ ।
भट्टेभ्य· पुरतोऽत्र रङ्गनृपते पञ्चाशते (?) साक्षिण
प्रत्येक प्रतिहायन पणशत दातु प्रतिष्ठा व्यधात् ॥

**कविभूषणस्य**

स्वस्ति कुर्मस्त्रयीधर्मवर्मणे **रविवर्मणे** ।
रणकर्मस्थिताधर्म + र्म + रातिशर्मणे ॥
दुर्बलस्य बल राजेत्येषा सत्या सरस्वती ।
**सङ्ग्रामधीरो** धर्मस्य दुर्बलस्य बल कलौ ॥
रविश्च **रविवर्मा** च द्वाविमौ तेजसां निधी ।
एकस्याह्नि प्रतापश्रीरपरस्य त्वहर्निशम् ॥
कृष्णश्च **रविवर्मा** च यदुवशोद्भवावुभौ ।
एको गोपवधूजार· स्वदारैकपरोऽपर· ॥
राज्याभिषेककामानां **रविवर्ममहीपते!** ।
पुष्पाभिषेको भूपाना त्वत्पदाम्भोजधारणम् ॥
गुरुकल्पद्रुमेन्द्राढ्यां द्यां करोषि **रवे**! महीम् ।
ज्ञाता दाता सता पाता महतां किनु दुष्करम् ॥
**सङ्ग्रामधीर!** त्वद्राज्ये चोरो नास्तीति वाङ् मृषा ।
चम्पकद्युतिसर्वस्वचोरस्ते विग्रह· स्वयम् ॥
दृष्ट्वा दक्षिणभोज! त्वां परे बिभ्यति तद्वरम् ।
परदारानपि द्रष्टु बिभेषि त्वं हि सर्वदा ॥

एकः स्वादु न भुञ्जीतेत्येतत् किं न श्रुतं वचः ।
एकः स्वादु जगत् सर्वं भुङ्क्षे यादवभूपते! ॥
कथं दक्षिणभोज! त्वां ब्रुवते बुद्धिमद्वरम् ।
दत्तं सज्च्यः सदा पश्चाद् वित्त यत्तन्न बुध्यसे ॥
रिपूनेको जयामीति रणे मा दृप्य यादव! ।
बाहुः खड्गी मनो वाजी सहायाः किं न सन्ति ते ॥
प्रायो न दोषः स्त्रीहत्या राज्ञा रामसधर्मणाम् ।
सता सहचरी हंसि **रविवर्मन्**! दरिद्रताम् ॥
धन सर्वं ददामीति कथं ते यादव! व्रतम् ।
ब्रह्माण्डभाण्डागारेऽस्मिन् सञ्चिनोषि यशोधनम् ॥
सेव्यस्तैस्तैर्गुणैरेव सेवितु यद् ददासि न ।
एषा यदुपते! सत्यमिक्षुभक्षणदक्षिणा ॥
कुलशेखरभूपाल! सिंहासन जुषत्वयम् (१) ।
सिंहासनजुषो लोके स्थावरा एव भूभृतः ॥
**सङ्ग्रामधीर** इत्येत मन्त्रं पञ्चाक्षर बुधाः ।
जपन्तो दुर्गतिं जित्वा प्राप्नुवन्ति पर शिवम् ॥
इति यादवकीर्तीन्दो कलाः षोडश सूक्तयः ।
उल्लासयन्तु कुमुद भूषणे पर्वणि स्फुटाः ॥
अतसीचम्पकवर्णौ तुलसीकीर्तिसुरभीकृतस्वाङ्गौ ।
यदुनाथौ नाथौ नः कृतमपरैश्चित्तदेवनरदेवैः ॥

**कविभूषणस्य**" ।

इति । तृतीयस्तु **तिरुवटि**ग्रामस्थश्रीवीरस्थानेश्वराख्यशिवक्षेत्राल्ठब्धः । स यथा—

"स्वस्ति श्री**जयसिंह** .. ... ॥
क्षय नीत्वा सोऽय .. .. ॥
जित्वा **सङ्ग्रामधीरो** . .. ॥
आ मेरोरा मलयादा .. . . ॥

---

१ 'सिंहासनजुषि त्वयि' इति स्यात्

2, 'Tiruvadi' is near Panrutti, South Arcot District.

स्वस्तिश्रीचन्द्रकुलमङ्गलप्रदीप .. .. श्रीकुलशेखरदेवः ।

இவாககு யாணடு நாலாவது கலியுகவருஷம 4414 இதில நீஙகிய ச+++35 இதன மேல செலலாநினற மகர நாயறறு பூருவபக்ஷததது ஏகாதசியும சனிககிழமையும பெறற ரோசணி நாள திருவதிகையுடையாா திருவீரடடானம உடைய நாயனாகோயில் வாணலைகபிலாயத திருமலை ஸதூபீபரியநதமாக கிருமஞசனமும பணணி புரசசரணை திருககலனும சாறறியருளினா ரவிவாம மஹாராஜன பெருமாள குலசேகர தேவா

स्वस्ति श्री ।"

इति ।

एषु शिलालेखेषु निर्दिष्टो **रविवर्मराजो** वशपितृगुणनामसंवादात् **प्रद्युम्नाभ्युदयकवे**र्न भिद्यत इत्यवगमे तस्य **सङ्ग्रामधीर**ख्यात्यनुगुण पाण्ड्यादिदेशविजयपूर्वकमकुटधारणाभिषेकादिरूपमपदानमप्येभिरपूर्वमाविष्कृत भवति । इद पुनरस्माकं केरलीयेषु राजसु एकमपि देशान्तरव्यापिप्रतापमविजानतां पर प्रीतिपद, यत् ११८८ तमशकवर्षसमुत्पन्न. कश्चित् केरलेषु **कोलम्बपुरे** राजा **रविवर्मा** नाम निस्सामान्येन महाकवित्वेनेव प्रतापेन **काञ्ची**पुरपर्यन्तदेशविजयिना भूषितो बभूवेत्यसन्दिग्धमुपोद्धातेऽस्मिन् वक्तुमवसरमविन्दाम । न केवलमेतावदेव, यदुवंश्यत्व·पद्मनाभपदकमलपरमाराधकत्वसाम्याद् अय **रविवर्मदेवो**ऽस्मद्वञ्चि**महाराजानां** पूर्वजः सम्भाव्यत इत्यपि शक्नुमो वक्तुम् ॥

त. गणपतिशास्त्री

## कथासारः ।

### प्रथमेऽङ्के—

लोकहितैषिणा नारदेनोद्दीपितः श्रीभगवान् कृष्णो वज्रपुराधीश्वरं पितामहवर-बलदर्पित वज्रणाभं व्यापादयितुं गदसाम्बसहितस्य प्रद्युम्नस्य वज्रणाभच्छन्द विनेतरै-र्दुष्प्रवेशे वज्रपुरे प्रवेशाय नाट्यप्रयोगपरितोषितमहर्षिकरमहिम्ना सर्वत्राप्रतिहतप्रवेश सकलकलाभिज्ञ भद्रनट प्रेरयति ।

### द्वितीये—

धारितशैलूषभूमिकेन गदसाम्बसमेतेन प्रद्युम्नेन सह नाट्यप्रयोगप्रसङ्गाद् वज्र-पुर प्रविश्य तत्र वज्रणाभनियोगेन तत्कन्यका सङ्गीतकं शिक्षयता स्वालिखित प्रद्युम्न-प्रतिच्छन्दं कथञ्चित् प्राप्याङ्कुरितमदनया प्रभावत्याहूय पृष्टेन भद्रनटेन प्रद्युम्नस्य वश-गुणरूपादिगरिमवर्णनेनोद्दीपितानुरागायास्तस्या भावबन्धो द्वारकानगरात् प्रद्युम्नानय-नप्रतिज्ञानाद् दृढीक्रियते ।

### तृतीये—

तथादृढीकृतप्रद्युम्नविषयकभावबन्धायाः प्रभावत्या भद्रनटमुखाच्छ्रुतप्रभावती-रूपगुणसम्पदः प्रद्युम्नस्य च परस्परानुरागो रम्भाभिसरणाख्ये प्रेक्षणके परस्परदर्श-नेन परा कोटिमारुरोह ।

### चतुर्थे—

नायिकानायकयोर्विरहतापस्यासह्यत्व, परस्परस्य परस्परविषयकानुरागस्य नि-र्धारण, मनोरथसिद्धिश्चाभ्यधायि ।

### पञ्चमे—

वज्रणाभसोदर्यस्य सुनाभस्य दुहित्रोश्चन्द्रवतीगुणवत्योः प्रभावतीमुखेन गदसा-म्बाभ्यां सङ्गमनस्य सूचन , प्रद्युम्नगदसाम्बैः क्रमेण वज्रणाभतत्सैन्यसुनाभाना युद्धे वधः, प्रद्युम्नादीना प्रभावत्यादिषु सुतोत्पत्तिः, प्रद्युम्नस्य वज्रपुराधिराज्याभिषेकश्च प्रतिपाद्यते ॥

श्रीः ।

रविवर्मभूपविरचितं

# प्रद्युम्नाभ्युदयम् ।

---

## प्रथमोऽङ्कः ।

(तत प्रविशति भद्रनट)

**भद्रनटः** — (सविमर्शम्)

श्रियमुदवहज्जाता सक्षोभितात् कलशाम्बुधे
समधिकगुणः साक्षात् सौभाग्यसिद्धिमिवाद्भुताम् ।
निरवधिबलेष्वाराद्देवासुरेषु मिषत्सु यः
स खलु भगवान् भद्रं पुष्णातु व पुरुषोत्तम. ॥ १ ॥

अपि च—

शुभानां सामग्र्यै कमपि महिमान मनुमहे
*मणिस्थूणामान्तं मनुजवपुष केसरिमुखम् ।
दधानो यस्य द्राग् दनुकुलपतेरान्त्रवलयं
जगद्रक्षाबद्धप्रतिसर इवालक्ष्यत कर' ॥ २ ॥

(नान्द्यन्ते तत. प्रविशति सूत्रधार)

**सूत्रधारः** — (परिक्रामितकेन नेपथ्याभिमुखमवलोक्य) आर्ये! इत आगम्यताम् ।

(प्रविश्य)

**नटी** — (क) अय्य! इअह्मि ।

**सूत्रधारः** — आर्ये! समादिष्टोऽस्मि सकलकलाकुशलस्य चन्द्रकुलमङ्गलप्रदीपस्य समस्तसामन्तशेखरीक्रियमाणशासनस्य विविधशाखावलम्बनधर्मतरुमूलकन्दस्य प्रणयिजनचिन्तामणे कोलम्बपुरपरिष्कारस्य देवस्य रविवर्मणः

---

(क) आर्य! इयमस्मि

*मणिस्थूणायाममान्त महत्त्वात् तदन्तरासितुमपारयन्त ततो बहिर्निस्सरन्तमिति यावत्.

पादपद्मोपजीविन्या राजपरिषदा, यथा 'अद्य सकलभुवनसर्गस्थितिसंहारकारणस्य क्षीरार्णवकन्यकास्तनकलशकाश्मीरबालातपरञ्जितभुजान्तरमणिशिलातलस्य निरन्तरविजृम्भमाणदेहप्रभापटलशैवालितदक्षिणवारिराशेः पर्यङ्कभुजङ्गपुङ्गवफणामाणिक्यमरीचिसन्ध्यानुबन्धबन्धुरवदनचन्द्रमसः केरलदेशसुकृतपरिणतेः यादवनृपकुलदैवतस्य भगवतः श्रीपद्मनाभस्य यात्रोत्सवे किमपि रूपकमभिनवमभिनयता वयं विनोदनीयाः' इति ।

**नटी**—(सहर्षम्) (क) अय्य! महन्त खु से परिसआए सङ्गीअम्मि णिउणत्तणम् । ण एत्थ पओअविण्णाण दसअन्तेण अय्येण लम्भिज्जइ गरुई सम्भावणा ।

**सूत्रधारः**—आर्ये! मा मैव वादीः ।

अनन्यभावामास्थानीं तैस्तैरावर्जयन् गुणैः ।
प्रियेण सयोजयितुं नटः कश्चित् प्रगल्भते ॥ ३ ॥

**नटी**—(ख) एव्वं एद अय्य! भवारिसस्स कस्स वि एव्व एआरिसम्मि कज्जे पअब्भत्तणम् । ता कस्स उण कइणो किदी पओअणिज्जा ।

**सुत्रधारः**—(स्मृतिमभिनीय सहर्षम्) अस्ति किल सङ्गीतशास्त्रपारदृश्वना निखिलगुणरत्नरोहणगिरिणा कविजनमयूरकालमेघेन साहित्यविद्याविचक्षणेन दक्षिणभोजराजेन महाराजपरमेश्वरेण सग्रामधीरापरनामधेयेन श्रीरविवर्मदेवेन विरचित प्रद्युम्नाभ्युदयं नाम नाटकम् । तत् प्रयुञ्जानाः सामाजिकान् उपास्महे ।

**नटी**—(सश्लाघम्) (ग) अय्य! वीरासिरीए विअ सरस्सईए वि अहिरमइ एस जदुणाहो ।

**सूत्रधारः**—आर्ये! किमुच्यते—

संग्रामभूमिषु सभासु च धीर एष शस्त्रेण बुद्धिविभवेन च तैक्ष्ण्यभाजा ।
दर्पान्धकारितधियो नृपतीन् बुधांश्च जित्वा क्षितौ विहरते जयसिंहसूनुः ॥ ४ ॥

---

(क) आर्य! महत्खलु अस्याः परिषदः सङ्गीते निपुणत्वम् । नन्वत्र प्रयोगविज्ञानं दर्शयतार्येण लप्स्यते गुर्वी सम्भावना.

(ख) एवमेतद् आर्य! भवादृशस्य कस्याप्येवैतादृशे कार्ये प्रगल्भत्वम् । तत् कस्य पुनः कवेः कृतिः प्रयोजनीया

(ग) आर्य! वीरश्रियेव सरस्वत्याप्यभिरमत एष यदुनाथ.

श्रीः ।

रविवर्मभूपविरचितं

# प्रद्युम्नाभ्युदयम् ।

---

## प्रथमोऽङ्कः ।

(तत प्रविशति भद्रनट )

**भद्रनटः** — (सविमर्शम् )

श्रियमुदवहज्जातां सक्षोभितात् कलशाम्बुधे.
समधिकगुणः साक्षात् सौभाग्यसिद्धिमिवाद्भुताम् ।
निरवधिबलेष्वाराद्देवासुरेषु मिषत्सु यः
स खलु भगवान् भद्रं पुष्णातु व· पुरुषोत्तम. ॥ १ ॥

अपि च—

शुभानां सामग्र्यै कमपि महिमानं मनुमहे
*मणिस्थूणामान्तं मनुजवपुष केसरिमुखम् ।
दधानो यस्य द्राग् दनुकुलपतेरान्त्रवलयं
जगद्रक्षाबद्धप्रतिसर इवालक्ष्यत कर· ॥ २ ॥

(नान्द्यन्ते तत· प्रविशति सूत्रधार )

**सूत्रधारः** — (परिक्रामितकेन नेपथ्याभिमुखमवलोक्य) आर्ये ! इत आगम्यताम् ।

(प्रविश्य)

**नटी** — (क) अय्य ! इअह्मि ।

**सूत्रधारः** — आर्ये ! समादिष्टोऽस्मि सकलकलाकुशलस्य चन्द्रकुलमङ्गलप्रदीपस्य समस्तसामन्तशेखरीक्रियमाणशासनस्य विविधशाखावलम्बनधर्मतरुमूलकन्दस्य प्रणयिजनचिन्तामणे. कोलम्बपुरपरिष्कारस्य देवस्य **रविवर्मणः**

---

(क) आर्य ! इयमस्मि

---

*मणिस्थूणायाममान्त महत्त्वात् तदन्तरासितुमपारयन्त ततो बहिर्निस्सरन्तीमिति ,यावत्.

कीर्तनप्रवृत्तो माधवनामसाम्यान्मद्वचनेनैव तमुपश्लोकयति । तदावामप्यनन्तरकरणीयाय सज्जीभवाव. । (इति निष्क्रान्तौ) ।

## प्रस्तावना ।

---

(तत॰ प्रविशति आसनस्थ सपरिवार कृष्णो नारदश्च)

**नारदः**—साधु भणितम् (आवहन्नित्यादि पठति)

**कृष्णः**—भगवन्! अलमतिप्रसङ्गेन ।

**नारदः**—प्रद्युम्नकौस्तुभरत्नाकर! अलममुना भवतो निराग्रहेण । अशक्तिरेव मां भवद्गुणकीर्तनप्रसङ्गान्निवारयति । तथा हि—

पद्मासनः सृजति कृष्ण! भवान् प्रपञ्चं
पश्चात्तमेनमभिरक्षति चक्रपाणिः ।
रुद्रस्ततो हरति त युगसन्निवृत्तौ
शक्नोति कः स्तुतिपु तद्भवतो गुणानाम् ॥ ९ ॥

किञ्च

दाक्ष्य यद् भवतो हिरण्यकशिपोर्वक्षस्तटीपाटने
तत्तादृग्दशकण्ठकण्ठविपिनच्छेदे च यन्नैपुणम् ।
यद्वा यादववीर! कसकदनक्रीडाक्रमे कौशल
शसन्ती चरितानि तानि *तलिना जिह्रेति जिह्वा मम ॥ १० ॥

**कृष्णः**—महतीवैपञ्चिक! किमेवमभिधीयते । ननु भवत्प्रयुक्तया स्तोत्रपरम्परया ममैव हृदय जिह्रेति ।

**नारदः**—सत्यमभिहित भवता, यतः—

स्तोतु समस्ताः श्रुतयोऽपि नालं
यद् वैभव त्वद्गुणकर्मनाम्नाम् ।
अस्मादृशास्तद् यदि वर्णयेयु-
स्तदा न लज्जेत कथं मनस्ते ॥ ११ ॥

**कृष्णः**—महर्षे! सकललोकमाननीयमात्मानुभावमनालोच्य किमेवमभिदधासि ।

---

१ 'दारणे' इति ख पाठः

---

* तलिनाल्पा.

सनत्कुमारादिषु सत्सु पुत्रेष्वनन्यसामान्यगुणाश्रयेण ।
पितामहः पुत्रवता महात्मन्! धुरि प्रतिष्ठां लभते त्वयैव ॥ १२ ॥
तदुपरम्यताम् । किमागनकारणम् ।

**नारदः**—प्रथमं तावन्महाभाग! वसुदेववितन्यमानाश्वमेधमहोत्सवधुरन्धरस्य भवतो दर्शनम् ।

**कृष्णः**—किं पुनर्द्वितीयम् ।

**नारदः**—दानवकुल[1]दलनदीक्षित! तदेतदावेद्यते ।

**कृष्णः**—भगवन्! अवहितोऽस्मि ।

**नारदः**—अद्य किल कश्चिदखण्डभुजशौण्डीर्यकुण्ठिताखण्डलवज्रो वज्रणाभनामा दानवपति कनकगिरिकटकचिरकालतप्ततपःप्रकर्षसन्तोषितस्य भगवतः पितामहस्य सकाशाद् अमरावध्यतामनुमतिमन्तरेणा[2]खिलैरपि दुष्प्रवेशं सर्वरत्नमयं वज्रपुरं नाम नगरं सकलसङ्कल्पसिद्धिञ्च लब्ध्वा द्विगुणितमदान्धकारितहृदयस्त्रिभुवनमुपमृद्नाति ।

**कृष्णः**—देवर्षे! ममेदं पूर्वमेवागत्य भगवता महेन्द्रेण कथितं यथा "चतुराननदत्तवरलाभगर्वितो वज्रणाभः कदाचिदमरावतीमासाद्य मामेवमुक्तवान्—

'देहि मे जगदैश्वर्यं नो चेद् युध्यस्व वासव! ।
सामान्यं हि जगत् कृत्स्नं काश्यपानां महात्मनाम्' ॥ १३ ॥

इति । मया च भगवता बृहस्पतिना सह मन्त्रयित्वा

'सत्रेऽद्य दीक्षितः सौम्य! कश्यपो न पिता मुनिः ।
तस्मिन् वृत्ते यथा न्याय्यं तथा स हि करिष्यति' ॥ १४ ॥

इति प्रत्युक्तम् । स च तं कश्यपमुपेत्य निवेदितवृत्तान्तः तेन च 'पुत्र! सत्रावसाने यथोचितं भविष्यति त्वं पुनरिदानीं स्वपुरमेव प्रयाहि' इति समादिष्टो निकृष्टाशयः सकलजगदुपप्लवमाचरन् वज्रपुरमधितिष्ठति। अतः परं भवानेव प्रमाणम्" इति। मयापि तदानीमेव तस्य दुरात्मनः सुरद्वेषिणो निरसनमध्यवसितम् ।

**नारदः**—(सहर्षबहुमानम्) मधुकैटभमर्दन! तादृशो दुष्टान् निग्रहीतुमेव महीमवतीर्णोऽसि । अमुष्य पुनराति हि वचांसि प्रतापगरिमा ।

---

१ 'लनिधन' इति क पाठ
२ 'णाखण्डलाद्यैर्दु' क. पाठ..

बन्दीकृत्योपनीतास्त्रिदशमृगदृशश्चामरैर्यं श्रयन्ते
दिक्पालाश्चाटुकाराः प्रतिदिनमुचितैः प्राभृतैर्यं भजन्ते ।
नित्यं नीराजयन्ते भुजगयुवतयो यं फणारत्नदीपै-
र्दृप्तस्त्रैलोक्यलक्ष्मीपतिरिह स कथं कथ्यते वज्रणाभः ॥ १५ ॥

किं च

सम्भोगार्तिजुषाममुष्य नगरे त्रस्तश्चरन् मारुतः
स्वेदाम्बुव्यपनोदमेव कुरुते शुद्धान्तवामभ्रुवाम् ।
उल्लासश्रियमेव पद्मसरसामुत्पादयत्यंशुमान्
सर्वां यामवतीं शशी च तनुते सान्द्रोल्लसच्चान्द्रिकाम् ॥ १६ ॥

तदिह कालासहेऽर्थे भवता न विलम्बितव्यम् ।

**कृष्णः**—महामुने! तातेन वितन्यमानेन महाक्रतुनाश्वमेधेन खल्वियतो दिवसान् विलम्बितमस्माभिः । स चेदानीमासन्नावभृथो वर्तते । एतदवसानमेव तस्य दानवहतकस्य जीवितावसानम् ।

प्रद्युम्न एव भगवन्नचिरेण वत्सो
बाणैर्निहत्य तमिमं युधि वज्रणाभम् ।
नेत्राम्बुभिस्तदवरोधनितम्बिनीना
निर्वापयिष्यति जगत्रितयस्य तापम् ॥ १७ ॥

**नारदः**—(सप्रमोदम्) जगत्पते! तस्य खलु भवदात्मजन्मनः शम्बरमथनस्य किं नाम दुष्करम् । अयं चार्थोऽर्थानुबन्धी ।

**कृष्णः**—कथमिव ।

**नारदः**—अस्ति किल तस्य दानवपतेरखिलजनहृदयङ्गममतिशयितकान्ति किमपि प्रभावती नाम कन्यारत्नम् ।

वरदानेन सा लब्धा मात्रा किल वरानना ।
हैमवत्या महादेव्याः सकाशादिति नः श्रुतम् ॥ १८ ॥

**कृष्णः**—एवं कृच्छ्रलब्धा सा स्यादेव पित्रोः प्रेमपात्रम् ।

**नारदः**—तां च महर्षिर्दुर्वासाः कदाचिदेवमनुजग्राह 'वत्से! यस्त्वां पाणौ करिष्यति स त्वया सहचरितधर्मा निरवधिकं कालं जीविष्यति । त्वमपि जीवत्पुत्रा भविष्यसि' इति ।

**कृष्णः**—न खलु तस्य परमर्षेर्वचनमन्यथा भविष्यति ।

**नारदः**—सा च सम्प्रति नवयौवनोदयविशेषरमणीया तच्छन्दानुवर्तिना पित्रा स्वयवरे स्थापिता सती तदर्थमागतमात्मनोऽननुरूपतया सर्वमपि युवजनमवजानाति । अमुष्मिन् पुनर्वज्रपुरगते सकललोकातिशायिसौन्दर्यसम्पदि प्रद्युम्ने करिष्यत्येव सा भावबन्धम् ।

**कृष्णः**—तदपि भवतु ।

**नारदः**—द्वारवतीनायक! अधुना वज्रणाभवधाय भवत. समुद्योगमहोत्सवेन देवपरिषदं परितोषयितुम् अनुज्ञा मम दीयताम् ।

**कृष्णः**—देवर्षे! नारद!

श्रूयते वागियं येन मधुरा महतीपते! ।
गुणबद्धं मनस्तस्य नान्यतश्चलितुं क्षमम् ॥ १९ ॥

**नारदः**—एष साधयामि । (इति निष्क्रान्त ।)

**कृष्णः**—(सविमर्शम्) वज्रणाभभुजपरिघपालित सर्वदुष्प्रवेश वज्रपुर कथ प्रवेष्टव्यम् । (स्मरणनाटितकेन) विद्यते किल तातस्यास्मिन्नश्वमेधे नाट्यप्रयोगनैपुणपरितोषितमहर्षिसङ्घदत्तविविधवरलब्धवैभवो भद्रनामा नट । स खलु प्रसिद्धाकाशगमनः सर्वत्राप्रतिहतप्रवेशश्च । तन्मुखेनैव सर्व साधनीयम् । (नेपथ्याभिमुखमवलोक्य) कः कोऽत्र भोः ।

(प्रविश्य)

**प्रतीहारी**—(सप्रणामम्) (क) जेदु देवो ।

**कृष्णः**—विजयवति! भद्रनट आहूयताम् ।

**प्रतीहारी**—(ख) जं देवो आणवेदि । (निष्क्रान्ता)

(ततः प्रविशति प्रतीहार्योपदिश्यमानमार्गो भद्रनट )

**भद्रनटः**—अहो महीयान् मे भाग्यपरिपाकः । यतः—

क्षेमङ्करस्त्रिजगता भगवानिदानीं
मार्गे भविष्यति दृशोर्मम वासुदेव ।
ज्ञानाधिकैर्मुनिभिरप्यपरोक्ष्यते यः
प्रत्यङ्मुखेन मनसैव परोरजोंमि. ॥ २० ॥

(क) जयतु देव

(ख) यद् देव आज्ञापयति.

**प्रतीहारी** – (क) अय्य ! णट्टाअरिअ ! णं एस तिहुवणणाहो तुह आअमण पडिवालअन्तो चिट्ठइ । ता तुरिअं उवसप्पतु भव ।

**भद्रनटः** – (उपसृत्य सप्रणामम्) विजयतां देवः ।

प्रत्यूहे जगता शुभस्य भवता प्राग्ज्योतिषाधीश्वरे
गर्वग्रन्थिलदोष्णि देव ! गमिते पत्युः पितॄणां पुरम् ।
शृण्वन् किन्नरगीयमङ्गमधुना त्वद्विक्रमप्रक्रमं
निश्चिन्तस्त्रिदिवौकसामधिपतिः स्वाराज्यमातिष्ठति ॥ २१ ॥

**कृष्णः** – तदिदमिदानीमन्यथा सवृत्तम् ।

**भद्रनटः** – देव ! कस्तर्हि भवतः कोपाग्नेरिन्धनीभवितुमिच्छति ।

**कृष्णः** – पितामहवरदानमत्तेन वज्रणाभनाम्ना दानवेन त्रिभुवनमिदमाक्रम्यते । सम्प्रति तद्व्यापादनाय गदसाम्बसहितं वत्स प्रद्युम्नमुद्योजयामि ।

**भद्रनटः** –

तेजस्विने कुमाराय प्रद्युम्नाय जगत्पते ! ।
कथमस्मै स तिष्ठेत दानवेन्द्रस्तमोमयः ॥ २२ ॥

**कृष्णः** – विधातृसङ्कल्पनिर्मितं तस्य वज्रपुरं नाम नगर तच्छन्दमन्तरेण केनापि प्रवेष्टुमशक्यम् । वत्सस्य पुनस्तत्प्रवेशस्त्वन्मुख एव भविता ।

**भद्रनटः** – देव ! अस्य भवत्प्रसादस्य कथमहं पात्रं भविष्यामि ।

**कृष्णः** – कर्णे एवमिव ।

**भद्रनटः** – देव ! सर्वमवधारयामि ।

(नेपथ्य)

**वैतालिकः** – देव ! देवकीनन्दन ! भवतः सुखाय भवतु माध्यन्दिनी सन्ध्या ।

आतिष्ठत्यधुना यजूंषि भगवत्यम्भोजिनीवल्लभे
पद्मान्तर्दलमाश्रयन्ति मधुपाः प्रौढातपक्लेशिता ।
हस्तैः शीकरवर्षिभिः सहचरीराश्वासयन्ति द्विपा
बर्हैर्मन्दिरबर्हिणश्च विततैः प्रच्छादयन्ति प्रिया· ॥ २३ ॥

---

(क) आर्य ! नाट्याचार्य ! नन्वेष त्रिवभुवननाथस्तवागमन प्रतिपालयस्तिष्ठति । तत् त्वरितमुपसर्पतु भवान्

कृष्णः—(ऊर्ध्वमवलोक्य) अये कथं मध्याह्नः सम्प्रवृत्तः । तदहमिदानीं वज्रनाभविजयाय वत्सस्य प्रस्थानमङ्गलानि सविधातुमभ्यन्तरमेव प्रविशामि । भद्रनट ! त्वमपि समीहितसिद्धये प्रवर्तस्व ।

भद्रनटः—यदाज्ञापयति देवः ।

य द्रंष्टुमेव हृदयैर्यमिनो यतन्ते
यद्वैभवस्तुतिषु वन्दिन एव वेदा ।
आहूय तेन भवता जगदन्तरात्म-
न्नाज्ञापितोऽस्म्यहमिद तपस फल मे ॥ २४ ॥

(निष्क्रान्ता सव)

इति प्रथमोऽङ्कः ।

---

## अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति चेटी)

**चेटी** –(क) आणत्तह्मि देवीए जह 'हञ्जे! कलावदि! अय्यभद्दणडं दट्ठूण सङ्गीतकलाहिओए केरिसी वच्छा पहावदि त्ति पुच्छिअ आअच्छ'त्ति । पुच्छिएण अ तेण 'अदिट्ठपुरुव खु से सिक्खागहणम्मि पहावदीए णेउण'त्ति कहिद । जाव तस्स वअण देवीए विण्णवेमि । (सविमर्शम्) एव्व सम्पुण्णगुणाए भट्टिदारिआए णवर वरलाहो एव्व परिहीअदि । एसा खु सअवराअद सअल वि जुवजण ओहीरेइ । (साशसम्) (जइ) इमाए अणुरूवउणो को वि जुवा लम्भिज्ज, ताहे पआवइणो णिम्माणकोसल सहल होज्ज । (पुरोऽवलोक्य) कहं एसा पमदवणपालिआ परहुदिआ इदो एव्व आअच्छइ ।

(प्रविश्य)

**परभृतिका** –(सहर्षम्) (ख) देवीए सहत्थसवड्ढिअस्स उज्जाणरअणणामहेअस्स सहआरसाहिणो पढमप्पसूणुग्गममहोसवं विण्णवन्ती पसादपत्त होमि । (अग्रतो निर्वर्ण्य) देवीए हिअआणिव्विसेसा कह कलावदी अहिवट्टइ । णं अणालविअ गन्तु ण जुत्तं । ता उवसप्पामि । (उपसृत्य) हला! कलावदि! कुदो आअच्छसि ।

---

(क) आज्ञप्तास्मि देव्या यथा 'हञ्जे! कलावति! आर्यभद्रनट दृष्ट्वा सङ्गीतकलाभियोगे कीदृशी वत्सा प्रभावती इति पृष्ट्वा आगच्छ' इति । पृष्टेन च तेन 'अदृष्टपूर्वं खल्वस्या शिक्षाग्रहणे प्रभावत्या नैपुणम्' इति कथितम् । यावत्तस्य वचन देव्यै विज्ञापयामि । एव समुत्पन्नगुणाया भर्तृदारिकाया नवर वरलाभ एव परिहीयते । एषा खलु स्वयवरागत सकलमपि युवजनमवधीरयति । (यदि) अनयानुरूपगुण कोऽपि युवा लभ्येत, तदा प्रजापतेर्निर्माणकौशल सफल भवेत् । कथमेषा प्रमदवनपालिका परभृतिका इत एवागच्छति

(ख) देव्या स्वहस्तसवर्धितस्योद्यानरत्ननामधेयस्य सहकारशाखिन प्रथमप्रसूनोद्गममहोत्सवं विज्ञापयन्ती प्रसादपात्र भवामि । देव्या हृदयनिर्विशेषा कथ कलावत्यभिवर्तते । एनामनालप्य गन्तु न युक्तम् । तदुपसर्पामि । सखि! कलावति! कुत आगच्छसि.

**कलावती**--(क) सहि ! परहुदिए ! देवीए आदेसेण भट्टिदारिआए पहावदीए सङ्गीदसिक्खाकोसल अय्यभद्दणडमुहादो सुणिअ आअच्छामि ।

**परभृतिका**--(ख) तेसु गीदसारप्पमुहेसु कुसीलववरेसु चिट्ठन्तेसु पहावर्दि सङ्गीदं सिक्खावेदु भट्टिणा किंत्ति अहिणवाअदो एसो णिउत्तो ।

**कलावती**--(ग) हला ! किं सव्वे भद्दणडो होन्ति । अअ खु मुणिजणादिण्णबहुविहवरजणिदमाहप्पो सव्वत्थ वि अप्पडिहदसञ्चारो अहिलासु वि कलासु पर विण्णाणं सम्पत्तो अ ।

**परभृतिका**--(घ) कह एस महाणुभावो एत्थ समाअदो ।

**कलावती**--(ङ) सुणादु पिअसही । सेवासमाअदेण चारणवइणा हंसेण कहाप्पसङ्गेसु समावेदिअणीसामण्णविज्जाविहव इम भद्दणड दट्ठु भट्टिणो महन्तं कोऊहल आसी ।

**परभृतिका**--(च) भट्टिणो तारिसेसु महन्तो खु पक्खवादो । (सकौतुकम्) तदो तदो ।

**कलावती**--(छ) तदो एस सेलूसवरो सच्छन्देण दीवादो दीवन्तर आहिण्डन्तो जादु साहाणअर सम्पत्तो रामाअणकहाणुबन्धिणाडअप्पओअपरितोसिदेहि तत्थ णिवसन्तेहि दाणवेहि विण्णविओ चिरआलकुदूहलिणा भट्टिणा सपरिअणो वज्जपुर आणीअ सविसेसविहिदसक्कारो तस्स आदेसेण भट्टिदारिअ सङ्गीअ सिक्खावेइ ।

---

(क) सखि ! परभृतिके ! देव्या आदेशेन भर्तृदारिकाया प्रभावत्या सङ्गीतशिक्षाकौशलमार्यभद्रनटमुखात् श्रुत्वा आगच्छामि.

(ख) तेषु गीतसारप्रमुखेषु कुशीलववरेषु तिष्ठत्सु प्रभावतीं सङ्गीत शिक्षयितु भर्त्रा किमित्यभिनवागत एष नियुक्त

(ग) सखि ! किं सर्वे भद्रनटो भवन्ति । अय खलु मुनिजनदत्तबहुविधवरजनितमाहात्म्यः सर्वत्राप्यप्रतिहतसञ्चारोऽखिलास्वपि कलासु पर विज्ञान सम्प्राप्तश्च

(घ) कथमेष महानुभावोऽत्र समागत

(ङ) शृणोतु प्रियसखी । सेवासमागतेन चारणपतिना हंसेन कथाप्रसङ्गेषु समावेदितनिस्सामान्यविद्याविभवमिम भद्रनट द्रष्टु भर्तुर्महत् कौतूहलमासीत्.

(च) भर्तुस्तादृशेषु महान् खलु पक्षपात । ततस्तत

(छ) तत एष शैलूषवर. स्वच्छन्देन द्वीपाद् द्वीपान्तरमाहिण्डमानो जातु शाखानगर सम्प्राप्तो रामायणकथानुबन्धिनाटकप्रयोगपरितोषितैस्तत्र निवसद्भिर्दानवैर्विज्ञापितश्चिरकालकुतूहलिना भर्त्रा सपरिजनो वज्रपुरमानीय सविशेषविहितसत्कारस्तस्यादेशेन भर्तृदारिकां सङ्गीत शिक्षयति.

**परभृतिका**-- (क) (सश्लाघम्) हला! सहावरमणिज्जाए पहावदीए कलाहिओओ णाम हेमलट्ठीए दहणसक्कारो, मणिसलाआए साणसमुल्लेहो, चम्पअमालाए हिमजलपरिसेओ, चन्दिमाए सरअसमागमो अ।

**कलावती**-- (ख) सहि! साहु भणिअ। तुम पुण कहि पत्थिदासि।

**परभृतिका**--(ग) हला! देवीए सुदणिव्विसेस सवड्ढिअस्स उज्जाणरअणस्स पढमकुसुमुग्गम विण्णविदु गच्छामि।

**कलावती**-- (घ) एस दाणि महन्तो खु ऊसवो देवीए सम्पत्तो। ता देवीए सआस गच्छामो। (इति निष्क्रान्ते)

## प्रवेशकः।

(तत प्रविशति सखीद्वितीया प्रभावती।)

**प्रभावती**--(ङ) हला! कलहसिए! तुम खु अय्यभट्टणडं हक्कारिदु पत्थिदा अज्ज कि तेण विणा आअदासि।

**कलहंसिका**--(च) पिअसहि! विह्मअरसक्खित्तहिअआए विह्मरिदं तस्स हक्कारणम्।

**प्रभावती**-- (छ) सहि! विह्मअस्स कि कालण।

**कलहंसिका**--(ज) तस्स णट्टाअरिअस्स घरे कि वि अदिट्ठपुव्वरूवसोह पुरिसप्पडिच्छन्दअं दिट्ठम्।

**प्रभावती**--(झ) सहि! तिहुवणदुल्लह खु त, जेण तुम वि एव्व विह्मअक्खित्तहिअआ सवुत्ता।

---

(क) सखि! स्वभावरमणीयाया. प्रभावत्या कलाभियोगो नाम हेमयष्ट्या दहनसस्कारो, मणिशलाकाया. शाणसमुल्लेख., चम्पकमालाया हिमजलपरिषेक, चन्द्रिकाया शरत्समागमश्च

(ख) सखि! साधु भणितम्। त्व पुन. कुत्र प्रस्थितासि

(ग) सखि! देव्या सुतनिर्विशेष सवर्धितस्योद्यानरत्नस्य प्रथमकुसुमोद्गम विज्ञापयितु गच्छामि

(घ) एष इदानी महान् खलूत्सवो देव्या सम्प्राप्त। तद्देव्या· सकाश गच्छाव.

(ङ) सखि! कलहसिके! त्व खल्वार्यभद्रनटमाकारयितु प्रस्थिताद्य कि तेन विनागतासि

(च) प्रियसखि! विस्मयरसाक्षिप्तहृदयया विस्मृत तस्याकारणम्

(छ) सखि! विस्मयस्य कि कारणम्

(ज) तस्य नाट्याचार्यस्य गृहे किमप्यदृष्टपूर्वरूपशोभं पुरुषप्रतिच्छन्दक दृष्टम्.

(झ) सखि! त्रिभुवनदुर्लभ खलु तद्, यन त्वमप्येव विस्मयाक्षिप्तहृदया सवृत्ता.

**कलहंसिका** – (क) णिरदिसअसुन्देरगुणवासभवण त कस्स हिअअ ण विह्मावेइ ।
पडिमा विअ रइवइणो पच्चादेसो व्व पुण्णिमामअङ्गो ।
सिङ्गारस्स व जीओ केण कहिज्जइ जअम्मि त रूव ॥ १ ॥

**प्रभावती** – (साभिलाषम्) (ख) सहि ! कलहसिए ! इमिणा तुह वअणेण त रूव-रअण दट्ठु अहिअ मे कोऊहल वट्टइ । कह एत्थ आणेदव्व ।

**कलहंसिका** – (सोत्प्रासम्) (ग) इमम्मि उवणीदे कि पारितोसिअ पिअसहीए दिज्जइ ।

**प्रभावती** – (घ) ज रोअदि सहीए ।

**कलहंसिका** – (सपरिहासम्) (ङ) ता अत्तणो विज्जाप्पहावेण ण दसेमि ।

(इति परिवृत्य चोलकान्तरादादाय चित्रपट दर्शयति)

**प्रभावती** – (दृष्ट्वा साश्चर्यम्) (च) हला ! कलहसिए ! ठाणे खु विह्मअक्खित्त तुह हिअअ । अदिट्ठपुव्व असुदपुव्व अ एआरिस रूव ।

**कलहंसिका** – (छ) कि तुह सही अत्थाणे विह्मिदा होइ ।

**प्रभावती** – (ज) सहि ! इद कस्स णाम महाभाअस्स पडिरूव भवे ।

**कलहंसिका** – (झ) एद भअवदो मअणस्स णूण पडिबिम्बं होज्ज ।

**प्रभावती** – (ञ) सहि ! साहु णिरूविद । रइसहअरो एव्व देवो कुसुमाउहो आल-क्खेसु लक्खिज्जइ ।

---

(क) निरतिशयसौन्दर्यगुणवासभवन तत् कस्य हृदय न विस्मापयति
प्रतिमेव रतिपते प्रत्यादेश इव पूर्णिमाशशिन ।
शृङ्गारस्येव जीव. केन कथ्यते जगति तद् रूपम् ॥

(ख) सखि ! कलहसिके ! अनेन तव वचनेन ता रूपरचना द्रष्टुमधिक मे कौतूहल वर्तते । कथमत्रानेतव्यम्.

(ग) अस्मिन् उपनीते कि पारितोषिक प्रियसख्या दीयते

(घ) यद्रोचते सख्यै.

(ङ) तद् आत्मनो विद्याप्रभावेण ननु दर्शयामि.

(च) सखि ! कलहसिके ! स्थाने खलु विस्मयाक्षिप्त तव हृदयम् । अदृष्टपूर्वमश्रुतपूर्वं चैतादृश रूपम्

(छ) कि तव सखी अस्थाने विस्मिता भवति.

(ज) सखि ! इद कस्य नाम महाभागस्य प्रतिबिम्ब भवेत्.

(झ) एतद् भगवतो मदनस्य नून प्रतिबिम्ब भवेत्.

(ञ) सखि ! साधु निरूपितम् । रतिसहचर एव देव. कुसुमायुध आलेख्येषु लक्ष्यते.

**कलहंसिका** – (क) एव्व एदं । इमस्स रूवादिसअस्स अण्णत्तासम्भावणाए मए एव्व भणिद ।

**प्रभावती** – (ख) सहि! इद कस्स रूव केण वा लिहिदं ति कह जाणिदव्व ।

**कलहंसिका** –(ग) पिअसहि ! कआ वि णूण अत्तणो हिअअवल्लहो आलिहिदो भवे ।

**प्रभावती** – (घ) हला ! एसा आकिदी कह इत्थिआए अक्खलिअहिअआए एव्वं अविअल आलिहिदव्वा ।

**कलहंसिका**– (ङ) जदि एव्व, इद तस्स एव्व कलाकुसलस्स अय्यभद्दणडस्स विण्णाण ति चिन्तेमि ।

**प्रभावती** – (च) हला! तेण वि एत्थ सन्तो एव्व कोऽवि आलिहिदो, अह वा बुद्धिविहवणिम्मिओ ।

**कलहंसिका** – (छ) पिअसहि ! एस सण्णिवेसो कस्स हिअअस्स पडिहादि। ता कहि वि अत्थि एव्व । विचित्तं खु पआवइणो णिम्माण ।

**प्रभावती** – (ज) ता अय्यभद्दणड एव्व हक्कारिअ पुच्छामो।

**कलहंसिका** – (झ) तह करह्म ।

**प्रभावती** – (नेपथ्याभिमुखमवलोक्य) (ञ) हञ्जे ! मदणिए !

(प्रविश्य)

**प्रतीहारी** (सप्रणामम्) (ट) आदिसदु भट्टिदारिआ ।

**प्रभावती** (ठ) मदणिए ! अय्यभद्दणडो आणीअदु ।

---

(क) एवमेतद् । अस्य रूपातिशयस्यान्यत्रासम्भावनया मयैव भणितम्

(ख) सखि ! इद कस्य रूप केन वा लिखितमिति कथ ज्ञातव्यम् .

(ग) प्रियसखि ! कयापि नूनमात्मनो हृदयवल्लभ आलिखितो भवेत् .

(घ) सखि! एषाकृति. कथ स्त्रियास्खलितहृदययैवमविकलमालेखितव्या.

(ङ) यद्येवामिद तस्यैव कलाकुशलस्यार्यभद्रनटस्य विज्ञानमिति चिन्तयामि.

(च) सखि ! तेनाप्यत्र सन्नेव कोऽप्यालिखित । अथ वा बुद्धिविभवनिर्मित .

(छ) प्रियसखि! एष सन्निवेश. कस्य हृदयस्य प्रतिभाति तत्कुत्राप्यस्त्येव । विचित्र खलु प्रजापते· निर्माणम्

(ज) तद् आर्यभद्रनटमेवाकार्य पृच्छाव .

(झ) तथा कुर्व·.

(ञ) चेटि! मदनिके!

(ट) आदिशतु भर्तृदारिका.

(ठ) मदनिके! आर्यभद्रनट आनीयताम्.

**प्रतीहारी**—(क) जं भट्टिदारिआ आणवेदि । (निष्क्रान्ता)

(ततः प्रविशति प्रतीहार्योपदिश्यमानमार्गो भद्रनटः)

**भद्रनटः**—अहो दानवेन्द्र[1]महादेव्याः प्रभावती प्रति स्नेहातिशयः, यदियं तस्याः सङ्गीतविद्याग्रहणकौशलपरिज्ञानाय प्रतिकल चेटिकाः प्रहिणोति । अदृष्टचर एव प्रभावत्याः प्रज्ञाप्रकर्षः ।

सकृदपि मयोपदिष्टः शिक्षावसरे क्रियाक्रमस्तस्याः ।
पात्रविशेषस्पृहया प्राय सङ्क्रामति क्षणेनैव ॥ २ ॥

(सविमर्शम् आत्मगतम्) अनुष्ठितप्रायश्च मया स्वामिनो वसुदेवनन्दनस्य नियोगः । प्रवेशितस्तावन्मया परिगृहीतशैलूषभूमिको गदसाम्बसहितः सपरिजनः कुमार प्रद्युम्नः । वशीकृतश्च प्रयोगदर्शनेन सपौरजनो दानवराजः । तन्नियुक्तश्च सङ्गीतविद्या शिक्षयन् प्रभावत्या विस्रम्भपात्रमभवम् । प्राप्तश्चायमवसर प्रद्युम्नगुणकीर्तनस्य । मया चेदानीं—

तथा तथा गुणा वाच्याः प्रद्युम्नस्य महात्मनः ।
यथा यथा प्रभावत्या मनस्तत्र भवेत् स्थिरम् ॥ ३ ॥

किञ्च मया प्रद्युम्नप्रतिच्छन्दसनाथ चित्रपटमपहरन्ती कलहसिकामनिच्छतेवाभ्युपगतवता युक्तमेवानुष्ठितम् । सा कदाचित् प्रदर्शयेत् प्रभावत्यै चित्रपटम् । यदि च तया दानवराजपुत्र्या कुमारस्य प्रतिकृतिर्दृश्येत, तदा सिद्धमेव नः समीहितम् । (परितोऽवलोक्य प्रकाशम्) अहो खल्वियममितानुभावा दानवराजस्य राजधानी ।

दिग्दन्तावलदन्तकाण्डमुसलैः क्लृप्त बहिस्तोरण
स्वर्बन्दीनयनाम्बुभिः परिसरोद्यान नदीमातृकम् ।
पातालेन्द्रफणोद्धृतैश्च मणिभिर्गेहेषु दीपक्रिया
वक्तुं वज्रपुरस्य वैभवमिदं कस्यास्ति वाग्विस्तरः ॥ ४ ॥

तस्य दानवचक्रवर्तिनः सर्वपथीनमोजायितम् ।

किङ्कुर्वाणः श्रयति भवनं यस्य गीर्वाणनाथ
क्रीडोद्यानं भजति वरुणस्तोयकर्मान्तिक सन् ।

(क) यद् भर्तृदारिका आज्ञापयति

१. 'न्द्रस्य म' ग पाठ.

कोशागारे निधिपरिवृढो मौद्रिकः सन्निधत्ते
नासीराग्र्यः सरति च पुरो दण्डयात्रासु मृत्युः ॥ ५ ॥

(परिक्रामन्) मदनिके! प्रमदवनमार्गमादेशय ।

**प्रतीहारी** — (क) इदो इदो अय्यो । (भद्रनटः प्रवेशं नाटयति)

**कलहंसिका** — (दृष्ट्वा ससम्भ्रमम्) (ख) अअं अय्यभद्दणडो परावडिदो एव्व । ता इदं चित्तवडं पच्छादेमि । (तथा करोति)

**भद्रनटः** — (अग्रतो निर्वर्ण्य) इयमत्र दानवराजपुत्री कलहंसिकया सह किमपि मन्त्रयमाणा तिष्ठति । यावदुपसरामि । (उपसृत्य) भद्रे! प्रभावति! भवतु ते मनोरथसिद्धिः ।

**कलहंसिका** — (ग) अय्यस्स पसादेण सिज्झइ एव्व पिअसहीए सव्वो मणोरहो ।

**प्रभावती** — (सप्रश्रयम्) (घ) इदं आसणं । उवविसदु अय्यो । (भद्रनटः उपविशति)

**प्रभावती** — (प्रतीहारीमालोक्य) (ङ) मदणिए! अत्तणो णिओअं अणुचिट्ठ ।

**प्रतीहारी** — (च) जं भट्टिदारिआ आणवेदि । (निष्क्रान्ता)

**भद्रनटः** —

कलकण्ठकलालापा कुसुमस्मितशोभिनी श्यामा ।
प्रमदवनवाटिकेयं भद्रे त्वामनुकरोतीव ॥ ६ ॥

**प्रभावती** — (अपवार्य) (छ) कलहंसिए! अय्यभद्दणडो पडिच्छन्दवुत्तन्तं कहं पुच्छिदव्वो ।

**कलहंसिका** — (विमृश्य) (ज) अहं एव्व पुच्छामि । (प्रकाशम्) अय्य! दाणिं तुमं किं वि पुच्छिदुं इच्छामो ।

**भद्रनटः** — किमिव ।

---

(क) इत इत आर्यः
(ख) अयमार्यभद्रनटः परापतित एव । तदिदं चित्रपटं प्रच्छादयामि
(ग) आर्यस्य प्रसादेन सिध्यत्येव प्रियसख्याः सर्वो मनोरथः
(घ) इदमासनम् । उपविशत्वार्यः
(ङ) मदनिके! आत्मनो नियोगमनुतिष्ठ
(च) यद् भर्तृदारिका आज्ञापयति
(छ) कलहंसिके! आर्यभद्रनटः प्रतिच्छन्दवृत्तान्तं कथं प्रष्टव्यः
(ज) अहमेव पृच्छामि । आर्य! इदानीं त्वां किमपि प्रष्टुमिच्छावः

**कलहंसिका**--(क) अय्य ! इम सअल वि तिहुवणं सञ्चरइ भवम्। एत्थ जइ णीसामण्णरूवउणो तुए को वि [illegible] विसेसो दिट्ठो, ता को सो कहिज्जउ ।

**भद्रनटः**--(स्वगतम्) अयमेवास्मद्विवक्षितस्य समुचितः समयः । एवन्तावत् । (प्रकाश प्रभावती निर्दिश्य) किमिह कथनीयम्। नन्वसौ दृश्यत एव ।

(प्रभावती लज्जा नाटयति)

**कलहंसिका**--(सोत्प्राशम्) (ख) अय्य ! साहु भणिअ । कि अत्थि एआरिसरूवो पुरिसो ।

**भद्रनटः**—

अस्ति त्रिलोकमहितान्वयलब्धजन्मा
काश्चिद्युवा भुज[illegible]रिलोक. ।
शंसन्ति य युवतय. समवेक्ष्य साक्षात्
सौन्दर्यसारसदनाङ्गमनङ्गमेव ॥ ७ ॥

**प्रभावती**--(ग) किं सो देवो उद दाणओ आदु माणुसो ।

**भद्रनटः**—

देवेषु देवः सुश्रोणि ! दानवेषु च दानवः ।
मानुषेषु च धर्मात्मा मानुष स महाबलः ॥ ८ ॥

**कलहंसिका**--(घ) क उण लोअ सो अलङ्करेइ ।

**भद्रनटः**—

असौ चन्दनकर्पूरमल्लिकामौक्तिकत्विषा ।
साम्प्रतं कीर्तिसम्पत्त्या प्रसाधयति मेदिनीम् ॥ ९ ॥

**कलहंसिका**--(ङ) तस्स महाभाअस्स पहवं णामहेअ च कहेदु भवम् ।

**भद्रनटः**--तर्हि श्रूयताम्—

चाटूक्तिभङ्गिचतुरैश्चतुराननाद्यै-
रभ्यर्थितः सुरगणैरवनीमुपेतः ।

---

(क) आर्य ! इद सकलमपि त्रिभुवन सञ्चरति भवान् । अत्र यदि निस्सामान्यरूपगुणस्त्वया कोऽप्याकृतिविशेषो दृष्ट., तत् क स कथ्यताम् .

(ख) आर्य ! साधु भणितम् । किमस्त्येतादृशरूप पुरुष..

(ग) किं स देव उत दानव अथवा मानुष .

(घ) क पुनर्लोक सोऽलङ्करोति

(ङ) तस्य महाभागस्य प्रभव नामधेय च कथयतु भवान्.

वशे [illegible]

[illegible] मुकुन्दः ॥ १० ॥

**प्रभावती** — (क) 'भअवं [illegible] अन्दणो भविअ दुवारवइं अहिचिट्ठइ' त्ति सुदं मए ताद[illegible]णीए महेसिणो णारदस्स मुहादो ।

**कलहंसिका** -- (ख) तदो तदो ।

**भद्रनटः** —

समस्तमन्त[illegible]तस्माद्दुदार सुमनोभिनन्द्य. ।
प्रद्युम्ननामा त[illegible] परुर्हुदीनामिव पारिजात' ॥ ११ ॥

**प्रभावती** — (जनान्तिकम्) [illegible] सुणिज्जइ एव्व मए अहिरूवजुवप्प-सगेसु गो[illegible]त्तजरदीहिं [illegible] सो महाभाओ ।

**कलहंसिका** -- (साकूत[illegible]) (घ) पिअसहि ! इमं पज्जुण्णं हिअए धारअन्तीए खु तुए सअंवराग[illegible] वि जुवजणो ओहीरिदो ।

([illegible] पश्यति)

**भद्रनटः** -- (आत्मगतम्) [illegible] प्रद्युम्नस्य गुणाकर्णनेन विकसितनयनाम्बुजा कमपि दशाविशे[illegible]व । तदहमस्य गुणानेव कीर्तयामि ।

(प्रकाशम्)

सौन्दर्यरा[illegible]ऽपि चराचरेषु
प्रायो बभूव [illegible] सृष्टौ ।
नो चे[illegible]नश्री.
सृज्येत कश्चि[illegible]ऽपि च तेन धात्रा ॥ १२ ॥

**प्रभावती** —(अपवार्य साश[illegible]) (ङ) अवि णाम सो च्चेअ एसो चित्तगओ होज्जइ ।

**कलहंसिका** -- (सोत्प्रा[illegible]) (च) [illegible] सो च्चेअ दे चित्तगओ ।

---

(क) 'भगवान् श्रीवल्लभो [illegible] भूत्वा द्वारवतीमधितिष्ठति' इति श्रुत मया तातसमीपवर्तिन्या महर्षे नारदस्य मुखात्.

(ख) ततस्तत

(ग) सखि ! श्रूयत एव [illegible] गात्रजरतीभि कथ्यमान स महाभाग'

(घ) प्रियसखि ! इम प्रद्यु[illegible] रन्त्या खलु त्वया स्वयवरागत. सर्वोऽपि युवजनोऽवधीरित

(ङ) अपि नाम स एवैष चित्रगत भविष्यति.

(च) यत्सत्य स एव ते चित्तगत..

**प्रभावती** --(रोषं नाटयित्वा) (क) अवेहि ... अवेहि । णं भणामि 'एसो आलेक्खगअे सो पज्जुण्णो ...' त्ति ।

**कलहंसिका** -- (प्रकाशम्) (ख) अय्य ! केरिसो ... ।

**भद्रनटः** --स खलु मया कथमीदृश इति वर्ण्यते ।

अनितरसामान्यानां कुलभवने ... ।
उपमानजातमखिल ... ॥ १३ ॥

**प्रभावती** --(जनान्तिकम्) (ग) हला ! ... इमिणा पडिच्छन्दएण सो सरिसो त्ति अय्यभद्दणड पुच्छ ।

**कलहंसिका** --(घ) तह । (प्रकाशम्) अय्य ... तस्स किं उवमाणम् । (इति चित्रपट दर्शयति)

**भद्रनटः** --(सहर्षमात्मगतम्) दिष्ट्या ... वृत्तम् । (प्रकाशम्) तस्यैव कुमारस्य प्रतिकृतिरियम् ।

**प्रभावती** --(सानन्दम् आत्मगतम्) (ङ) हिअअ ! दिट्ठिआ वड्ढसि, जदो बहुसो सुणिज्जन्तरूवगुणस्स जस्स दंसणं तुए अहिलसिद, तस्स पडिकिदी दाणीं दिट्ठा । (तत्पूर्वमिव चित्रपट ... पश्यति)

**कलहंसिका** --(अपवार्य) (च) पिअसहि ! फलिदो अम्हाण मणोरहो ।

**प्रभावती** --(छ) अय्य ! किं णिमित्त तुए इमो आलिहिदो ।

**भद्रनटः** --तस्य महाभागस्य विश्लेषतप्तमात्मान निर्वापयितुम् ।

तच्चक्षुर्यदमुष्य तादृशमहो रूप ...
तच्छ्रोत्रं वचनामृत पिबति यत् ... रगाम्भोनिधेः ।
सा वाणी गुणसम्पद वदति या ...
तच्चेतश्च चराचरं त्रिभुवन यत्तन्मय पश्यति ॥ १४ ॥

---

(क) अपेहि परिहासशीले ! अपेहि । ननु भणामि 'एष ... स प्रद्युम्नो भवेद्' इति

(ख) आर्य ! कीदृश स .

(ग) सखि ! कलहंसिके ! किमनेन प्रतिच्छन्दकेन स सदृश इति आर्यभद्रनट पृच्छ

(घ) तथा । आर्य ! इद प्रतिरूप ननु तस्य ...

(ङ) हृदय ! दिष्ट्या वर्द्धसे, यतो बहुश श्रूयमाणरूपगुणस्य यस्य दर्शन त्वयाभिलषित, तस्य प्रतिकृतिरिदानी दृष्टा

(च) प्रियसखि ! फलितोऽस्माक मनोरथ

(छ) आर्ये ! किंनिमित्त त्वयायमालिखित

**प्रभावती**—(आत्मगतम्) (क) अहो पुरिसा अवि तस्स विरहं विसहिदुं न पारेन्ति, कि उण अबलाओ ।

**कलहंसिका**—(ख) अय्य! सो महाणुभावो णिएण एव्व रूवेण कहं दट्ठव्वो ।

**भद्रनटः**—स खलु कुमारः सम्प्रति द्वारवतीमध्यास्ते ।

**प्रभावती**—(अपवार्य) (ग) हला! दूरट्ठिए तस्सि अह्माण मणोरहो कहं सहलो होज्ज ।

**कलहंसिका**—(घ) सहि! मा एव्व भण । सहलो एव्व भविस्सदि, जदो महेसिणा दुव्वासेण 'जस्सिं तुमं बद्धभावा, सो दे भत्ता भविस्सदि'त्ति दिण्णो तुह वरो ।

**प्रभावती**—(सप्रार्थनम्) (ङ) सहि! एत्थ अप्पडिहदं तस्स महामुणिणो वअणं होदु ।

**कलहंसिका**—(च) किं एदं पत्थणिज्ज। (प्रकाशम्) अय्य! सव्वाआररमणिज्जस्स तस्स दूरदेसणिवासो अह्माण हिअअं दूमेइ ।

**भद्रनटः**—यदि तस्य दर्शने कुतूहलं, तत् कतिपयैरेव दिवसैर्मम विद्याप्रभावेण तं कुमारमिहानयामि ।

**प्रभावती**—(साशासमात्मगतम्) (छ) अवि णाम सो महाभाओ एत्थ समागदो भवे।

(प्रविश्य)

**प्रतीहारी**—(सप्रणामम्) (ज) भट्टिदारिए! एसो उवट्ठिदो ।

**प्रभावती**—(सवितर्कम्) (झ) को णु खु सो ।

---

(क) अहो पुरुषा अपि तस्य विरह विसोढु न पारयन्ति, कि पुनरबलाः

(ख) आर्य! स महानुभावो निजेनैव रूपेण कथ द्रष्टव्य

(ग) सखि! दूरस्थिते तस्मिन् अस्माक मनोरथ कथ सफलो भवेत्

(घ) सखि! मैव भण । सफलमेव भविष्यति । यतो महर्षिणा दुर्वाससा 'यस्मिंस्त्व बद्धभावा, स ते भर्ता भविष्यति' इति दत्तस्तुभ्य वर

(ङ) सखि! अत्राप्रतिहत तस्य महामुनेर्वचन भवतु

(च) किमेतत् प्रार्थनीयम् । आर्य! सर्वाकाररमणीयस्य तस्य दूरदेशनिवासोऽस्माकं हृदय दुनोति.

(छ) अपि नाम स महाभागोऽत्र समागतो भवेत्

(ज) भर्तृदारिके! एष उपस्थित

(झ) को नु खलु स

---

१ 'ह खु स' ग-पाठ

२. 'हाणुभा' ग-पाठ .

**प्रतीहारी** – (क) देवीए कञ्चुई वरदत्तो ।

**प्रभावती** – (ख) मदणिए! णं अविलम्बिअ पवेसअ ।

**प्रतीहारी** – (ग) जं भट्टिदारिआ आणवेदि (निष्क्रान्ता)

(प्रविश्य)

**काञ्चुकीयः** – जयतु भवती । भद्रे! उद्यानरत्ननाम्नः पुत्रीकृतस्य बालसहकारस्य प्रथमकुसुमोदयमहोत्सवमनुभवितु देवी त्वां प्रतिपालयन्ती तिष्ठति ।

**कलहंसिका** – (घ) जाव अह्मे देवीसआस गच्छह्म ।

**प्रभावती** – (अपवार्य) (ङ) हला! इद मे हिअअस्स आसासइत्तअ चित्तवड पच्छादअन्ती आअच्छ ।

**भद्रनटः** —

किसलयदर्शितरागस्तरुण' सहकारपादप सैषः ।
मोदयिष्यति त्वामचिराय नवेन पुष्पहासेन ॥ १९ ॥

( निष्क्रान्ता सर्वे )

इति द्वितीयोऽङ्कः ।

---

(क) देव्याः कञ्चुकी वरदत्त

(ख) मदनिके! नन्वाविलम्बित प्रवेशय

(ग) यद् भर्तृदारिका आज्ञापयति

(घ) यावदावा देवीसकाश गच्छाव .

(ङ) सखि! इम मे हृदयस्याश्वासयितृक चित्रपट प्रच्छादयन्त्यागच्छ.

## अथ तृतीयोऽङ्कः ।

(तत प्रविशति भद्रनटः)

**भद्रनटः** – (सपरितोषम्)

आकर्ण्य शम्बररिपोः परमाभिरूप्यं
दृष्ट्वा च तत्प्रतिकृति दनुजेन्द्रपुत्री ।
कामेन कामपि दशामनुभाव्यमाना
यावत्समापयति सा हृदयस्थितं मे ॥ १ ॥

आवेदितश्च मया गगनपथसञ्चारिणा भगवतः कृष्णस्य वज्रपुरवृत्तान्तः । किञ्च सोऽपि कुमारः प्रद्युम्न प्रभावत्याः सौन्दर्यादिगुणसम्पदम् आत्मविषयमनुरागातिशय च मन्मुखेन श्रुत्वा सम्प्रति तद्दर्शनमेवाभिनाञ्छति । (सविमर्शम्) तदहमिदानी केनोपायेन ता कुमारस्य दृष्टिपथ नेष्यामि । (सस्मरणम्) समादिष्टोऽस्मि किल साम्प्रतम् 'अद्यास्मिन्वसन्तोत्सवे कोऽपि प्रबन्धः प्रयुज्यताम्' इति देवेन वज्रणाभेन । तन्महर्षिणा नारदेन विरचितं रम्भाभिसरण नाम प्रेक्षणक यावदभिनयामि । इह च मया कुमारः प्रद्युम्नो नलकूबरभूमिकां ग्राहयितव्यः । अह पुनस्तस्य विदूषको भविष्यामि । मनोवती च रम्भा भविष्यति । अयमेवापायः कुमारस्य प्रभावतीदर्शने । अपि चात्र नलकूबरमभिसरन्ती रम्भामवलोकयन्त्या दानवराजपुत्र्या मनस्तस्य प्रद्युम्नस्य सङ्गमे स्वयमेव प्रवर्तेत । (पुरतोऽवलोक्य) कथमियं प्रभावत्याः प्रियसखी कलहंसिका । यावदस्यास्तदवस्थामवगच्छामि ।

(प्रविश्य)

**कलहंसिका** -- (सखेदम्) (क) हन्त कइआ णु एस पिअसहीए णिव्वाहीअइ मअणसन्दावो ।

**भद्रनटः** – (उपसृत्य) अयि ! कलहंसिके ! अपि कुशल तव प्रियसख्याः ।

**कलहंसिका** -- (ख) जइ परं अय्यस्स पसादो होज्ज ।

**भद्रनटः** -- किं निर्विण्णेव कथयमि ।

---

(क) कदा नु एष प्रियसख्या निर्वाप्यते मदनसन्ताप

(ख) यदि परमार्यस्य प्रसादो भवेत्.

**कलहंसिका**– (क) अय्य ! महन्तो मम णिव्वेदो, ज तस्स पज्जुण्णस्स पडिरूव-दसणादो आरहिअ वम्महपराहीणहिअआ कं वि दसाविसेस अणुभवइ । जह—

मग्ग उज्झइ दाहिणस्स वउलामोआवह वाउणो
उत्ताणेहि करेहि रुम्भइ बला उत्तम्मिरी चन्दिमम् ।
ओवाहेइ कह वि सुण्णहिअआ आआमिणि जामिणि
पेक्खन्ती पडिरूवअ अणिमिसा त एव्व सा चिट्ठइ ॥ २ ॥

अवि अ—

फसेण व अच्चुण्हा मणम्मि कामग्गिणो जलन्तस्स ।
अहरपवालकिसलअ इमाए पव्वाअअन्ति णीसासा ॥ ३ ॥

**भद्रनटः**–युज्यत एव प्रभावत्याः प्रद्युम्ने भावबन्ध ।

**कलहंसिका** (ख) एत्थ णवर अय्यस्स पक्खवादो एव्व पज्जुण्णदसणूसुअहि-अआए पिअसहीए मअणसञ्जरस्स सिसिरोवआरो ।

**भद्रनटः**—अयि ! कलहसिके ! मैव निर्विण्णा भव ।

चन्द्र प्रदोष इव सर्वजनाभिनन्द्य
प्रद्युम्नमेनमहमत्र हि दर्शयित्वा ।
अह्नाय ता कुमुदिनीमिव बद्धभावा-
मामोदयेयमसुराधिपतेस्तनूजाम् ॥ ४ ॥

**कलहंसिका**– (सहर्षम्) (ग) सहला होदु अय्यस्स एसा पडिण्णा ।

---

(क) आर्य ! महान् मम निर्वेद , यत् तस्य प्रद्युम्नस्य प्रतिरूपदर्शनादारभ्य मन्मथपराधीन-हृदया कमपि दशाविशेषमनुभवति । यथा—

मार्गमुज्झति दक्षिणस्य वकुलामोदावह वायो
उत्तानाभ्या कराभ्या रुणद्धि बलादुत्ताम्यन्ती चद्रिकाम् ।
अपवाहयति कथमपि शून्यहृदया आयामिनी यामिनीं
पश्यन्ती प्रतिरूपकमनिमिषा तदेव सा तिष्ठति ॥ २ ॥

अपि च

स्पर्शेनेवात्युष्णा मनसि कामाग्नेर्ज्वलत. ।
अधरप्रवालकिसलयमस्या प्रम्लापयन्ति निश्वासाः ॥ ३ ॥

(ख) अत्र नवरमार्यस्य पक्षपात एव प्रद्युम्नदर्शनोत्सुकहृदयाया. प्रियसख्या मदनसज्वरस्य शिशिरोपचारः

(ग) सफला भवत्वार्यस्यैषा प्रतिज्ञा.

**भद्रनटः**— क पुनर्गम्यते भवत्या ।

**कलहंसिका**— अह खु पिअसहीए तादो णाडअ दट्ठु पेक्खामण्डवं गदो ण वेत्ति जाणिदु णिउत्तह्मि । एसो देवो दाणि पेक्खामण्डवं पत्थिदो । एदं पिअसहीए णिवेदिउ गच्छामि ।

**भद्रनटः**— तत् त्वरितमेव प्रभावतीं देवस्य सकाशमानय । अहमपि गृहीतनैपथ्यान् शैलूषानाहूय प्रयोगदर्शनोद्युक्त देवमुपतिष्ठे । (इति निष्क्रान्तौ)

**मिश्रविष्कम्भकः ।**

---

(तत प्रविशति हसेनानुगम्यमानो वज्रणाभ कलहसिकाद्वितीया प्रभावती विभवतश्च परिवार )

**वज्रणाभः**—(सावलेपम्)

आहर्तुमुद्यतवतः क्रतुमश्वमेध
तातस्य तस्य वचन यदि नान्तराय ।
अद्यैव शक्रममरैरनुगम्यमानं
हत्वा ददामि बलिमाहवदेवतायै ॥ ९ ॥

स च जलाशयः सम्प्रति कृष्णावष्टम्भेन नितरा दृप्यति । (सावज्ञम्) किमनेन मनुष्यकीटेन । समाप्ते पुनस्तातकाश्यपस्य महाक्रतौ यथासमीहितमाचरिष्यामि ।

**हंसः**—(स्मरणनाटितकेन सविषादम् आत्मगतम्) श्रुत हि मया सुधर्मागतेन नारदमुखात् 'प्रद्युम्नेन वज्रणाभं घातयिष्यामीति कृष्णः प्रतिज्ञातवानि'ति । अयं पुनर्निजभुजावलेपमत्त· कृष्णमपि तृणाय मन्यते । किमत्र भविष्यतीति सम्प्रमुग्धोऽस्मि । अथवा वज्रणाभः खल्वसौ । (प्रकाशम्)

तुभ्यं दानवसार्वभौम! भुवने प्राचीनदैत्याधिप-
श्लाघालङ्घनजाङ्घिकैर्गुणगणैः श्रेष्ठाय तिष्ठेत कः ।
क्षिप्तं हस्तिपकैः पुरो न हि यवग्रासं करैर्गृह्णते
यद्बाह्वोरनुचिन्त्य विक्रमविधि दिक्पालदन्तावलाः ॥ ६ ॥

**वज्रणाभः**—भोश्चारणपते! उच्यता सपरिजनो भद्रनटः 'प्रस्तूयतां प्रयोग' इति ।

---

(क) अह खलु प्रियसख्यास्तातो नाटक द्रष्टु प्रेक्षामण्डप गतो न वेति ज्ञातु नियुक्तास्मि । एष देव इदानीं प्रेक्षामण्डप प्रस्थितः । एतत् प्रियसख्यै निवेदयितु गच्छामि.

**प्रभावती**--(अपवार्य) (क) हला! कलहंसिए! दाणि अह्माण मणोरहसिद्धिकालण अय्यभद्दणडो दक्खिस्सदि ।

**कलहंसिका** -- (ख) पिअसहि! अइरेण ण्व इमस्स पक्खवादेण तुह मणोरहो वि दिट्ठिवह ओआरिस्सदि ।

**हंसः** -- (नेपथ्याभिमुखमवलोक्य) अयि! भद्रनट! एष दानवचक्रवर्ती प्रेक्षणकदर्शनकृतक्षणस्तिष्ठति । तदारभ्यताम् ।

(प्रविश्य)

**सूत्रधारः** —

देव· स जयति जगता मान्यः शृङ्गारदैवत मदनः ।
यच्छक्त्या वपुरासीच्छम्भो· शैलेन्द्रकन्यकाशबलम् ॥ ७ ॥

**हंसः** -- देव! प्रस्तुत, यदिय द्वादशपदा नान्दी प्रवर्तिता ।

**सूत्रधारः** -- तत्रभवत कमलयोनिजन्मनो देवर्षेर्नारदस्य कृति रम्भाभिसरणं नाम प्रेक्षणक प्रयोक्ष्ये । तत· काश्यपवशमुक्तामणिना भरतविद्यापारीणेन देवेन वज्रपुरपरमेश्वरेण दीयतामवधानम् ।

**वज्रणाभः** -- इह कृतावधाना एव वयम् ।

**सूत्रधारः** —

देव! दनुजाधिप! त्वा त्रिभुवनलक्ष्मीरेव स्वय रागात् ।
अभिरूपमभिसृतवती नलकूबरमत्र नाटके रम्भा ॥ ८ ॥

**कलहंसिका** -- (अपवार्य साकूतस्मितम्) (ग) पिअसहि! एसो ण्व मग्गो मअणपरवसाण इत्थिआण ।

(प्रभावती अधोमुखी स्मयते)

**सूत्रधारः**-- (समन्तादवलोक्य) अहो समुचितकारिता भगवतः सहस्रभानोः । यतः--

सायन्तनास्थानमधिष्ठितेऽद्य
दिदृक्षया प्रेक्षणकस्य देवे ।

---

(क) सखि! कलहंसिके! इदानीमस्माक मनोरथसिद्धिकारणमार्यभद्रनटो द्रक्ष्यते.

(ख) प्रियसखि! अचिरेणैवास्य पक्षपातेन तव मनोरथोऽपि दृष्टिपथमवतरिष्यति.

(ग) प्रियसखि! एष एव मार्गो मदनपरवशाना स्त्रीणाम्

---

१. 'सार ना' क-ख. पाठ..

निह्नुत्य ताप निजमशुमाली
पतत्ययं पश्चिमवारिराशौ ॥ ९ ॥

(द्वितीयेन नेपथ्ये)

दिवसकरतापखिन्न. समधुकर. कैरवाकरो रक्तः।
प्रतिपालयति रजन्या समागम चन्द्रहासिन्या· ॥ १० ॥

**सूत्रधारः**—कथमुपक्रान्त भरतपुत्रै । यदिय रम्भागमन प्रतिपालयतो विदूषकद्वितीयस्य नलकूबरस्य प्रावेशिकी ध्रुवा । तदहमप्यनन्तरभूमिकाग्रहणाय साधयामि । (निष्क्रान्त·)

## स्थापना ।

(तत प्रविशाते विदूषकेण सह नलकूबर ।)

**नलकूबरः**—(समन्तात् पश्यन् अपवार्य सविस्मयानन्दम्) सखे! भद्रनट!

लक्ष्मी किं धुतपद्मा ज्योत्स्ना किं चन्द्रविश्लिष्टा ।
किं वा रतिर्वियुक्ता मदनेन मनोरमा केयम् ॥ ११ ॥

**विदूषकः**—ननु रतिरेवैषा हृदयगतेन भवता सयुक्ता च ।

**नलकूबरः**—भद्रनट! अपि सैवेयमस्मन्मानसराजहसी प्रभावती ।

**विदूषकः**—आम सैवेय सौन्दर्यसारमूलनीवी वज्रणाभकुलमङ्गलदीपिका ।

**नलकूबरः**—(सानुरागम्)

कान्तामेना श्रुतवते कर्णाय स्पृहयालुना ।
मनोरथश्चिराल्लब्धः पश्यता मम चक्षुषा ॥ १२ ॥

**विदूषकः**—कुमार! अलमतिप्रसङ्गेन, यावत् प्रकृतमनुसराव. ।

**नलकूबरः**—(आकारसवरण नाटयन् प्रकाशम्) सखे! भद्राङ्क! इद चैत्ररथसम्भूत सङ्केतलतामण्डप प्रविष्टानामस्माकं महती खलु वेला । कथं नाद्याप्यमरलोकवैजयन्ती मे प्रियतमा समागच्छति । (सोत्कण्ठम्)

मान्येन चैत्ररथकाननमारुतेन सन्धुक्षितस्मरहुताशनतप्तगात्रम् ।
निर्वापयिष्यति कदा नु नितम्बिनी सा पाटीरपङ्कशिशिरै. परिरम्भणैर्माम् ॥

**प्रभावती**—(अपवार्य) (क) हला! धण्णा खु सा इत्थिआ, जा दइएण एव्वं उक्कण्ठिज्जइ ।

---

(क) सखि! धन्या खलु सा स्त्री, या दयितेनैवमुत्कण्ठ्यते.

**कलहंसिका**— (क) पिअसहि! सो वि जुवा धण्णो, जो पिअदमाए सअं अभिसरिज्जइ ।

**वज्रणाभः**—(साश्चर्यम्)अहो भद्रनटस्य शैलूषपतेरभिनयचातुरी ।

स वेष सा वचोभङ्गिस्तत्तत्त्व तच्च चेष्टितम् ।
नलकूबर एवाय पश्यत प्रतिभाति मे ॥ १४ ॥

**हंसः**—देव! किमुच्यते । यस्यायमनुकरोति, मुनिजनवरप्रभावात् तत्त्वेनैव प्रेक्षकाणा प्रतिभासते ।

**विदूषकः**— (ख) अल दाव ताए अणागदाए । अज्ज उण आगदाए सअलजणाणन्दइत्तिआए इमाए चन्दिमाए अत्ताण णिव्वावेहि ।

**नलकूबरः**—मूर्ख! न साधु भणितम् ।

यदितो वियोगतप्ते देहे चन्द्रातप दीप्तम् ।
अविषह्यपातमार्द्रे कलयाम्यधुना क्षते क्षारम् ॥ १५ ॥

**प्रभावती**—(आत्मगतम्) (ग) सच्च दूसहो एव्व चन्दाअवो उक्कण्ठिआण ।

**विदूषकः**—(अपवार्य साकूतस्मितम्) कुमार! [illegible] तवावस्थासूचनोचितमभिनेयवस्तु दिष्ट्या समापतितम् ।

**नलकूबरः**—भद्र[1]! न खलु दिष्ट्या, किन्तु भवतो बुद्धिवैभवेन ।

**विदूषकः**—(घ) वअस्स! मम उण बह्मणीविउत्तस्स कह सुहाअ होदि चन्दिमा ।

**नलकूबरः**—(सस्मितम्) इह हि को नाम भवानिव धीर । मम हृदयजीवातुः केन चिरायते रम्भा ।

**विदूषकः**— (ङ) सुरलोआदो इम केलाससिहर आवडन्ती सा तुह वल्लहा केण वि पिसाएण वा रक्खसेण वा अन्तरा गहिदत्ति तक्केमि ।

---

(क) प्रियसखि! सोऽपि युवा धन्यो, य प्रियतमया स्वयमभिसार्यते

(ख) अल तावत् तया अनागतया । अद्य पुनरागतया सकलजनानन्ददायिन्या अनया चन्द्रिकया आत्मान निर्वापय

(ग) सत्य दुस्सह एव चन्द्रातप उत्कण्ठितानाम्

(घ) वयस्य! मम पुनर्ब्राह्मणीवियुक्तस्य [illegible] सुखाय भवति चन्द्रिका.

(ङ) सुरलोकादिद कैलासशिखरमापतन्ती सा तव वल्लभा केनापि पिशाचेन वा राक्षसेन वान्तरा गृहीतेति तर्कयामि

१ 'सखे! भ' ग-पाठ

**नलकूबरः**-- (सगर्वम्) पिशाचेषु राक्षसेषु वा को नामास्मत्परिग्रहमङ्गीकरिष्यति।

(नेपथ्ये)

(क) णाह! परित्ताआहि परित्ताआहि।

**वज्रणाभः**-- (आकर्ण्य ससम्भ्रम सरोषञ्च) क एष मयि तिष्ठति वज्रणाभे पराभिद्रव करोति धनुर्धरः।

**हंसः**-- महाराज! नाटकमिदम्। अलमत्र सरम्भेण। इयं हि नलकूबरमभिसरन्ती रम्भा मध्येमार्गं रावणेनाभिभूयमाना स्ववल्लभं शरणमाक्रन्दति। त्वयि शासितरि को नाम भयावकाश प्रजानाम्। सम्प्रति हि--

निरन्तराय परिपालितानि भुजेन ते वज्रपुरीभुजङ्ग!।
अवाप्तकामान्यकुतोभयानि तृप्तिं चिरादश्नुवते जगन्ति॥ १६॥

(वज्रणाभ सलज्ज तिष्ठति)

**नलकूबरः**-- (श्रवणनाटितकेन नेपथ्याभिमुखमवलोक्य सावेगम्)

म्लानच्छविर्गमनवेगतरङ्गिताङ्गी[1]
मत्तद्विपेन लुलिता वनदीर्घिकेव।
सैषा भयातिशयचञ्चलनेत्रमीना
दुःखाकरोति हृदय सुरसुन्दरी मे॥ १७॥

(प्रविश्य सम्भ्रान्ता)

**रम्भा**-- (ख) णाह! परित्ताआहि परित्ताआहि। (इति पादयोः पतति)

**नलकूबरः**-- (ससम्भ्रममुत्थाप्य) भीरु! नलकूबरे तिष्ठति कुत· परित्रातव्या भवती।

**रम्भा**-- (ग) णाह! इमादो रक्खसवइणो दसकण्ठादो।

**नलकूबरः**-- प्रिये! तव किमपराद्धमनेन रावणहतकेन।

**रम्भा**- (घ) णाह! एत्थ तुह सआस आअच्छन्ति एसो दुट्ठरक्खसो मं अभिद्दवइ।

**वज्रणाभः**-- हहह! दुरात्मनो दशमुखस्य विषयचापलम्।

---

(क) नाथ! परित्रायस्व परित्रायस्व
(ख) नाथ! परित्रायस्व परित्रायस्व
(ग) नाथ! अस्माद् राक्षसपतेर्दशकण्ठात्
(घ) नाथ! अत्र तव सकाशमागच्छन्तीमेष दुष्टराक्षसो मामभिद्रवति.

---

१. 'गाविकाम्पेताङ्गी' गू.पाठ

**विदूषकः**-- (क) सुदं एव्व केलासोवसल्ले परिकप्पिअसेणाणिवेसो णिवसइ रावणो त्ति ।

**नलकूबरः**-- (नेपथ्याभिमुखमवलोक्य सरोषावष्टम्भम्) अरे! अरे! अनात्मज्ञ! पुलस्त्यकुलपांसन! राक्षसापशद! ममापि नाम वल्लभां किमभिद्रवसि ।

नवभिरेव पुरा परितोषितो
निशिचरेन्द्र! हरस्तव मौलिभिः।
अहमसौ युधि त शरखण्डितै-
र्दशभिरप्यशनैः परितोषये ॥ १८ ॥

**वज्रणाभः**--अहो महानहङ्कार कुबेरात्मजस्य ।

**विदूषकः**--(ख) वअस्स! अल सरम्भेण । एसो खु रक्खसहदओ तुह वअण अनाअण्णन्तो विअ परम्मुहो गच्छइ ।

**नलकूबरः**--न खल्वनभिमुखेऽस्मिश्चापस्याधिकार, अस्ति पुन परकलत्रदूषकेऽमुष्मिन् शापस्य । (शापोदक गृहीत्वा) अयि भो! राक्षसाधम!

यदा गृह्णासि भोगेच्छुरनिच्छा कामपि स्त्रियम् ।
तदा ते शतधा मूर्धा भिन्नो भुवि पतिष्यति ॥ १९ ॥

(इति मुञ्चति)

**हंसः** - अनुभवतु दुराशयोऽयमात्मनो दुर्नयस्य फलम् ।

(नेपथ्ये पुष्पवृष्टिर्दुन्दुभिध्वनिश्च)

**विदूषकः**--(ग) भो! वअस्स! परवहूवन्दिग्गहिणो रावणस्स तुए विइण्ण साव अणुमोदन्ति एदे वेमाणिआ ।

**नलकूबरः**—सखे! भद्राङ्क!

वात्यानिलेनेव दशाननेन
बलीयसा व्याकुलिताङ्गयष्टि ।
रम्भेव सम्प्रत्यपि पश्य रम्भा
कम्पोत्तरा कामपि यात्यवस्थाम् ॥ २० ॥

---

(क) श्रुतमेव कैलासोपशल्ये परिकल्पितसेनानिवेशो निवसति रावण इति

(ख) वयस्य! अल सरम्भेण । एष खलु राक्षसहतकस्तव वचनमनाकर्णयन्निव पराङ्मुखो गच्छति

(ग) भो! वयस्य! परवधूबन्दिग्राहिणे रावणाय त्वया वितीर्णं शपम् अनुमोदन्त एते वैमानिका

**नलकूबरः**--(सगर्वम्) पिशाचेषु राक्षसेषु वा को नामास्मत्परिग्रहमङ्गीकरिष्यति ।

(नेपथ्ये)

(क) णाह ! परित्ताआहि परित्ताआहि ।

**वज्रणाभः**--(आकर्ण्य ससम्भ्रम सरोषञ्च) क एष मयि तिष्ठति वज्रणाभे पराभिद्रव करोति धनुर्धरः ।

**हंसः**--महाराज ! नाटकमिद्रम् । अलमत्र सरम्भेण । इयं हि नलकूबरमभिसरन्ती रम्भा मध्येमार्गं रावणेनाभिभूयमाना स्ववल्लभं शरणमाक्रन्दति । त्वयि शासितरि को नाम भयावकाश प्रजानाम् । सम्प्रति हि—

निरन्तराय परिपालितानि भुजेन ते वज्रपुरीभुजङ्ग ! ।
अवाप्तकामान्यकुतोभयानि तृप्ति चिरादश्नुवते जगन्ति ॥ १६ ॥

(वज्रणाभ सलज्ज तिष्ठति)

**नलकूबरः**--(श्रवणनाटितकेन नेपथ्याभिमुखमवलोक्य सावेगम्)

म्लानच्छविर्गमनवेगतरङ्गिताङ्गी[1]
मत्तद्विपेन लुलिता वनदीर्घिकेव ।
सैषा भयातिशयचञ्चलनेत्रमीना
दुःखाकरोति हृदय सुरसुन्दरी मे ॥ १७ ॥

(प्रविश्य सम्भ्रान्ता)

**रम्भा**-- (ख) णाह ! परित्ताआहि परित्ताआहि । (इति पादयोः पतति)

**नलकूबरः**--(ससम्भ्रममुत्थाप्य) भीरु ! नलकूबरे तिष्ठति कुत परित्रातव्या भवती ।

**रम्भा**--(ग) णाह ! इमादो रक्खसवइणो दसकण्ठादो ।

**नलकूबरः**--प्रिये ! तव किमपराद्धमनेन रावणहतकेन ।

**रम्भा**- (घ) णाह ! एत्थ तुह सआस आअच्छन्ति एसो दुट्ठरक्खसो मं अभिद्दवइ ।

**वज्रणाभः**--हहह ! दुरात्मनो दशमुखस्य विषयचापलम् ।

---

(क) नाथ ! परित्रायस्व परित्रायस्व
(ख) नाथ ! परित्रायस्व परित्रायस्व
(ग) नाथ ! अस्माद् राक्षसपतेर्दशकण्ठात्
(घ) नाथ ! अत्र तव सकाशमागच्छन्तीमेष दुष्टराक्षसो मामभिद्रवति.

---

१. 'गाविकाम्पेताङ्गी' गू.पाठ

**कलहंसिका** - (सस्मितम्) (क) पिअसहि ! रम्भामग्ग अणुसरदु होदी ।

**प्रभावती** -- (ख) हला ! अदीसन्तो जणो कह अहिसरिदव्वो ।

**कलहंसिका** - (ग) पिअसहि ! किं विह्मरिद 'अत्तणो विज्जाप्पहावेण बाहिरुज्जाणे पज्जुण्ण दसेमि' त्ति अय्यभद्दणडस्स वअणम् ।

**हंसः** --यदाह देव । तत्प्रयोगदर्शनविस्मयाक्षिप्तहृदयानामविदित एवास्माकमतीत· काल । (परितोऽवलोक्य) अये प्रौढिमारूढा प्रदोषलक्ष्मी । सम्प्रति हि—

ज्योत्स्नाम्भःस्नपितमिद विभाति विश्व
स्यन्दन्ते शशिमणिभित्तय. समन्तात् ।
स्वादिष्ठान् सुखमुपभुज्य चन्द्रपादान्
सौधाग्रस्थलमधिशेरते चकोरा ॥ २३ ॥

**वज्रणाभः**—हस ! तर्हि वासभवन गच्छाव ।

(निष्क्रान्ता सर्वे)

इति तृतीयोऽङ्कः ।

---

(क) प्रियसखि ! रम्भामार्गमनुसरतु भवती

(ख) सखि ! अदृश्यमानो जन· कथमभिसर्तव्य.

(ग) प्रियसखि ! किं विस्मृतम् 'आत्मनो विद्याप्रभावेण बाह्योद्याने प्रद्युम्न दर्शयामि' इत्यार्यभद्रनटस्य वचनम्

## अथ चतुर्थोऽङ्कः ।

(तत प्रविशति काञ्चुकीय )

**काञ्चुकीयः** — (सनिर्वेदम् )

मूकीभवन् क्षितिपते. परिहासगोष्ठ्या
समन्त्रणेषु सचिवैर्बधिरायमाण ।
अन्त·पुरेष्वनिशमन्धवदाचरश्च
धिक्कष्टमेष दिवसानतिवाहयामि ॥ १ ॥

अहो अतिदुस्सहता घर्मसमयस्य । सम्प्रति हि—

प्रादुर्भवन्नेव पतिर्दिनाना वमत्यय वह्निकणान् मयूखैः ।
निदाघतप्तो निखिलानि भूतान्याशसते वारिमयानि लोकः ॥ २ ॥

आदिष्टोऽस्मि देव्या यथा 'यदा खलु वत्सा प्रभावती मदनोत्सवमनुभूय बाह्योद्यानादागतवती, तदाप्रभृत्यस्वस्थशरीरा वर्तते । अद्य कीदृशी तस्याः समवस्थेति ज्ञात्वा समागच्छ' इति । दृष्टा च मया प्रमदवनदीर्घिकानिकटे कलहसिकया चित्तन्यस्तसन्तापाद्विशुष्यन्ती क्रियमाणशिशिरोपचारा कमप्यवस्थाविशेषमनुभवन्ती कुमारी । अद्य खलु—

स्तनकलशयोर्न्यस्त तापाद्विशुष्यति चन्दन
किसलयमयी शय्या म्लानि भजत्युपमर्दनात् ।
नवबिसलताहारो दाहादुपैति विवर्णता
तनुरपि कृशा तस्याश्चान्द्री कलेव विभाव्यते ॥ ३ ॥

किन्निमित्तमिदमस्वास्थ्यमस्याः ।

दीर्घोष्णनिश्वसितदर्शितचित्तखेद
तत्तादृशं कमपि सञ्जनयन् विकारम् ।
क्लिश्नाति किं नु मदनो नवयौवनां ता
किं वा निसर्गसुकुमारतनुं निदाघः ॥ ४ ॥

(निपुण निरूप्य) तस्यास्तादृशदशाविपाकस्य न घर्मस्तावत् कारणम् ।
यदिदानीम्—

स्मृत्वेव यत्किमपि चेतसि मीलिताक्षी
रोमाञ्चकञ्चुकितपाण्डुरगण्डरेखा ।

स्मेरानना विसृजती मुहुरश्रुबिन्दू-
न्न्यादृशी वपुषि कान्तिमसौ बिभर्ति ॥ ५ ॥

तदियमिदानीं मदनबाणलक्षीभूतेति तर्कयामि । धन्यः स खलु युवा, यमिय-मवधीरितसमस्ततरुणसमाजेन हृदयेनानवरतं धारयति । (साशसम्) अपि नाम विधिरस्या मनोरथफलं सम्पादयेत् । अथ वा तत्तादृशशीलगुणशालिन्या प्रभावत्या को नाम मनोरथो दुर्लभः स्यात् । यावदस्याः समवस्थामावेदयितुं देव्याः सकाशं गच्छामि । (निष्क्रान्तः)

## शुद्धविष्कम्भकः ।

---

(ततः प्रविशति प्रभावती कलहंसिका च)

**कलहंसिका**--(क) पिअसहि ! अह्माण महन्तो खु उवआरो किदो मअणूसवेण, जत्थ हु वाहिरुज्जाणगदाहिं अह्मेहिं चिरं आलक्खिअदंसणो सो महाभाओ दिट्ठो।

**प्रभावती**-- (ख) हला ! कलहंसिए ! अय्यभद्दणडप्पसादलद्धेण इमस्स पच्चक्खमअणस्स दंसणमहूसवेण एव्व सो मअणूसवो संवुत्तो ।

**कलहंसिका**--(ग) साहु भणिअं पिअसहीए ।

**प्रभावती**--(घ) हला ! ण सव्वो सव्वत्थ कुसलो, जं सअलकलाविअड्ढेण अय्यभद्दणडेण वि तं महाभाअं जहरूवं आलिहिदुं ण पारिदं ।

**कलहंसिका**--(ङ) आम पिअसहि ! आम, सव्वस्स वि आकिदी आलेक्खम्मि अब्भहिअसोहा लक्खिज्जइ, इमस्स उण विवरीदा दिट्ठा ।

---

(क) प्रियसखि ! अस्माकं महान् खलूपकारः कृतो मदनोत्सवेन, यत्र खलु बाह्योद्यानगताभ्यामावाभ्यां चिरमालेख्यदर्शनः स महाभागो दृष्टः

(ख) सखि ! कलहंसिके ! आर्यभद्रनटप्रसादलब्धेनास्य प्रत्यक्षमदनस्य दर्शनमहोत्सवेनैव स मदनोत्सवः संवृत्तः

(ग) साधु भणितं प्रियसख्या.

(घ) सखि ! न सर्वः सर्वत्र कुशलः, यत् सकलकलाविदग्धेनार्यभद्रनटेनापि तं महाभागं यथारूपमालिखितुं न पारितम्

(ङ) आम प्रियसखि ! आम, सर्वस्याप्याकृतिरालेख्येऽभ्यधिकशोभा लक्ष्यते, अस्य पुनर्विपरीता दृष्टा.

**प्रभावती** — (क) साहु णिरूविद । हला ! अ…व जण अहिलसन्ती अत्तणो वि अह लज्जेमि ।

**कलहंसिका** — (ख) पिअसहि ! जाणिदो एव्व तस्स भावो ।

**प्रभावती** —(ग) केरिसो ।

**कलहंसिका** — (घ) जारिसो तस्सि पिअसहीए ।

**प्रभावती** —(ङ) मणोरहेण किं णाम ण सम्भाविज्जइ ।

**कलहंसिका** — (च) ण अह जहादिट्ठ एव्व भणामि ।

मअणूसवम्मि ताहे अह्मासु गदासु वाहिरुय्याणम् ।
विह्मअपरवसहिअओ ठाइ चिर अणिमिसो एसो ॥ ६ ॥

**प्रभावती** -- (छ) हला ! तारिसेण मअणूसवेण कस्स णाम हिअअ ण विह्माविज्जइ ।

**कलहंसिका**— (ज) पिअसहि ! सअ एव्व पेक्खदु होदी । तदआ खु सो पज्जुण्णो विह्मअरसणिप्फन्दपह्मराईहि कुदूहलवसतरलमन्थरताराएहि पहरिसहरुल्लसन्तकुडिलभूमआलएहि हिअआणुराअपिसुणेहि कडक्खविक्खेवेहि कुवलइददिसाहोओ णिरन्तरुग्गअपुलअपरिभूसिदसअलसरीरो ठाविदो किं मअणूसवेण अह मम वअणेण ।

**प्रभावती** —(झ) ण सहावसिद्धा तस्स ते विलासा ।

---

(क) साधु निरूपितम् । सखि ! अज्ञातभाव जनमभिलपन्त्यात्मनोऽप्यह लज्जे
(ख) प्रियसखि ! ज्ञात एव तस्य भाव
(ग) कीदृश
(घ) यादृशस्तस्मिन् प्रियसख्या
(ङ) मनोरथेन किं नाम न सम्भाव्यते.
(च) ननु यथादृष्टमेव भणामि

मदनोत्सवे तदा अस्मासु गतासु बाह्योद्यानम् ।
विस्मयपरवशहृदयस्तिष्ठति चिरमनिमिप एष ॥

(छ) सखि ! तादृशेन मदनोत्सवेन कस्य नाम हृदय न विस्माप्यते
(ज) प्रियसखि ! स्वयमेव पश्यतु भवती । तदा खलु स प्रद्युम्नो विस्मयरसनिष्पन्दपक्ष्मराजिभि कुतूहलवशतरलमन्थरतारकै प्रहर्षभरोल्लसत्कुटिलभ्रूमण्डलैः हृदयानुरागपिशुनै कटाक्षविक्षेपै कुवलयितदिशाभोगो निरन्तरोद्गतपुलकपरिभूषितसकलशरीर स्थापित किं मदनोत्सवेन अथ मम वदनेन
(झ) ननु स्वभावसिद्धास्तस्य ते विलासा

**कलहंसिका** — (क) पिअसहि! तइआ तुह वि साहाविआ एव्व ।

**प्रभावती** — (ख) का णाम सा इत्थिआ, जा इम वि एव्व उक्कण्ठावेइ ।

**कलहंसिका** - (ग) पिअसहि! तदविहरूवसोहग्गस्स तस्स एआरिसकन्तिसम्पआए तुए विणा का णाम उक्कण्ठाकालण ।

**प्रभावती**-- (घ) सो किल दसणसमए वि चिरआलुक्कण्ठिओ विअ पण्डरकिससरीरो लक्खिओ ।

**कलहंसिका** — (ङ) ण सवणपच्चक्खिदाए तुए पज्जूसुअहिअअस्स से किअन्तो कालो ।

**प्रभावती** — (च) हला! मइ सिणेहेण एव्व तुम एव्व भणासि ।

**कलहंसिका** - (छ) पिअसहि! अय्यभद्दणडेण वि मम णिवेदिआ तस्स समवत्था ।

**प्रभावती** — (ज) कह विअ ।

**कलहंसिका** —

(झ) कादु ण मो महइ मज्जणलेवणाइ
सोहत्थल ण अ विलग्गइ चन्दभीदो ।
सङ्गीदअ ण अ सिलाहइ कि बहूहि
सव्व वि णिन्दइ तुम हिअए वहन्तो ॥ ७ ॥

**प्रभावती** — (स्वगतम्) (ञ) हिअअ! दाणि तुए समस्ससिदव्व ।
(प्रकाशम्) हला! कलहंसिए! कि तस्स महाभाअस्स पुणो दसणमहूसवो लद्धो भवे ।

---

(क) प्रियसखि! तदा तवापि स्वाभाविका एव

(ख) का नाम सा स्त्री, यमस्येवमुत्कण्ठयति.

(ग) तथाविधरूपसौभाग्यस्य तस्यैतादृशकान्तिसम्पदा त्वया विना का नामोत्कण्ठाकारणम्

(घ) स किल दर्शनसमयेऽपि चिरकालोत्कण्ठित इव पाण्डरकृशशरीरो लक्षित

(ङ) ननु श्रवणप्रत्यक्षितया त्वया पर्युत्सुकहृदयस्यास्य कियान् काल

(च) सखि! मयि स्नेहेनैव त्वमेव भणसि

(छ) प्रियसखि! आर्यभद्रनटेनापि मम निवेदिता तस्य समवस्था

(ज) कथमिव

(झ) कर्तुं न स इच्छति मज्जनलेपनानि सौधस्थल न च विलगति चन्द्रभीत ।
सङ्गीतक न च श्लाघते कि बहुभि सर्वमपि निन्दति त्वा हृदये वहन् ॥

(ञ) हृदय! इदानीं त्वया समाश्वसितव्यम्
सखि! कलहंसिके! कि तस्य महाभागस्य पुनर्दर्शनमहोत्सवो लब्धो भवेत्.

**कलहंसिका** – (क) पिअसहि! अइरा एव्व त दक्खिस्ससि, 'जदो एत्थ कमलिणी-तीरलदामण्डवम्मि पज्जुण्ण आणइस्स' ति अय्यभद्दणडेण मे कहिअ ।

**प्रभावती** —— (सप्रार्थनमात्मगतम्) (ख) अवि णाम मह हिअअसञ्जीवणं सो महाभाओ एत्थ समागदो होज्ज ।

(तत प्रविशति कामयमानावस्थ प्रद्युम्नो भद्रनटश्च)

**प्रद्युम्नः** – (सस्मरण सौत्सुक्यञ्च)

अद्यापि मानसमनन्यपर मदीय
तस्मै प्रयोगविधये स्पृहयत्यतीव ।
ता यस्तदा मम हि दर्शयति स्म कान्ता
त्रैलोक्यसवननशक्तिमिवात्मयोने ॥ ८ ॥

**भद्रनटः** —— कुमार! तदा किल प्रेक्षामण्डपे नलकूबरवेषधारिणस्ता हृदयवल्लभा चिराय पश्यतस्तवैव केवल चक्षुश्चरितार्थमासीत्, बाह्योद्याने पुन परस्परदर्शनमहोत्सवमनुभवतोरुभयोरपि वाम् ।

**प्रद्युम्नः** —— तदानीमपि ममैवेति कथनीयम् ।

बाह्योद्याने सह परिजनैस्तत्र सङ्क्रीडमाना
दृष्टा मध्ये दनुजसुदृशामुत्सवव्यापृतानाम् ।
पश्यन्ती मा परिचितमिव स्नेहपर्याकुलाक्षी
सा मे सम्प्रत्यपि सुवदना चक्षुषो सन्निधत्ते ॥ ९ ॥

**भद्रनटः** – ननु सुमहानेव परिचय. कुमारेण सह प्रभावत्या –

गुणेषु दृष्ट्वा प्रथम श्रुतेषु पश्चादसौ चित्रपटे भवन्तम् ।
अङ्गसमन्तर्मदनातुराङ्गी दधाति दैत्याधिपतेस्तनूजा ॥ १० ॥

**प्रद्युम्नः** – भद्र! अहमपि तामेव मनसि कुर्वाण कथञ्चपि जीवित धारयामि । (मदनाकूतमभिनीय) अहो विपर्यस्यन्ति भावा कामयमानानाम् । तथा हि ——

हुताशनति मे पतन् वपुषि हन्त चन्द्रातप
शनै क्रकचति स्पृशन् कमलिनीतरङ्गानिल· ।

---

(क) प्रियसखि! अचिरादेव त द्रक्ष्यसि, यत 'अत्र कमलिनीतीरलतामण्डपे प्रद्युम्नमानेष्यामि' इत्यार्यभद्रनटेन मे कथितम्

(ख) अपि नाम मम हृदयसञ्जीवन स महाभागोऽत्र समागतो भवेत्,

विहारशुकमण्डल श्रवणशूलति व्याहरं:
स्तथा विषसमर्पणत्यहह चन्दनालेपनम् ॥ ११ ॥

**भद्रनटः**—अमी तावल्लब्धदयितासमागमे त्वयि स्वभाव एव स्थास्यन्ति ।

**प्रद्युम्नः**—क्वेदानी मदीक्षणचकोरचन्द्रिका सा भवेत् ।

**भद्रनटः**—कलहसिकामुखसङ्क्रान्तेन मद्वचनेन सा प्रभावती प्रमदवनदीर्घिका-तीरवर्तिसङ्केतलतामण्डपमधितिष्ठति । तावत् तत्र गच्छाव: ।

**प्रद्युम्नः**—(सोत्कण्ठम्)

कर्णे सुधा चक्षुषि कौमुदी ता
चित्ते च जीवातुमहं मृगाक्षीम् ।
पश्यामि भूयोऽप्यधुनैव गाढ
मज्जामि सम्मोदमहाम्बुराशौ ॥ १२ ॥

**भद्रनटः**—इद तत् प्रमदवन, यावत् प्रविशाव ।

**प्रद्युम्नः**—(स्पर्शसुखमभिनीय)

असौ वर्षन्नारात् कुमुदसरसीशीकरलवान्
लतादोलारूढा किमपि चलयन् षट्पदवधू ।
अनङ्गार्तैरङ्गैरहह दयिताश्वाससुरभि
परिष्वक्तु *शक्य प्रमदवनपर्यन्तपवन ॥ १३ ॥

(प्रवेश नाटयत )

**भद्रनटः**—(पुरो निर्दिश्य) इयमत्र वज्रणाभनन्दिनी कलहसिकया किमपि मन्त्रय-माणा तिष्ठति । यावदिहैव स्थित्वानयोर्विस्रम्भजल्पितान्याकर्णयाव: ।

**प्रद्युम्नः**—तर्हि लतान्तर्हितौ भवाव ।

**भद्रनटः**—(सस्मितम्) अहो कुमारस्य मदनपारवश्यम्—

तिरस्करण्या प्रच्छन्नमात्मान नावगच्छति ।
न किञ्चिदपि पश्यन्ति रागान्धमनसो जनाः ॥ १४ ॥

**प्रद्युम्नः**—(लज्जा नाटयन्नग्रतो निर्वर्ण्य सहर्षम्)

इयमिह मदनकृशाङ्गी परिणतशरकाण्डपाण्डुरच्छाया ।
पुष्णाति कुतुकमक्ष्णो शाणोल्लिखितेव मौक्तिकशलाका ॥ १५ ॥

---

शक्यमित्यव्यय सुबन्तप्रतिरूपकम् । प्रमदवने प्रियाया सन्निधानात् तत्पर्यन्तपवनस्य प्रद्युम्न प्रति सुखस्पर्शत्व बोध्यम्

**कलहंसिका** – (क) पिअसहि! अइरा एव्व तं दक्खिस्ससि, 'जदो एत्थ कमलिणी-तीरलदामण्डवम्मि पज्जुण्ण आणइस्स' त्ति अय्यभद्दणडेण मे कहिअं।

**प्रभावती** — (सप्रार्थनमात्मगतम्) (ख) अवि णाम मह हिअअसञ्जीवणं सो महाभाओ एत्थ समागदो होज्ज।

(ततः प्रविशति कामयमानावस्थः प्रद्युम्नो भद्रनटश्च)

**प्रद्युम्नः** – (सस्मरणं सौत्सुक्यञ्च)

अद्यापि मानसमनन्यपरं मदीयं
तस्मै प्रयोगविधये स्पृहयत्यतीव।
तां यस्तदा मम हि दर्शयति स्म कान्तां
त्रैलोक्यसवननशक्तिमिवात्मयोनेः ॥ ८ ॥

**भद्रनटः** —कुमार! तदा किल प्रेक्षामण्डपे नलकूबरवेषधारिणस्तां हृदयवल्लभां चिराय पश्यतस्तवैव केवलं चक्षुश्चरितार्थमासीत्, बाह्योद्याने पुनः परस्परदर्शनमहोत्सवमनुभवतोरुभयोरपि वाम्।

**प्रद्युम्नः** — तदानीमपि ममैवेति कथनीयम्।

बाह्योद्याने सह परिजनैस्तत्र सङ्क्रीडमाना
दृष्टा मध्ये दनुजसुदृशामुत्सवव्यापृतानाम्।
पश्यन्ती मां परिचितमिव स्नेहपर्याकुलाक्षी
सा मे सम्प्रत्यपि सुवदना चक्षुषोः सन्निधत्ते ॥ ९ ॥

**भद्रनटः** – ननु सुमहानेव परिचयः कुमारेण सह प्रभावत्याः –

गुणेषु दृष्ट्वा प्रथमं श्रुतेषु पश्चादसौ चित्रपटे भवन्तम्।
अजस्रमन्तर्मदनातुराङ्गी दधाति दैत्याधिपतेस्तनूजा ॥ १० ॥

**प्रद्युम्नः** – भद्र! अहमपि तामेव मनसि कुर्वाणः कथमपि जीवितं धारयामि। (मदनाकूतमभिनीय) अहो विपर्यस्यन्ति भावाः कामयमानानाम्। तथा हि—

हुताशनति मे पतन् वपुषि हन्त चन्द्रातपः
शनैः क्रकचति स्पृशन् कमलिनीतरङ्गानिलः।

---

(क) प्रियसखि! अचिरादेव तं द्रक्ष्यसि, यतः 'अत्र कमलिनीतीरलतामण्डपे प्रद्युम्नमानेष्यामि' इत्यार्यभद्रनटेन मे कथितम्।

(ख) अपि नाम मम हृदयसञ्जीवनं स महाभागोऽत्र समागतो भवेत्,

**प्रद्युम्नः** — अनेन कलहंसिकावचनेन संशयान्निवर्तितास्मि । (अग्रतो दृष्ट्वा) अद्य पुनर्जीवितसंशयः समापतितः । पश्य—

विकिरन् किरणैर्विषस्फुलिङ्गान्
विदधानो बलवैभवं स्मरस्य ।
अपमृत्युरयं वियोगभाजां
हरिणाङ्कः प्रथमादुदेति शैलात् ॥ १७ ॥

**भद्रनटः** — कुमार ! कुलगुरुस्ते चन्द्रमाः साम्प्रतमानुकूल्यमिवाचरति । तथा हि —

हरति तिमिरमाराद्दक्षिसरोधकं ते
प्रकटयितुमिवाय दानवाधीशपुत्रीम् ।
परिमलमिव दातुं गन्धवाहोपनेयं
दलयति च कराग्रैर्दीर्घिकाकैरवाणि ॥ १८ ॥

**प्रद्युम्नः** — तदा खल्वयमनुकूलः, अमुष्येव यदा मम समागमः प्रेयस्या । सम्प्रति हि—

अन्तः कलङ्कममुदिश्य वहन् विषाद-
मापाण्डुरच्छविरसौ परिधूसराङ्गः ।
कृच्छ्रादतीत्य दिवसं समुपोढरागो
दिष्ट्या समेत्य रमते निशया शशाङ्कः ॥ १९ ॥

**भद्रनटः** — यावदद्यैव भवानपि प्रियया सङ्गच्छते ।

**प्रभावती** — (क) हला ! एस कालो मम जीविअस्स कालो समुवट्ठिओ,
विरइअकुमुउल्लासो जोह्नालच्छीए पप्फुरन्तीए ।
पज्जुण्णो विअ चन्दो जस्सिं मह एव्व कुणइ सन्दावं ॥ २० ॥

**कलहंसिका** — (ख) पिअसहि ! दुवे वि झत्ति एव्व तुह णिव्वुदिअरा भविस्सन्ति ।

**प्रभावती** — (ग) कहं मम मन्दभाआए इदं भवे । (तापातिशयं नाटयन्ती सस्कृ-तमाश्रित्य)

---

(क) सखि ! एष कालो मम जीवितस्य कालः समुपस्थितः,
विरचितकुमुदोल्लासो ज्योत्स्नालक्ष्म्या प्रस्फुरन्त्या ।
प्रद्युम्न इव चन्द्रो यस्मिन् ममैव करोति सन्तापम् ॥

(ख) प्रियसखि ! द्वावपि झटित्येव तव निर्वृतिकरौ भविष्यतः ।

(ग) कथं मम मन्दभागाया इदं भवेत् ।

अमी शीताः स्वभावेन जगदाह्लादना' सुखा ।
दहन्ति मम गात्राणि किन्नु चन्द्रगभस्तय ॥ २१ ॥

किञ्च

प्रकृत्या शीतलो वायुर्नानापुष्परजोवह ।
दावानलसदृक्षो मा दहतीत्यद्भुतान्तरम् ॥ २२ ॥

(इति दीर्घमुष्ण च निश्वस्य मूर्च्छा नाटयति)

**कलहंसिका** -- (क) हद्धि हद्धि अइभूमि गदो से मअणसन्दावो । हला ! समस्ससिहि समस्ससिहि । (इति नाट्येन शिशिरोपचार करोति)

**भद्रनटः** -- (ससम्भ्रमम्) कुमार ! कि विलम्बसे । सपदि समाश्वासय तावदिमामात्मसन्दर्शनेन । अद्य खल्वमुष्या.—

लाजस्फोट स्फुटति कुचयोर्हन्त मुक्ताकलाप
क्लृप्ता शय्या नवकिसलयैर्भस्मभूय प्रयाति ।
शोष गच्छत्यलघु हृदये न्यस्तमौशीरमम्भ-
स्तस्यास्ताप शमयितुमल त्वदङ्गाश्लेष एव ॥ २३ ॥

**प्रभावती** -- (समाश्वस्य) (ख) सहि ! अल इमिणा उद्दीविअमअणसज्वरेण सिसिरोवआरविहिणा ।

**कलहंसिका** -- (सखेदम्) (ग) को एत्थ पडिआरो भवे ।

**प्रभावती** -- (घ) णत्थि मे हदासाए अण्णो मरणादो, ज दाणि तस्सि दुल्लहम्मि जणे उक्कण्ठिअहिअअ म पञ्चेहि वि सरेहि मअणो पहरइ ।

**प्रद्युम्नः** -- (तिरस्करणीमपनीय सहसोपसृत्य)

अयथार्थमेव मन्ये प्रणयिनि ! मदनस्य पञ्चबाणत्वम् ।
निपतन्ति मम शरीरे शत शत सायकास्तस्य ॥ २४ ॥

**प्रभावती** – (विलोक्य ससम्भ्रममुत्थातुमिच्छति)

---

(क) हा धिक् हा धिग् अतिभूमि गतोऽस्या मदनसन्ताप । सखि ! समाश्वसिहि समाश्वसिहि

(ख) सखि ! अलमनेनोद्दीपितमदनसज्वरेण शिशिरोपचारविधिना

(ग) कोऽत्र प्रतीकारो भवेत्

(घ) नास्ति मे हताशाया अन्यो मरणाद्, यदिदानी तस्मिन् दुर्लभे जने उत्कण्ठितहृदयां मा पञ्चभिरपि शरैर्मदन. प्रहरति.

**प्रद्युम्नः** — अयि! मुग्धे! अलमलमायास्य दुस्सहतापकर्शितानि स्वभावसुकुमाराण्यङ्गानि ।

**भद्रनटः** — (तिरस्करिण्यपनयनाटितकेन पुरत स्थित्वा) अपि कुशल कलहंसिकाद्वितीयायाः प्रद्युम्नसुकृतपरिणतेः ।

**कलहंसिका** -- (सहर्षम्) (क) कह एस अणब्भवरिसो । अवि सागदं अय्यभद्दणडसहअरस्स पहावदीमणोरहस्स ।

**प्रद्युम्नः** -- अद्य खलु भवत्योर्दर्शनेन ।

**कलहंसिका** -- (ख) इद पल्लवासण अलङ्करिज्जउ ।

(उभावुपविशात )

**प्रभावती** -- (लज्जावनतमुखी तिष्ठति)

**प्रद्युम्नः** -- (साभिलाषम्)

रमणीयैर्गुणै· क्रीत तव दानवनन्दिनि! ।
पद्मकान्तिमुषा दृष्टया पश्य दासमिम जनम् ।। २५ ।।

**प्रभावती** -- (स्वगतम्) (ग) दसण विअ वअण वि से महाभाअस्स महुर ।

**कलहंसिका** -- (घ) वअस्स! एसा खु दिट्ठीए णिमेसप्पच्चूह असहन्ती हिअएण तुमं पेक्खइ एव्व ।

**भद्रनटः** -- साधु कलहंसिके! साधु ।

**प्रभावती** -- (सरोषम्) (ङ) हला! असम्बद्धप्पलाविणि! इदो अवसर तुम ।

**भद्रनटः** -- (सोत्प्राशम्) अयि! मुग्धे! कुप्यतु भवती निजायैव देहाय ।

अयमानन्दजैर्बाष्पैः पुलकैश्च निरन्तरैः ।
अन्तर्गूढां तवावस्थामावेदयति नः स्वयम् ।। २६ ।।

**प्रभावती** -- (च) कह अय्यो वि कलहंसिआमग्ग अणुसरइ ।

---

(क) कथमेष अनभ्रवर्ष"। अपि स्वागतमार्यभद्रनटसहचरस्य प्रभावतीमनोरथस्य

(ख) इद पल्लवासनमलङ्क्रियताम्

(ग) दर्शनमिव वचनमप्यस्य महाभागस्य मधुरम्

(घ) वयस्य! एषा खलु दृष्टे निमेषप्रत्यूहमसहमाना हृदयेन त्वा पश्यत्येव

(ङ) सखि! असम्बद्धप्रलापिनि! इतोऽपसर त्वम्

(च) कथमार्योऽपि कलहंसिकामार्गमनुसरति

**भद्रनटः** --

गौरीव चन्द्रचूडं कमलेव हरिं शचीव पुरुहूतम् ।
प्रद्युम्नमेत्य दयितं चिरमिह काल रमस्व रम्भोरु! ॥ २७ ॥

**प्रभावती** -- (क) अय्य! तं भणाहि, ज जुज्जइ गुरुजणपरतन्ताण कुलकण्णआण ।

**कलहंसिका** - (ख) ण एस तुह गुरु एव्व अय्यभद्दणडो, ता इमस्स वअण अणुचिट्ठ ।

**भद्रनटः** -- युक्तमेवाभिहित मया । यत --

परस्परप्रेमनिबद्धचेतस·
समानशीलान्वयरूपसम्पदः ।
विवाहमाहुर्मिथुनस्य सूरयः
कुमारि ! गान्धर्वमवद्यवर्जितम् ॥ २८ ॥

**प्रभावती** -- (अपवार्य) (ग) सहि! अलङ्घणिज्ज खु अह्माण अय्यस्स वअण ।

**कलहंसिका** -- (घ) अहइ । किञ्च सुणिज्जन्ति पुराणेसु गन्धव्वविवाहपरिणीदाओ बहवीओ कण्णआओ ।

**भद्रनटः** - भोः कुमार !

इदमिह लतागेहं वैवाहिकं तव मण्डपं
मधुकरकुलारावो मङ्गल्यदुन्दुभिनिस्वनः ।
तरुभिरभित कीर्णो लाजाञ्जलिः कुसुमोत्कर
स्मरहुतवह· साक्षी पाणौ करोतु भवानिमाम् ॥ २९ ॥

(इति प्रद्युम्नस्य पाणौ प्रभावत्या पाणिमर्पयति)

**प्रद्युम्नः** -- (सहर्षोल्लासम्) यथाह भवान् (इति गृहीत्वा स्पर्शसुखमभिनीय)

स्पर्शोऽयमायताक्ष्याः सर्वाङ्गीण इव चन्दनालेपः ।
शिशिरयति साम्प्रत मे मदनज्वरकर्शितानि गात्राणि ॥ ३० ॥

---

(क) आर्य! तद् भण, यद्युज्यते गुरुजनपरतन्त्राणा कुलकन्यकानाम्
(ख) नन्वेष तव गुरुरेवार्यभद्रनट , तदस्य वचनमनुतिष्ठ.
(ग) सखि! अलङ्घनीय खल्वस्माकमार्यस्य वचनम्
(घ) अथकिम् । किञ्च श्रूयन्ते पुराणेषु गान्धर्वविवाहपरिणीता बह्वय कन्यका .

**प्रभावती** – (स्वगतम्) (क) अम्महे दाणिं अमुअसाअरणिमग्ग विअ मम हिअअं क पि दस अणुभवइ ।

**कलहंसिका** -- (ख) वअस्स! दाणिं विअ सव्वदा तुए णिमामण्ण एसा बहुमंण्णिज्जउ ।

**प्रद्युम्नः** -- किमिद प्रार्थ्यते ।

सुकृतैरेव लब्धाग्रास्त्वत्सख्या. कलहसिके! ।
अद्य प्रभृति यत्सत्यमाज्ञाकरमवेहि माम् ॥ २१ ॥

(उभे परस्परमवलोक्य हर्ष नाटयत)

**भद्रनटः** – (सदृष्टिक्षेपम्) अयि! कलहसिके! साम्प्रतमनयोर्वधूवरयोर्मङ्गलाचरणविधानर्थं गच्छाव .

**कलहंसिका** -- (ग) जुज्जइ । (इत्युभौ निष्क्रान्तौ)

**प्रभावती** -- (घ) कह म एआइणीं उज्झिअ गदा एव्व । (इति प्रस्थिता)

**प्रद्युम्नः** -- अलमावेगेन ।

परिचर्यैकपरस्ते सविधे तन्वाङ्गि! तिष्ठति जनोऽयम् ।
स्तनभारवहनखिन्न कथमिह गमनेन खेदयसि मध्यम् ॥ ३२ ॥

(इति बलादेना निवर्तयाति)

**प्रभावती** -- (ङ) अय्य! विअड्ढमहिलाजणसमुइदेहि वअणेहिं किति मुद्धसहावं म पआरेसि । मुञ्च दाव । अहं खु पिअसहिं अणुसरिस्स ।

**प्रद्युम्नः** -- (सानुनयम्)

तावत् तिष्ठतु भवती साध्वसमपहाय तन्वाङ्गि! ।
यावद् भवामि धन्य. पीत्वा स्वैरमधरामृतरस ने ॥ ३३ ॥

(इति मुखमस्या· समुन्नमयितुमिच्छाति)

---

(क) अहो इदानीममृतसागरनिमग्नमिव मम हृदय कामपि दशामनुभवति
(ख) वयस्य! इदानीमिव सर्वदा त्वया निस्सामान्यमेषा बहुमान्यताम्
(ग) युज्यते.
(घ) कथ मामेकाकिनीमुज्झित्वा गतावेव
(ङ) आर्य! विदग्धमहिलाजनसमुचितैर्वचनै किमिति मुग्धस्वभावा मां प्रतारयसि । मुञ्च तावत् । अह खलु प्रियसखीमनुसरिष्यामि.

---

'माणिज्ज' ग-पाठः.

(नेपथ्ये)

(क) इदो इदो अय्यो ।

**प्रभावती** -- (ख) (श्रवणनाटितकेन नेपथ्याभिमुखमवलोक्य ससम्भ्रमम्) एसो दाणि अम्बाए कञ्चुई वरदक्खो कलहंसिआए उवदिट्ठमग्गो इदो एव्व उ अच्छइ । जाव लदागुम्मन्तरिदो चिट्ठदु भव ।

**प्रद्युम्नः** -- (तथा करोति)

(तत प्रविशति कलहंसिकोपदिष्टवर्त्मा कञ्चुकी)

**कञ्चुकी** -- विजयता कुमारी । अपि सह्या वेदना ।

**कलहंसिका** -- (ग) अत्थि दाणि को वि विसेसो ।

**कञ्चुकी** -- कुमारि! अद्य भवतीमस्वस्थशरीरा द्रष्टुमिच्छति देवी । तदागम्यताम् ।

**प्रभावती** -- (घ) हला! किं करोमि, जाव अम्बासआस गच्छामो । (इत्युत्थाय साञ्जलिबन्धम्) भो माहवीलआमण्डव! तुम सव्वदा मे एव्व सन्दावहरो होहि । (कलहंसिकाकञ्चुकिभ्या सह दु.खेन निष्क्रान्ता)

**प्रद्युम्नः** -- (सविषादम्) 'श्रेयासि बहुविघ्नानी'ति सत्यमिद सूक्त—

दयितासमागमसुख कथमपि दैवेन मम निर्विशत. ।
प्रत्यूहहेतुरासीद् देव्या प्रतिहारपालोऽयम् ॥ ३४ ॥

(चिन्ता नाटयन् सोत्कण्ठम्)

व्रीडानम्र प्रमदविवश विस्मयोत्फुल्लतारं
दृष्टिं नीलोत्पलदलमयीं निर्मिमाण दिशासु ।
रागाविष्ट स्फुरति हृदि मे लग्नमम्भोरुहाक्ष्या
दृष्टं तस्याश्चिरपरिचितस्निग्धमाकेकराक्षम् ॥ ३५ ॥

यावदस्याः पुनः समागमाय भद्रनटसकाशमेव गच्छामि । (निष्क्रान्त·)

इति चतुर्थोऽङ्कः ।

---

(क) इत इत आर्य.

(ख) एष इदानीमम्बाया कञ्चुकी वरदक्षः कलहंसिकयोपदिष्टमार्ग इत एवागच्छति । यावल्लतागुल्मान्तरितस्तिष्ठतु भवान्.

(ग) अस्तीदानीं कोऽपि विशेष

(घ) सखि! किं करोमि, यावदम्बासकाश गच्छामः । भो माधवीलतामण्डप! त्व सर्वदा मे एव सन्तापहरो भव.

## अथ पञ्चमोऽङ्कः ।

(तत प्रविशति भद्रनट )

**भद्रनटः**—(सविमर्शम्) प्रायेण कार्याधीन रम्यत्वमरम्यत्व च कालस्य । कुत –

दैत्याधिपस्य सुरलोकजयोद्यतस्य खेद तदा जनयति स्म पयोदकाल ।
तन्नन्दिनी रमयत पुनरेष एव सौख्यावह. समजनिष्ट यदूद्वहस्य ॥ १ ॥

तथा हि कुमार —

कदाचन स निर्विशन् प्रमुदित. कदम्बानिलान्
कदापि घनगर्जित निशमयन् परीरम्भदम् ।
कदाचन विलोकयन् गृहशिखण्डिना ताण्डव
क्षणार्धमिव कान्तया क्षपयाति स्म वर्षा सुखम् ॥ २ ॥

(सपरितोषम्) समाप्तप्रायमेवास्मदनुष्ठेयम् । तयोस्तावत्तैस्तैरुपायै सङ्घटितयो. परस्परानुरागपराधीनहृदययो प्रभावतीप्रद्युम्नयोर्निर्विघ्न यौवनफलानुभवो वर्तते । सङ्गमिते च प्रभावतीमुखेन कुमाराभ्या गदसाम्बाभ्या वज्रणाभसोदर्यस्य सुनाभस्य दुहितरौ चन्द्रवतीगुणवत्यौ । त्रिभुवनहृदयशल्यस्य वज्रणाभस्य वध एव साम्प्रतमवशिष्यते । (स्मृतिमभिनीय) एव हि सन्दिष्ट स्वामिना वासुदेवेन—'यदा किल वज्रणाभ. स्वर्गविजयाय समुद्युङ्क्ते, तदा कुमारेण हन्तव्य । मयापि तत्र सन्निधातव्यम् । अतस्तत्समुद्योगो मम निवेद्यतामि'ति । अतीतश्चाद्य दानवपतेरमरलोकयात्राप्रत्यूहो घनसमय , यदिदानीम् —

आश्यानपङ्कपथमम्बुलसत्तटाक-
माविर्मदद्विपमयत्नविलङ्घ्यसिन्धु ।
आदर्शयन् स्वमिह वैभवमाहवोत्कान्
सन्नाहयत्यवनिपान् शरदेष कालः ॥ ३ ॥

(साशङ्कम्) अद्य सुरलोकविजयोद्योगिन वज्रणाभ जिघांसुः सपरिकर कुमारः प्रकटसञ्चारो वर्तते । अयमेवं वर्तमानो दानवपतिना यदि कदा-

चिदुपलभ्येत तदा सुमहान् व्यतिकर सञ्जायेत । तदिम वृत्तान्त देवाय देवकीनन्दनाय विज्ञापयामि । (इति निष्क्रान्त )

## शुद्धविष्कम्भः ।

---

(तत प्रविशत्याकाशयानेन कृष्णो नारदश्च)

**कृष्णः**—ततस्तत ।

**नारदः**—तत प्रकटसञ्चारिण कुमारमन्त.पुररक्षिणा मुखाद् रजन्यामुपश्रुत्य क्रोधान्धकारितमनसा वासभवनगनेन वज्रणाभेन तन्निग्रहाय समादिष्ट-सैन्यम् ।

**कृष्णः**—ततस्तत. ।

**नारदः**—ततश्च—

मुसलशूलपरश्वधमुद्गरप्रमुखशस्त्रभयङ्करपाणयः ।
निरगमन् भवदात्मजनिग्रहग्रहजुषो दनुजेश्वरकिङ्कराः ॥ ४ ॥

**कृष्णः**—(साशङ्कम्) ततस्तत. ।

**नारदः**— ततश्च—

दनुजनिधनशङ्कादीनचित्ता स्वकान्ता
सरसमथ वचोभिः सान्त्वयन् प्रेमनिघ्नाम् ।
कथमपि तदनुज्ञा प्राप्य खड्गैकमित्रो
रणविहरणकाङ्क्षी निर्गतो रौक्मिणेयः ॥ ५ ॥

**कृष्णः**—हन्त महदिदमातङ्कस्थानम् । ततस्तत ।

**नारदः**—ततश्च प्रवृत्ते सङ्ग्रामे—

चिच्छेद बाहून् केषांचित् केयूरवलयोज्ज्वलान् ।
सकुण्डलानि चान्येषां शिरांसि यदुपुङ्गव ॥ ६ ॥

**कृष्णः**—तर्हि कलहकुतुकिनस्ते महान् सन्तोष. ।

**नारदः**—(सचमत्कारम्) मधुकैटभशासन! सन्तोष इतिं किमुच्यते । तदा किल—

अयमधिरणदेश कल्पिते बाणतल्पे
दलितकरटिमुक्तादत्तपुष्पोपहारे ।

मदपरवशमार्तैर्मर्दिताङ्ग विहङ्गै-
निशि दनुजबलौघ दीर्घनिद्रामनैषीत् ॥ ७ ॥

**कृष्णः**--कि निरवशेषित दानवकुल वत्सेन ।

**नारदः**--इदानीमेव निरवशेष करिष्यते । तदानीं पुनरमुना निषूदितो भयपलायितायास्त्रिष्वेको भागस्त्रिदशरिपुसेनाया ।

**कृष्णः**--तर्हि महामुने! वत्सस्य सकाशमविलम्बितमेव गच्छाव. ।

तत्पूर्व क्षयमवलोक्य सैनिकानां
सन्नह्येद्दनुजपतिः क्रुधा स योद्धुम् ।
उत्सिक्ता· स्वयमभिभूष्णव परेभ्यः
सञ्जात न खलु पराभव सहन्ते ॥ ८ ॥

**नारदः**--साधु समर्थितम् । (पुरोऽवलोक्य) तिमिरभररुद्धदृष्टिमार्गेऽपि निशासमरे तथा विहरत. कुमारस्य दिष्ट्या प्रभात समुपस्थितम् । अद्य हि--

प्रहृततिमिरजाल तेजसा पाटलाभ
प्रथमगिरिसमेत मण्डल पश्य भानो. ।
रणभुवि हतदैत्यानीकरक्तारुण ते
भुजगतामिव चक्र कृष्ण! पुष्णाति हर्षम् ॥ ९ ॥

(इति परिक्रामत )

(नेपथ्य)

दिक्पालद्विपदर्पभञ्जनकलानिष्णातदोष्णा क्षण
येनाधिष्ठितमामनन्ति हरितां कोण सुरश्रेणय· ।
विश्व मानुषशब्दशून्यमधुना कर्तु स उत्तिष्ठते
देवो वज्रपुरेश्वरस्त्रिजगतीसम्पत्प्रियम्भावुक ॥ १० ॥

**नारदः**--(नेपथ्याभिमुखमवलोक्य पुरो निर्दिशन्) यथाचिन्तितमेव समुपस्थितं, यदयमिदानीमहमहमिकया समुपस्थितै*रालोकशब्दमुखरमुखैः सेनापतिभिरुद्घुष्यमाणनिजानुभाव· क्रोधानलरूक्षै कटाक्षविक्षेपैर्निर्दहन्निव निखिलमपि जीवलोकं करतलकलितविविधायुधमरीचिमञ्जरीभिराकालिकी-

* आलोकशब्दो जयशब्द .

मम्बरमणिसम्पदमापादयन्त्या समुल्लसत्पताकया पताकिन्या कबलितदशाशो वज्रणाभः सुकल्पिताङ्गेन सरभस समरभुवमवतरति ।

**कृष्णः**—(सबहुमानम्) भगवन्! अयमसौ समुचितमेव लक्ष वत्सस्य ।

**नारदः**—अथकिम् । अमुना पुनरधिरूढरथेन कुमारस्य पदातेरायोधनमसमञ्जसमवधारयामि ।

**कृष्णः**—महामुने! कल्पित एव वत्सस्य भुजगराजसारथिर्मनोरथगामी **रथः** । (अग्रतो निर्दिशन्) पश्य । अयमिदानीं वत्स —

आबिभ्रदसे धनुराततज्यमाबद्धतूणीरयुगापराङ्गः ।
रथ समारुह्य लसत्पताक वीरो रसो मूर्त इवाविरस्ति ॥ ११ ॥

**नारदः**--(दृष्ट्वा सहर्षम्) इदानीमेव कुमारो दानवेन्द्रनिधनेन चक्षुषी मे सविशेषं चरितार्थयिष्यति ।

एतस्य शम्बररिपोरिह यादवेन्द्र-
कोदण्डकर्षणभवो युधि घोष एषः ।
अद्यैव दानवपतिर्वधमेष्यतीति
[2]शङ्के निवेदयितुमाश्रयति त्रिलोकीम् ॥ १२ ॥

**कृष्णः**—(समन्तादवलोक्य)

परम्परविघट्टनक्वणितकिङ्किणीजालकै
समीरवशचञ्चलध्वजपटाञ्चलै स्यन्दनैः ।
रणाद्भुतदिदृक्षया सपदि वत्सदैत्येन्द्रयो-
र्नभस्तलमितस्ततो निबिडयन्ति वैमानिकाः ॥ १३ ॥

**नारदः**—(निरूप्य) कथमुपक्रान्तमेव योद्धुं कुमारवज्रणाभाभ्याम् । **अद्य हि**—

कल्पापायभयाकुलां विदधतो ये भूर्भुवःस्वस्त्रयी
मुच्यन्ते प्रसभावकृष्टधनुषा पत्या सुरद्वेषिणाम् ।
मध्येवर्त्म *वमत्कृशानुकणिकाः क्षिप्र क्षुरप्रैः शितैः
शूरेणानकदुन्दुभेः शकलिताः पौत्रेण ते पत्रिणः ॥ १४ ॥

---

१ 'मन्धतमसस' क-ख पाठः

२. 'ङ्के स वे' ग-पाठ.

---

* वमन्त्य आविर्भवन्त्यः कृशानुकणिका येभ्यस्ता.

**कृष्णः** — (अग्रतो दृष्ट्वा) हन्त दानवपतेरङ्गकार्कश्य, यत —

सरूढवज्रव्रणलाञ्छनेऽस्मिन्
वक्षस्तटे वज्रपुरेश्वरस्य ।
वत्सेन वैफल्यममी प्रयान्ति
क्षिप्ताः शरा मूर्खे इवोपदेशाः ॥ १५ ॥

**नारदः** — (सहर्षम्) भो कंसनिषूदन! पश्य सकललोकातिशायि भुजवीरायित भवदात्मजस्य —

कुण्ठीभूतसुरद्विपद्विभवे गोत्राचलाधित्यका
व्यूढे दानवराजवक्षसि जगल्लक्ष्मीविहाराङ्गणे ।
एतेन प्रहिता पराभवममी स्वोपज्ञमातन्वते
दृप्यच्छम्बरबाहुडम्बरभिदाधौरेयधाराः शराः ॥ १६ ॥

**कृष्णः** — (अग्रतो निर्दिश्य) भगवन्! क एष पुनराकर्णकृष्टकोदण्डः क्रोध इव मूर्तः स्यन्दननिर्घोषमुखरितदिगन्तरालः सरभसमाधावति ।

**नारदः** — (विभाव्य सगौरवाद्भुतम्)

ज्यायान् बाहुपराक्रमेण वयसा वीरः कनीयानयं
भ्राता दानवभर्तुराहितजगत्क्षोभः सुनाभाह्वयः ।
दण्डः प्रेतपतेर्निपत्य यदुरस्येरण्डकाण्डायते
दम्भोलिश्च मृणालनालति रणे जम्भासुरद्रोहिणः ॥ १७ ॥

**कृष्णः** — (ससम्भ्रमम्) न खलु द्वन्द्वयुद्धप्रवृत्तयोः साहाय्यदायिनाऽनेन भवितव्यम् । अयं पुनर्वज्रणाभसमीपमुपसर्पति । तदहमपि वत्सस्य प्रत्यनन्तरीभवामि ।

**नारदः** — (सप्रमोदम्) अलमिह भवतः संरम्भेण ।

महान्तमिव पर्वतं प्रहितमास्थितो वज्रिणा
स्वचक्रमुखचीत्कृतैः श्रवणनन्दनं स्यन्दनम् ।
मृगाधिप इव द्विपं महितविक्रमप्रक्रमः
प्रतीर्ष्यति[2] निरङ्कुशं त्वदनुजः सुनाभं गदः ॥ १८ ॥

---

१. 'त्यन्त' क ख-पाठः
२. 'तीच्छति' ग. पाठः.

**कृष्णः**—(सश्लाघम्) भगवन्! अवसरोचितममुना कृतं वत्सेन ।

**नारदः**—(सबहुमानम्)

किमेतदद्भुतं कृष्ण! गदस्य धृतिशालिनः ।
यदुवंशभुवा राज्ञामीदृशी कालयोधिता ॥ १९ ॥

**कृष्णः**—(सावेगम्) भगवन्! वत्सयोर्वज्रणाभसुनाभाभ्यां द्वन्द्वयुद्धे प्रवृत्ते हन्त साम्बमभिद्रवन्ति समरारभटीसमुद्भटास्त्रिदशरिपुसेनाभटाः ।

**नारदः**—(निर्वर्ण्य सोल्लासम्) अलमावेगेन । पश्य पश्य—

*अनन्यसामान्यदशप्रहारमैरावतं वज्रभृतोपनीतम् ।
आरुह्य साम्बः समरोद्यतानि निहन्त्यसौ दानवसैनिकानि ॥ २० ॥

**कृष्णः**—अहो महीयानस्मासु महेन्द्रस्य पक्षपातः ।

**नारदः**—ननु स्वात्मनीति वक्तव्यम् ।
(आकर्णनमभिनीय) रोषावेशकलिवशः किमाह वज्रणाभः—'अरे अरे अनात्मज्ञ! मानुषडिम्भ! वज्रणाभं न जानासि ।

मत्तैरावणगण्डमण्डलमदासारोदयावग्रहैः
राशापालपुराङ्गनानयनयोरास्राम्बुनाडिन्धमैः ।
अद्यैव क्रियते चिरात्प्रतिभटाभावेन तृष्णोल्बणै-
र्मद्बाणैस्तव वीरपाणमुरसि प्रस्यन्दिरक्तासवे' ॥ २१ ॥

इति ।

**कृष्णः**—अहो खल्वात्मश्लाघित्वमस्य दानवहतकस्य ।

**नारदः**—(श्रवणनाटितकेन) मन्दस्मितमधुरवदनाम्बुजेन कुमारेण पुनः किमुच्यते—'अयि भो दानवापशद! किमिह विकत्थनया ।

ससार्चिःकणिकोत्किरैर्मम शरैः पृष्ठे भुवः पातितं
दंष्ट्राकोटिविशङ्कटास्यकुहरस्फारोच्चलच्छोणितम् ।
त्वामद्यैव विलोक्य विस्मितमतेरानन्दजैरश्रुभि-
श्चित्रा वृत्ररिपोर्दृशां दशशती तृप्तिं परामेष्यति' ॥ २२ ॥

* अनन्यसामान्या गजान्तरव्यावृत्ता दशसंख्याका प्रहारा प्रहरणसाधनानि यस्य तम् । दशप्रहरणत्वं चास्य गजान्तरापेक्षया दन्तद्वयाधिक्यात् । गजान्तराणामष्टप्रहरणत्वमुक्तं मातङ्गलीलायां 'शुण्डावालधिदन्तैश्च चतुर्भिश्च पदैरपि । प्रहरन्ति यतस्तस्मादष्टप्रहरणा द्विपाः' इति ।

इति । (सश्लाघम्) अद्य मे चिरकालतृषितयोश्चक्षुषोरिव श्रवणयोरपि पारणा कृता कुमारेण ।

**कृष्णः**--(परितः पश्यन्) महर्षे! नूनमिदानीं दिव्यास्त्रसम्प्रहारप्रसक्तेन दानवराजेन तामसमस्त्रं प्रयुक्तम् । यतः —

राहुग्रस्तामवस्थां जनयदधिपतेर्वासराणामकाण्डे
कुर्वद् वीराभिसारत्वरितसुरवधूस्वैरसञ्चारसौख्यम् ।
टङ्कच्छेद्यं मृडानीपतिगलगरलश्यामलं ध्वान्तजालं
रोदोरन्ध्रं निरुन्धत् प्रसरति जननाचक्षुरायुष्यहारि ॥ २३ ॥

**नारदः**--(समन्तादवलोक्य सहर्षम्) कुमारेण पुनः कृतप्रतिकृतकोविदेन प्रयुक्तः पावकदैवतो बाणः ।

इतः प्रहितचक्षुषा यदुकुलेश! भाव्यं त्वया
परा[illegible]र्हुतवहप्रभामण्डलैः ।
अतीव महदद्भुतं वियति शारदा अप्यमी
चकासति तटिल्लतासहचरा इवाम्भोधराः ॥ २४ ॥

**कृष्णः**--(निरूप्य) हन्त कथमिह प्रत्यस्त्रीकृतो दुरात्मना दानवेन वारुणो मार्गणः । अद्य हि--

कल्पान्तप्रथमानचण्डपवनव्याघट्टनोन्मूलित-
प्रक्षिप्तोपरिघूर्णिताञ्जनगिरिप्रत्यर्थिभूतश्रियः ।
मन्थानाचलमथ्यमानजलधिध्वानोर्जितैर्गर्जितै-
र्विश्वं काश्चन साम्प्रतं बधिरयन्त्यम्भोमुचां पङ्क्तयः ॥ २५ ॥

**नारदः**--(सहर्षाद्भुतम्) कृष्ण! पश्यतु भवान् साम्प्रतं कुमारेण वायव्यमस्त्रमाहूतं, यतः —

तत्तादृग्गतिरयजातघोषसम्पत्-
संवर्तोदयमतिकारिभिः समीरैः ।
क्षिप्यन्ते वियति *वरण्डनिर्विशेषं
प्रोच्चण्डैर्झटिति पयोदमण्डलानि ॥ २६ ॥

* 'वरण्डस्तृणसञ्चयः' इति वैजयन्ती ।

**कृष्णः**—(सश्लाघम्) भगवन्! अवसरोचितममुना कृतं वत्सेन।

**नारदः**—(सबहुमानम्)

किमेतदद्भुतं कृष्ण! गदस्य धृतिशालिनः।
यदुवंशभुवा राज्ञामीदृशी कालयोधिता॥ १९॥

**कृष्णः**—(सावेगम्) भगवन्! वत्सयोर्वज्रणाभसुनाभाभ्यां द्वन्द्वयुद्धे प्रवृत्ते हन्त साम्बमभिद्रवन्ति सम्नरारभटीसमुद्भटास्त्रिदशरिपुसेनाभटाः।

**नारदः**—(निर्वर्ण्य सोल्लासम्) अलमावेगेन। पश्य पश्य—

*अनन्यसामान्यदशप्रहारमैरावतं वज्रभृतोपनीतम्।
मारुह्य साम्बः समरोद्यतानि निहन्त्यसौ दानवसैनिकानि॥ २०॥

**कृष्णः**—अहो महीयानस्मासु महेन्द्रस्य पक्षपातः।

**नारदः**—ननु स्वात्मनीति वक्तव्यम्।

(आकर्णनमभिनीय) रोषावेशकलिवशः किमाह वज्रणाभः—'अरे अरे अनात्मज्ञ! मानुषडिम्भ! वज्रणाभं न जानासि।

मत्तैरावणगण्डमण्डलमदासारोदयावग्रहे
राशापालपुराङ्गनानयनयोरास्ताम्बुनाडिन्धमे।
अद्यैव क्रियते चिरात्प्रतिभटाभावेन तृष्णोल्बणै-
र्मद्बाणैस्तव वीरपाणमुरसि प्रस्यन्दिरक्तासवे'॥ २१॥

इति।

**कृष्णः**—अहो खल्वात्मश्लाघित्वमस्य दानवहतकस्य।

**नारदः**—(श्रवणनाटितकेन) मन्दस्मितमधुरवदनाम्बुजेन कुमारेण पुनः किमुच्यते—'अयि भो दानवापशद! किमिह विकत्थनया।

सप्तार्चिःकणिकोत्किरैर्मम शरैः पृष्ठे भुवः पातितं
दंष्ट्राकोटिविशङ्कटास्यकुहरस्फारोच्चलच्छोणितम्।
त्वामद्यैव विलोक्य विस्मितमतेरानन्दजैरश्रुभि-
श्चित्रा वृत्ररिपोर्दृशां दशशती तृप्तिं परामेष्यति'॥ २२॥

---

* अनन्यसामान्या गजान्तरव्यावृत्ता दशसंख्याकाः प्रहाराः प्रहरणसाधनानि यस्य तम्। दशप्रहरणत्वं चास्य गजान्तरापेक्षया दन्तद्वयाधिक्यात्। गजान्तराणामष्टप्रहरणत्वमुक्तं मातङ्गलीलायां 'शुण्डावालविषाणैश्च चतुर्भिश्च पदैरपि। प्रहरन्ति यतस्तस्मादष्टप्रहरणा द्विपाः' इति।

**नारदः**-- अलमावेगेन । पश्य पश्य—

स्वयं समाश्वस्य कुमार एष
समाहितो धैर्यमहाम्बुराशिः ।
दर्पोद्धुर दैत्यपति जिघांसु
सौदर्शन ध्यायति सम्यगस्त्रम् ॥ ३१ ॥

**कृष्णः**-- (निरूप्य सोच्छ्वासम्) देवर्षे ! साधु दृष्ट भवता, यत —

सम्भ्रान्तैर्दाहभीत्या सपदि सुरगणैर्दूरमुन्मुक्तवर्त्मा
ज्वालाभिर्लेलिहानो मुहुरहिमरुचेर्वाजिना चामराणि ।
दृष्टः कल्पान्तशङ्काकलुषितमतिभिर्दिग्गजेन्द्रै
प्रादुर्भूतोऽन्तरिक्षे पवमशनकृतप्रक्रमश्चक्रराज ॥ ३२ ॥

**नारदः**— (दृष्ट्वा सानन्दम्)

चक्रमूर्जितहुताशनोज्ज्वल
सम्प्रयुक्तमिव शम्बरारिणा ।
आपतत्यहह दानवाधिपे
दृष्टिभि सह दिवौकसामिदम् ॥ ३३ ॥

**कृष्णः**— (सहर्षाद्भुतम्) देवर्षे ! सिद्धमिदानीमस्मदभिलषित, यदेषः—

सभयममरवर्गैरीक्षितश्चक्रधारा-
दलितहृदयमर्मग्रन्थिनिष्ठ्यूतरक्त ।
अधिरणमधिशेते वीरशय्या त्रिलोकी-
दुरितविलसिताना वज्रणाभ सनाभि ॥ ३४ ॥

**नारदः**— (ससम्भ्रमम्) इतस्तावद् दृश्यता द्रष्टव्यम्—

दष्टादष्टाधरोष्ठ त्रिपुरहरकरोद्धूयमानत्रिशूल-
क्रूरभ्रूभङ्गजिह्मालिकमरिवदनाबद्धरूक्षाक्षिकोणम् ।
कृत्तोत्क्षिप्त मदेन ज्वलदनलशिखोद्गारिभि कङ्कपत्रैः
दृष्ट्वो. प्रीतिं वितन्वत् पतति दिविषदां द्राक् सुनाभस्य शीर्षम् ॥

**कृष्णः**— (विलोक्य सहर्षस्मितम्) ननु समुचितमेव ज्येष्ठपथानुवर्तनमनुजस्य ।

**नारदः**-- (अन्यतो दर्शयन्) पश्य सैनिका अपि स्वामिगत मार्गमनुगच्छन्ति ।

---

१. 'मुज्झित' ग-पाठ २ 'म्प्रमुक्त' ग-पाठ.

तथा हि—

अचलेन दैत्यपतिना प्रहितेयं वाहिनी महती ।
रणजलधिमध्यदीप्ते सक्षीणा भवति साम्बबडवाग्नौ ॥ ३६ ॥

**कृष्णः**—(सानन्दम्) महर्षे! सकलसुरासुरदुर्दमभुजशौर्यसम्पदः सानुप्लवस्य वज्रणाभस्य जेतार गदसाम्बसहाय वत्समवलोकयन् कृतकृत्यमात्मानमवगच्छामि ।

**नारदः**—नन्वद्य सर्वेऽपि लोकाः कृतकृत्याः । (परितः पश्यन् सहर्षबहुमानम्)

समरगतकुमारोन्मुक्तघोरास्त्रधारा
दलितविबुधशत्रोर्दर्शनाद् वज्रपुर्याः ।
अहमिह शरजातैः कृष्ण! रामात्मनस्ते
हतदशमुखसेनामद्य लङ्का स्मरामि ॥ ३७ ॥

**कृष्णः**—भगवन्नारद! सर्वममरसाक्षी खलु भवान् ।

**नारदः**—इदानी महेन्द्रप्रमुखा दिवौकसः प्रहर्षपरवशमनसो विजयश्रिया स्वयवृत प्रद्युम्नमनुमोदन्ते । इह हि—

हतनिपतितशीर्षं शृङ्गहीनाद्रिकल्पं
भुवनहृदयशल्य युद्धभूमौ शयानम् ।
दनुजपतिममीषा पश्यता निर्जराणां
पतति करविमुक्ता साम्प्रत पुष्पवृष्टिः ॥ ३८ ॥

**कृष्णः**—महर्षे! वयमपि समेत्य यावद् वज्रणाभविजयिन वत्समभिनन्दामः ।

**नारदः**—तथा कुर्मः ।

(इत्युभौ विमानावतरण नाटयतः)

**नारदः**—(अग्रतो निर्दिशन्) देव! देवकीनन्दन! अयमिदानीं—

गदसाम्बसहायस्त्वा प्रद्युम्न उपतिष्ठते ।
सेव्यमानोऽर्थधर्माभ्यामुत्साह इव मूर्तिमान् ॥ ३९ ॥

(ततः प्रविशति यथानिर्दिष्टः प्रद्युम्नः)

**प्रद्युम्नः**—तात! गद! वत्स! साम्ब! अद्य चिरात्तातपादान् द्रक्ष्याम इति सर्वमनोरथानामुपरि वर्तामहे ।

येषा *शेषामिवाज्ञामनितरसुलभा धारयन्त, शिरोभि-
र्निर्गत्य द्वारवत्या दनुजपुरमिमामेत्य तैस्तैरुपायै ।
भद्रेणासाद्य विद्यावितरणगुरुणा प्रापितास्तत्कुमारी-
र्हत्वाजौ वज्रणाभ सहबलमधुना हर्षयामस्त्रिलोकीम् ॥ ४० ॥

**गदः**—वत्सौ ! अयमसावार्यो देवर्षिणा नारदेनास्मानभिगच्छति ।

**साम्बः**—तद् वयमपि त्वरितमेव प्रत्युद्गच्छाम ।

(इति सर्वे उपसृत्य नाट्येन कृष्णमभिवादयन्ते)

**कृष्ण**—(सर्वानुत्थाप्य परिष्वज्य च सहर्षबहुमानम्) दिष्ट्या साम्प्रतमक्षतशरीरान् विजयिनो वत्सानवलोकयामि । वत्सा ! एष देवर्षिर्नारदोऽभिवाद्यताम् ।

(सर्वे तथा कुर्वन्ति)

**नारदः**—वज्रणाभमहार्णवबाडवानल ! प्रद्युम्न ! सुनाभकलभकण्ठीरव ! गद ! दनुजराजसैन्यविपिनदावदहन ! साम्ब ! यूयमायुष्मन्तो भूयास्त ।

(प्रविश्य पटाक्षेपेण)

**भद्रनटः**—(सप्रणामम्) देव ! दिष्ट्या वर्धसे ।

प्रद्युम्नगदसाम्बाना प्रासूयन्त सुतान् प्रिया ।
प्रभावतीचन्द्रवतीगुणवत्य कुलोद्वहान् ॥ ४१ ॥

(सर्वे हर्षं नाटयन्ति)

**नारदः**—सत्यमिदं सूक्त "सम्पद् सम्पदमनुबध्नाति" इति ।

**कृष्णः**—महर्षे ! लब्धप्रतिष्ठमिदानीं यादवकुलम् ।

**नारदः**—जगन्नाथ ! ननु वक्तव्यं त्रिभुवन लब्धप्रतिष्ठमिति ।

**कृष्णः**—

सम्प्राप्तयौवनान्ते शस्त्रविदः शास्त्रपारदृश्वानः ।
चिरजीविन· कुमारा भूयासुर्भुवनगोप्तारः ॥ ४२ ॥

**नारदः**—तथा भवतु ।

**प्रद्युम्नगदसाम्बाः**—महान् प्रसादः ।

**कृष्णः**—भगवन् ! अस्मिन् वज्रपुरे वज्रणाभविजयिन वत्सं प्रद्युम्नमभिषेक्तुमिच्छामि ।

---

* शेषामिव निर्माल्यदानमिव.

**नारदः**—सर्वलोकाभिमतमभिहित भवता । तत् किमिदानी विलम्ब्यते

प्रहर्षितस्त्व रिपुनिग्रहेण
कुरुष्व साम्राज्यजुष कुमारम् ।
प्रायेण लोके महता जनाना
फलावसाने भवति प्रहर्ष ॥ ४३ ॥

**कृष्णः**—अये! भद्रनट! सम्भ्रियतामभिषेकसम्भार ।

**भद्रनटः**—देव! पूर्वमेव सम्भृतमास्ते । देवेन महेन्द्रेण प्रेषितमाभिषेकोपकरणम् । अलङ्कृता च वज्रपुरीमिमामद्यैव—

पट्टांशुकाभिवृतहर्म्यलसत्पताका-
मुत्तोरणामुपहृतागुरुधूपवासाम् ।
द्वार्वेदिमध्यगतमङ्गलदीपमाला-
रम्या विलोकयतु दानवराजधानीम् ॥ ४४ ॥

**कृष्णः**—(विलोक्य सहर्षम्) तर्हि त्वरितमत्र सकलमप्यभिषेकोपकरणजातमानीयताम् ।

**भद्रनटः**—यदाज्ञापयति देवः । (इति निष्क्रम्य प्रविश्य च) देव! सर्वमिदमिहोपनीतम् ।

**कृष्णः**—(प्रद्युम्नमवलोक्य) वत्स! स्वास्तीर्णमिद सिंहासनमास्थीयताम् ।

**प्रद्युम्नः**—(सविनयम्) यदाज्ञापयति तात[1] । (इति बद्धाञ्जलिः प्राङ्मुख उपविशति)

(कृष्णो नाट्येनाभिषिञ्चति । नेपथ्ये पुष्पवृष्ट्यनन्तरम्)

दुर्वृत्तनिग्रहमहाव्रतबद्धदीक्ष-
त्रैलोक्यरक्षणकृतक्षणबाहुदण्डः ।
साम्राज्यचिह्नमधितिष्ठतु भद्रपीठ
नाथो यदुक्षितिभृता शरदः सहस्रम् ॥ ४५ ॥

**नारदः**—कृष्ण! सम्प्रति भवता कृतसाम्राज्याभिषेकं महाराज प्रद्युम्नमभिनन्दन्ति देवाः ।

**कृष्णः**—देवर्षे! नारद! किमिदानीमत्र कर्तव्येष्ववशिष्यते ।

**नारदः**—(सहर्ष सश्लाघ च)

---

१ 'व्येऽव' क-पाठ

नीता हर्षमयी दशा त्रिजगती दैत्याधिपध्वंसिना
तत्पुत्रीव गुणोत्तरेण गमिता साम्राज्यलक्ष्मीर्वशम् ।
प्रायः कन्दलितश्च धर्मविटपी प्राप्ताभिषेकश्रिया
प्रद्युम्नेन तदद्य यादवपते! सर्वं हि न साधितम् ॥ ४६ ॥

**कृष्णः**—(प्रद्युम्नमवलोक्य) वत्स! किं ते भूयः प्रियमुपहरामि ।

**प्रद्युम्नः**—तात! किमत. परमपि प्रियमस्ति । अद्य हि भवत्प्रसादमात्रेण मयापि—

समिति निहतस्तैस्तैर्दैत्यैर्विभि सह बान्धवै.
*प्रहितविभवं राज्यं प्राप्तं तदीयमशेषत' ।
शमितहृदयाशङ्काः क्लृप्तास्तथा सकला' प्रजाः
किमिह बहुना सर्वं लब्ध मनोरथतां गतम् ॥ ४७ ॥

(भरतवाक्यम्) तथापीदमस्तु ।

सन्तो रत्नशतैरिवाम्बुनिधयस्तन्वन्तु सूक्तैर्मुद
क्षीयन्तां कलिविभ्रमा इव जगत्क्लेशावतीर्णाः खला' ।
दातारो जलदा इवानुसमय वर्षन्त्वभीष्टं वसु
क्षोणीशाः कुलपर्वता इव महीमश्रान्तमाबिभ्रतु ॥ ४८ ॥

(सर्वे निष्क्रान्ता)

## इति पञ्चमोऽङ्कः ।

**प्रद्युम्नाभ्युदय समाप्तम् ।**

---

* प्रहितविभवं प्रपुष्टवैभवम् । 'प्रथितविभवम्' इति वा पाठः स्यात् ।

नीता हर्षमयी दशा त्रिजगती दैत्याधिपध्वंसिना
तत्पुत्रीव गुणोत्तरेण गमिता साम्राज्यलक्ष्मीर्वशम् ।
प्रायः कन्दलितश्च धर्मविटपी प्राप्ताभिषेकश्रिया
प्रद्युम्नेन तदद्य यादवपते! सर्वं हि नः साधितम् ॥ ४६ ॥

**कृष्णः**—(प्रद्युम्नमवलोक्य) वत्स! किं ते भूयः प्रियमुपहरामि ।

**प्रद्युम्नः**—तात! किमतः परमपि प्रियमस्ति । अद्य हि भवत्प्रसादमात्रेण मयापि—

समिति निहतस्तैस्तैर्दैत्यविं सह बान्धवैः
*प्रहितविभव राज्य प्राप्त तदीयमशेषतः ।
शमितहृदयाशङ्काः क्लृप्तास्तथा सकलाः प्रजाः
किमिह बहुना सर्वं लब्ध मनोरथतां गतम् ॥ ४७ ॥

(भरतवाक्यम्) तथापीदमस्तु ।

सन्तो रत्नशतैरिवाम्बुनिधयस्तन्वन्तु सूक्तैर्मुद
क्षीयन्तां कलिविभ्रमा इव जगत्क्लेशावतीर्णाः खलाः ।
दातारो जलदा इवानुसमय वर्षन्त्वभीष्टं वसु
क्षोणीशाः कुलपर्वता इव महीमश्रान्तमाबिभ्रतु ॥ ४८ ॥

(सर्वे निष्क्रान्ता)

**इति पञ्चमोऽङ्कः ।**

**प्रद्युम्नाभ्युदयं समाप्तम् ।**

---

* प्रहितविभव प्रपुष्टवैभवम् । 'प्रथितविभवम्' इति वा पाठः स्यात् ।